भावत्वं तस्य प्रदर्शकं परात्ययोपदेशकाविमानदभिधायकमित्यर्थः अत एव चास्य तदप्रदर्शकत्वया शा
स्त्रान्तरेभ्यः वैलक्षण्यमपि कटाक्षितं नत्र भवतं वंश्चमपुनः किंनिमित्तं येयम्लाज्ञानानिवृत्तौ देहांतेनिवृ
त्तिबौद्धाज्ञाने निवृत्ते मोक्ष इत्येतदेवाशंक्याह दीक्षया गलिते पुंसज्ञाने पौरुषात्मके धीगतस्यानिवृत्तिता
द्विकल्पापि हि मंभवेत् धीगतस्यतज्ज्ञानस्य विकल्पो हि भेदप्रथात्मकः सेव चाख्यातिरूपमज्ञानं । २

मितिवदुक्तं ननु धीगतमज्ञानं यदि न निवृत्तं तदात्मनः किमायातमित्याशंक्याह देहस्वभावपर्यंतमात्म
भावो यो नाधियि देहांते न मोक्षः स्यात्सोपि कथं ज्ञानहानितः हीनितस्यापि दिनियतः कालं बुद्धावात्मग्रहो
भवेदिति तयोरभेदाद्धीधर्मत्वेन मध्यज्ञानमात्मस्वरूपवित्तिं संभवेदिति भावः अतएव देहांते बुद्धुवात्म।
ग्रहस्यपरमात् योक्षस्याज्ञानस्य दीनादिना पूर्वमेव प्रध्वस्तत्वान्मोक्ष इति युक्तमुक्तं न क्षुरीरानेतज्ज्ञा
नेव्यज्यते स्फुटमिति एवं विकल्पानसंभवन्नक्तोबाधायकत्वातिन तदेव शुक्ति तस्य पुनरसंभवे सत्य।
पिदेहे मुक्तिरित्याह बोधात्माननि हंतानिविकल्पान्नुलताद्ध्रुवं न देहमोक्षोपि युक्तं यातो श्रीमन्नृशा।
ठने न चैतदप्रमाणकमित्याह स्मृत्यादि विकल्पयुक्तचित्तस्तु पिंडपाताच्छिवं व्रजेत् इतरस्तु तदेव
तिशास्त्रस्यात्र प्रधानतः इतर इति निर्विकल्पः तदैवेति देहसद्भाव इत्यर्थः यदुक्तं तत्र विकल्पयुक्त
चित्तस्तु पिंडपाताच्छिवं व्रजेत् विकल्पहीनचित्तस्तु आत्मानं शिवमव्ययं पश्यन्त भावशुद्ध्यायोजीव
न्मुक्तो न संशय इति इदानीं प्राक्प्रतिज्ञातं शास्त्रस्यैव प्राधान्यं निगमयति इतीत्यादिना इतिशब्दः का
कालिन्याये न योज्यः तेन श्रीनिशाटनग्रंथसमाप्तौ हेतौ च व्याख्येयः स च हेतुर्यततत्प्रदर्शितमित्या।
दिना प्रागुक्तः ननु किंनाम ज्ञेयस्य न ह्ययं यत्र दर्शने मानं शास्त्रप्राधान्यावगमकमपि स्यादित्याशं
क्याह ज्ञेयस्य च परं तत्त्वं यः प्रकाशात्मकः शिवः न ह्यप्रकाशरूपस्य प्रकाशत्वं वस्तुनापि वा ज्ञेयस्य नी
लादेः नीलत्वेन प्रकाशमानता वदानता वदात्मभूतानत्याते हि सर्वदेव सर्वात्मतिचस्यान्नतु कदाचित्

श्रीं
तं. लो.
२१

21

कोविदपि किं चिन्नजानाति सर्वेपि सर्वज्ञाः स्युः अतस्यास्य प्रवर्तते मम प्रकाशते इति प्रकाशात्मप्रमातृसंलग्नै
व स्यायुज्यते इति नासौ स्वात्ते ग्रेणपर्यवसितस्वरूपो नीलादिः शिव एव प्रकाशात्मकः प्रमातृतानतिरिक्तस्यान्य
स्य भेदाभेदविकल्पापहतत्वात् अतश्च नीलादेर्ज्ञेयस्य प्रकाशमानत्वमेव पारमार्थिकं स्वरूपं तच्च प्रकाशात्म
कः शिव एवं तन्मयमिति ननु संवित्स्वयमतथारूपोपि प्रकाशसंवेद्यात्तथा भविष्यतीत्याशंक्याह नहीति।
ग्राहिप्रकाशसंबंधेनापि प्रकाशमानो नीलादिः स्वयं प्रकाशएव तद्रूपएव सन्प्रकाशते न त्वप्रकाशरू
पः प्रकाशते चेति स्यात् न ह्यश्वेतः प्रसादः श्वेततां नैवैवं वस्तुत्वमप्यस्य स्यात् नहि प्रकाशरूपत्वमप
हायान्यद्वस्तुमद्भवेदिति भावः एवं च न केवलं नीलादेर्ज्ञेयस्याभावस्य प्रकाशमानत्वात्प्रकाशात्मक
शिवस्वत्वं यावत्तदभावस्यापीत्याह अवस्तुतापि भावानां चमत्कारैकगोचरा यत्कुड्यसदृशी नेयं धीर
वस्त्वेतदित्यपि यत्तनास्त्यत्र घट इत्येवंरूपापि बुद्धिः बोद्धस्वभावत्वात् जडाद्विजडपदार्थविलक्षणा प्र
तएव तद्दाभावोपि उद्भासमानत्वात्परमानंदैकघनबोधात्मकशिवस्वभाव एवेत्यर्थः तदाहुः अबोधो
पि उद्भासमानो बोधात्मभूत ईश्वरः इति ननु सिद्धे प्रकाशे भावाभावरूपस्य ज्ञेयस्य तदेकपारमार्थ्यं तत्सि
द्धिस्तु एव केन प्रमाणेन सिद्ध इत्याशंक्याह प्रकाशो नाम यश्चायं सर्वत्रैव प्रकाशते अनपह्नवनीयत्वा
त्किं तस्मिन्मानकल्पनैः अपूर्वार्थविषयं खलु प्रमाणं यदाहुः अनधिगतविषयं प्रमाणमज्ञातार्थप्रकाशो
वेति प्रकाशस्य अपूर्वत्वेन प्रकाशो नास्ति सर्वदैव तस्य प्रकाशमानत्वेनानपह्नवनीयत्वात् इति वा। २१

क्ते तत्र प्रमाणपरिकल्पे तथाहि तदा तस्यापूर्वत्वे प्रकाशः स्यात् यद्यसौ पूर्वमनधिगतत्वेनाप्रकाशमान
स्यात् तथाभावश्च तदहितानां पूर्वकालस्मृतेरसत्त्वं भवेत् स्मृतिर्ह्येवंरूपानुभवं विना नोत्पद्यते अनुभूत
विषयासंप्रमोषात्मकत्वात्तस्याः न च प्रकाशरहितत्वेन पूर्वकालमनुभवोऽस्ति तस्यैवानुभवस्य प्रका
शात्मकत्वात् स एव हि प्रकाश इति कथं पूर्वमपि तदभावः अतश्च सर्वदास्यावभासमानत्वेनादिसि
द्धत्वान्न प्रमाणसव्यपेक्षा सिद्धिः स एव च प्रकाश एव प्रकाशकः प्रमातेति प्रोक्त्या पर प्रमातृरूपः पर
मेश्वरः शिव इति नीत्या पर प्रमातृरूपः परमेश्वरः शिव इति युक्तमुक्तं ज्ञेयस्य च परं तत्त्वं यः प्रकाशात्मा
कः शिव इति न केवलमेतत्सिद्धौ प्रमाणानामनुपयोगो यावत्स्वसत्तैषां तदधीना सिद्धिरित्याह प्र
माणान्यपि वस्तूनां जीवितं यानि तन्वते तेषामपि परो जीवः स एव परमेश्वरः इह वस्तूनां नीलपीता
दीनां प्रकाशनिरपेक्षेण स्वस्वरूपेण तावत्स्वयमन्योन्यं वा न कश्चिद्विशेषः न हि स्वात्मनि नीलं नी
लं पीतं वा पीतं यदि हि स्वात्मनि पीतं स्यात्पीतं वा नीलमिति तत्किमिव न विरुद्धमापतेत् अथ यद्येव
यत्प्रकाशते तत्तथैव तत्स्वात्मनि पर्यवसितं स्यात् इति न नीलं पीतं पीतं वा नीलमिति चेत् एवं तर्ह्येषां
स्वात्मनि न कश्चिदुक्तः स्यादपि तु प्रकाशात्मन इति प्रकाश एवैषां रूपं तत्तन्नियतस्वरूपप्रतिष्ठानिबन्ध
नत्वाज्जीवितं वितन्वीयात् येन नीलमिदं पीतमिदमिति सिद्ध्येत् स च नीलाद्युपरागेण नियतरूपताम
वलम्बमानः प्रमाणशब्दव्यपदेश्यो भवेत् न चास्य स्वात्मसिद्धिः प्रमाणसापेक्षणीया प्रकाशरूपत्वात् प्र

श्री॰
तं॰लो॰
२२

22

काशस्यचस्वपरप्रकाशकत्वात् तथाभूतोप्यसौप्रकाशोविमर्शरूपतांविनानर्थःस्यात्मनोवाप्रकाशरूप
तायांप्रतिष्ठासंदेहस्यात् नहिप्रकाशइत्येवासौस्वपरात्मनोःप्रतिष्ठापकोभवेत् एवंहिनीलमपिनील
मित्येवंकृत्वातथास्यात् तस्मात्स्वपरप्रकाशतासिद्धौतस्याप्यहंपरामर्शात्मजीवभूतःप्रकाशाभ्युप
गमनीयोयेनसर्वंसिद्धेत् यदुक्तं प्रकाशस्यात्मविश्रांतिरहंभावःप्रकीर्तितइतिसएवपरप्रकाशात्
मापरमेश्वरःशिवइत्युक्तं तेषामपिपरोजीवःसएवपरमेश्वरइति एवमासिद्धत्वादस्यनकेवलंसाध
कंप्रमाणमकिंचित्करंयावद्बाधकमित्याह सर्वापह्नवहेवाकधर्माप्येवंहिवर्तते ज्ञानमात्मार्थमि।
त्येतन्नेतिमांप्रतिभासते सर्वं घो ज्ञात ज्ञे यानामपह्नवेनिराकरणंतत्रहेवाकएवधर्मःस्वभा
वःयस्यसोयं तत्रद्वयाभाववादिनोमध्यमिकाज्ञातृज्ञेयाभाववादिनोयोगाचाराज्ञात्रभाववादि
नोवैभाषिकाः सोपिह्येवंज्ञानमात्मार्थइत्येतन्मांसंवेदनस्वभावत्वाद्विचारयितारंप्रतिनेतिभासते
नास्तीतिप्रतीतिरूपोवर्ततेवतिष्ठतेइत्यर्थः तेनात्माचेन्निराकरणेसाधनेवाप्यवश्यमेवसाधयिताप्
र्वकोज्ञाताह्यिमःसिद्धः नहिसाधयितारमंतरेणार्थानांसाध्यतैवस्यात् सचस्वतःसिद्धःप्रकाशात्
मापरमेश्वरःशिवएव अतश्चतत्रअयुक्तमेवबौद्धस्यापिप्रमाणस्यपरिकल्पनमित्याह अपह्नोतासा।
धनेवावस्तूनामाद्यमीदृशो यत्तत्रकेप्रमाणानामुपपत्त्युपयोगिता वस्तूनांज्ञातृज्ञानज्ञेयात्मनाना।
माद्यमाद्यसिद्धत्वात् ईदृशोपरप्रमातृरूपं तत्रेतिप्रादिसिद्धप्रमातरिप्रमेयंखलप्रमिएवत् प्रमाणम् २२

अतः प्रमेये च विभिन्नप्रकाशाधीनसिद्धिकमिदं ता विसृष्टं च भवति नचैवंरूपत्वे प्रमातर्येव प्रमाणपरिच्छे-
दः स्यात् स ह्यर्थपरिच्छेदो दोषहेतुः प्रकाशरूपत्वात् प्रकाशाद्भिन्नो नापीदं ता विमर्शो ह्यहं प्रत्यवमर्शमय-
त्वात् स च यदि प्रमाणप्रमेयः स्यात् तत्रापि प्रमितिक्रिया यो प्रमाता परेण भाव्यं तत्राप्यन्येनेत्यनवस्थाने
स्यात् तस्मान्नात्र प्रमाणस्य प्रवृत्तौ काचिदुपपत्तिः यस्तु भावनोपदेशाद्योऽसकृद्धि भातो यमात्मा प्रमेया-
दिरियं तथा व्यवहारः मन्वात्मवस्तुतः स्वसाक्षात्प्रतीतेः अहंता व्यवधानेन हि तत्रासौ प्रतीयते इत्या-
त्मा मतः स्वेदप्रवेदवितनिष्पत्ते प्रमाणानुपेयं स्वकृत्वादिसिद्धत्वात्ममनेन च मेव दर्शितः इति पुनर्वितानि-
तः न केवलमत्र युक्तिरेवास्ति यावदागमोऽपीत्याह कामिकेन तदप्युक्तं हेत्वादविविर्जितं तस्य देवा-
तिदेवस्य परापेक्षा न विद्यते परस्य तदपेक्षत्वात् स्वातन्त्र्यात् नसौ मतः स्थितः तत्र इति तत्र प्रमाणनामुपपन्नत्वप-
योगायोगरभावाद्धेतोरत्र समानन्यवादेन वर्जितं अत एवाह तस्य न्यादिपर प्रमाणादेः अत इति परानपेक्षा-
णाद्धेतोः एवमस्य परानपेक्षत्वाद् यथा न प्रमाणानवच्छेदानि तथा प्रमेयान्यपीत्याह अनपेक्षस्य वशि-
नो देशकालाकृतिकमः नियतानेति सर्वव्यापिनित्यो विश्वाकृतिः शिवः वशिन इति स्वतन्त्रस्य विशेषणद्वा-
रेण हेतुः अत्रापि परानपेक्षस्य प्रकाशात्मनः शिवस्य हि देशकालाकारैर्भेदाभेदविकल्पा यहतत्त्वादव-
च्छेदाथानमशक्यमिसक्तं नियतानेति अत एव च सर्वमेव विषयमाह विभुः नित्यो विश्वाकृतिरिति विभुरिति
देशावच्छेदशून्यत्वात् नित्य इति कालावच्छेदविगलनात् विश्वाकृतिरिति चिदचिदाद्याकारवैचि-

श्री·
ने· लो·
२३

23

ऽतो लाभकत्वात् एतदेव प्रपंचयति विभुत्वात्सर्वगो नित्यभावाच्चाप्यनंतवर्त्तिनः विश्वाकृतित्वाच्चिदविभेदे वि
श्वावभासकः अत एवास्यारोपेण नानारूपत्वमुच्यते इत्याह तेनास्य बहुरूपत्वमुक्तं दीक्षान्तराकृते तदेवाभुव ८
नेविग्रहे ज्योतिःस्वशब्देनमंत्रएवच बिंदुनादादिसंभिन्नः षड्विधः शिव उच्यते भुवनेतत्तद्भुवनाधिष्ठेयं भो
गाधारं रूपं विग्रहशब्देनोपचाराद्विग्रहो गोलकः ऽतेनैषां च तद्देवतानादि नानारूपत्वेपि तत्त्वाभिद्धि·
दास्मामेव आदिदेहस्थादीनि कारणान्येवज्योतिर्लिङ्गः कदंबगोलकाकारः स्फुरत्तारकसन्निभ इत्यादिनास्य
ज्योतीरूपत्वेनाभिधानात् खं शून्यं शक्तिव्यापिनी समनालक्षणं शब्दो नादात्मा मंत्रो कारो ऽकारमकारा
त्मा अस्य विशेषणं बिंदुनादादिसंभिन्न इति तदुक्तं बिंदुनादस्तथा व्योम मंत्रे चैव भुवनविग्रहे षड्भुस्त्वात्मा·
शिवो ध्येयः फलभेदेन साधकैरिति तथा उन्मनान्तपरोभावः स्थूलस्तस्मात्परो मतः पुनः स्थूलं .....
संस्पर्शं चततः परं शब्दो ज्योतिस्तथा मंत्रः कारणाभुवनानि चेति तथा व्योमविग्रहवित्स्वर्णभुवनाधिवि·
भेदतः लक्ष्यभेदः स्मृतः षोढेति अत्र च यो यत्राभिलषेद्योगान्मंत्रतत्त्वैव नियोजितः सिद्धिभागिति न्याये
यस्य यत्र तन्निष्ठानस्य तत्प्राप्तिर्भवतीत्याह येयदात्मकतानिष्ठास्तद्भावं संप्रपद्यते व्योमादिशब्दविज्ञा
नात्परो मोक्षो न संशयः यः साधकः यस्य भुवनादेरात्मकतायां तद्रूपकतायां निष्ठितः स तद्भावेन तत्त
द्भुवनादिरूपत्वेन नियतां सिद्धिमेतीत्यर्थः तदुक्तं भुवनं चिंतयेद्यस्तु वसमानेकरूपकं भुवनेशात्तमा
प्नोत्यपक्रमस्य ब्रह्मादिकारणानां तुविग्रहे स्मरेत् पूर्वोक्तलक्षणं यस्तु तन्मयत्वमवाप्नुयात् मंत्रेष्वमेव· २२

सिद्धिस्तज्जपहोमार्चनाद्भवेत् समनाध्यानयोगेन योगी सर्वत्रतां व्रजेत् इत्येषां व्योम्नामपि शिवात्मकत्वा
च्छिवे ध्यातात्तन्मयत्वमित्युक्तेः शिवैकमयत्वेकात्म्यप्रवेशोपि शिवात्मकस्वस्वरूपलाभो भवेदित्याह व्यो
मादिशब्दविज्ञानादित्यादि व्योमादीनां मेघांबुमांसशब्दानां शब्दनं शब्दः परो विमर्शः तदात्मकतया यद्वि
ज्ञानं प्रवृत्तं भवेत्तस्मात् परः विमर्शैकसारशिवैकात्म्यापत्तिलक्षणो मोक्षो निःसंशयं भवेदिति वाक्यार्थः
व्योमादिषट्केति पाठे तु व्योमादेः षट्कस्य विशिष्टादनवच्छिन्नादिति व्याख्येयं न चात्र भुवनादीनाम
ष्टकमेव विवक्षितं नत्वितीह व्योमादीति प्रयुक्तं ननु यद्यये विश्वाकृतित्वं कथमस्य षड्ध्वमयत्वमेवोक्तमित्या
शंक्याह विश्वाकृतिनित्येवमनेनत्र्योपलक्षणं अनवच्छिन्नतारूपावच्छेदलयैव च उपलक्षणमे
व भवति अनेनैव निखिलविश्वसंग्रहसिद्धेः न केवलमेतद्विश्वाकारतायामेवोपलक्षणं यावदशा
पीत्याह अनवच्छिन्नतारूपाविन्यादि अवच्छेदयेदिति अवच्छेदानां संकोचयायिनो भुवनादीनां लयैवि
श्वोत्तीर्णतायामित्यर्थः विश्वमयत्वेप्यस्य स्वस्वरूपान्नप्रच्याव इत्याशयः ननु एवमुभयथाप्यस्य नियता
त्मकत्वावगमादैक्षेदपर्यवोक्तो भवेदित्याशंक्योक्तम् अनवच्छिन्नतारूपोऽस्तीति अस्यहि विश्वमयत्वेपि
विश्वोत्तीर्णत्वादनवच्छिन्नतायामेव प्ररोहो भवेत् एकप्य हि स्वतंत्रबोधात्मत्वात्तथाप्रस्फुरेदिति ननु
कथमेकदैवैकस्य विश्वमयत्वेपि विश्वोत्तीर्णत्वे संगच्छेते इत्याशंक्याशास्त्रार्थमात्रमेव संवादयति उक्तंच
कामिके देवाः सर्वाकृतिनिराकृतिः जलदर्पणवत्तेन सर्वं व्याप्तं चराचरं दर्पणायंतः प्रतिबिंबितं यथा

तं.लो.
२५

25

दिपयादर्पणाद्व्यतिरेकेणाप्रकाशमानमपि दर्पणाद्यनतिरिक्तमेव यथा यादर्पणहृदयोरन्योन्यं वैविक्त्ये
नभानं स्यात् तथा प्रकाशात्मना शिवेनापि स्थावरजंगमात्मकमिदं विश्वं स्वेच्छया स्वरूपानतिरिक्ततयामा
नितं तावसितं सद्भासं प्रकाशमानत्वान्यथा नुपपमास्वरूपानतिरिक्तत्वेनैव स्वीकारीकृतं अत एवायं विश्व
मयत्वेपि विश्वोत्तीर्णस्तदुत्तीर्णत्वेपि तन्मय इत्युभयथापि न कश्चिद्दोषः अत एवोक्तं सर्वाकृतिर्निराकृति
रिति सर्वाकृतिर्विश्वमयः निराकृतिर्विश्वोत्तीर्ण आत्मत्वात् ततत्वेपि तदुत्तीर्ण इति च तदेवमयमेकए
व प्रकाशात्मा परमेश्वरः सर्वं जृंभते इतीश्वराद्वयमेव परमार्थतः ननु भवान्नोन्तदर्पणदृष्टया पृथक्प्रका
शानुपपत्तेर्मा नानात्मनस्तद्व्यतिरेकेण सत्तामाभूदिति भावापेक्षया प्रकाशात्मक एक एवेश्वर इमौत्ता
वेदं तत् यत्पुनर्विभुत्वादिधर्मजातं तस्योक्तं तदपेक्षया धर्मधर्मिणोः धर्माणां च परस्परं भेदस्यानपह्न
वनीयत्वाद्धयो भेदउल्लासितः स कथं वार्यते येनैक एवेश्वर इत्यद्वयवादनिर्वाहः स्यादित्याशंक्याह यद्भा
चास्य विभुता धीयं धर्मोन्योन्यं विभिद्यते न च विभुताद्योयं धर्मः स्वरूपादिक्तस्तदिति शाखकाः कश्चि
द्धर्मोपि तत्स्वरूपमेवैतत् विश्वतद्व्यापकमुच्यते तत्र स्वरूपातिरिक्ते व्यापि स्तत्स्यात् नच यत्प्रका
शमपेक्ष्यादिगादि किंचित्संभवेदिति किं नाम व्याप्नुयात् नित्यत्वमस्य नापि धर्मस्त्रस्य कालत्रया
नुगामित्वादस्य चाकालकलितत्वात् यदभिप्रायेणैव सकलाविभावोपमात्मेत्याधुक्तं एवं विश्वाकृ
तित्वमपि न ह्येतदपेक्षया विश्वं नाम किंचिदस्ति यदाकारत्वमस्य स्यात् एवमेवापरकाशापेक्षया २५

कथं विच्छेदायोगात्मावस्यविकोपि भेदो नास्तीत्युक्तं नचास्यान्यं भिद्यते इति ननु यद्येवं तत्कथमस्य विभुत्वनि
त्यत्वविश्वाकृतित्वादिर्धर्मभेद उक्त इत्याशंक्याह एक एव स्वधर्मोसौ सर्वात्मा येन वर्त्तते तेन स्वातंत्र्यश
क्त्यैव युक्त इत्यंजसासौ विभुः अस्य खल्वेक एवासावहं प्रत्यवमर्शात्मा हि स्वभावभूतो धर्मोस्ति यः सर्व
विभुत्वादिधर्मजातस्यास्पदं अयमर्थः अयं हि नाम प्रकाशस्य विमर्श उच्यते यदयं स्वस्य परस्य
वा प्रकाशने परं नापेक्षते इति अत एवास्य स्वातंत्र्यरूपं तद्देशकालाद्यवभासमसहत्वोल्लासस्सामर्थ्यं
स्याद्येनास्य सत्तस्समुल्लासितेपि संकुचितः प्रमातृवर्गः स्वापेक्षया व्यापकत्वनित्यत्वाद्यभिव्यवहरेत् वस्तु
तः पुनरहंप्रत्यवमर्शात्मा स्वातंत्र्यशक्तिरेवास्ति येन स्वातंत्र्यमेतन्मुख्यं तदैश्वर्यं परमात्मन इत्या
युक्तम् अत एवाह तेनेत्यादि ननु सर्वत्रैवास्य इच्छाद्यनंतशक्तियोगित्वमुक्तमिति तत्कथमिहैकैव
स्वातंत्र्याख्या शक्तियोग उच्यते इत्याशंक्याह बहुशक्तित्वमप्यस्य तच्छक्त्यैवावियुक्तता स्वातंत्र्य
शक्तिरेव हि तत्तदीक्षणाद्युपाधिवशान्नानात्वेन व्यवह्रियते इति तच्छक्तियोगित्वेनास्यानंतशक्तित्व
या सा शक्तिर्जगद्धातुः कथिता समवायिनी इच्छात्वं तस्य सा देवि सिसृक्षोः प्रतिपद्यते एकापि सत्य
नेकत्वं यथा गच्छति तच्छृणु इत्याद्युपक्रम्य एवमेषा द्विरूपापि पुनर्भेदैरनेकतां अर्थोपाधिवशाद्याति
चिंतामणिरिवेश्वरीति नन्वेवमपीश्वराद्वयवादेन निर्दिष्टस्तदतिरिक्तायाः स्वातंत्र्यशक्तेरपि भिदा
नादित्याशंक्याह शक्तिस्वनामभवस्य स्वरूपमात्रं कल्प्यते तेनाह यः स एवापि शक्तिमत्परिकल्पने य

श्री॰
नं॰ लो॰
२५

तो भावस्य यस्य कस्य चन सतः पदार्थस्य स्वमेव रूपं फलभेदाद्भेदारोपेण शक्तिरिति प्रमातृभिः परिकल्प्य
ते न तु सैव वस्तुतः पदार्थान्तरं किंचित् अतः शक्तिशक्तिमत्परिकल्पनेपि क्रियमाणे स एवाद्वयमयो
विभुः न कदाचिद्द्वयात्वेङ्गेनेति यावत् तदर्थं फलभेदारोपितभेदः पदार्थात्मा शक्तिरिति नन्वेव
मस्तु यत्र शक्तिशक्तिमतोर्भेद इति शक्तीनां पुनः परस्परमेव भेद एवेति पुनः स दोषस्तदवस्थ एवेत्या
शंक्याह मातृज्ञभेदिदेवस्य न च तत्र च पृथ्वले कोभेदो वस्तुतो वह्नेर्दाहपाकादयोरिव यथा वह्ने
र्दाहपाकादिफलभेदाद्दाहिका पाचिका च शक्तिर्भेदेन कल्पितापि वस्तुतः शक्तिमदेकस्वभावत्वा
त्परस्परस्य स्वरूपं भेत्तुमलं पृथक्किं हि वस्तुत्वेनैतरं भिन्नान्निजशक्तिः शक्तिमदतिरेकेण पृथक्कि
द्विवास्तीति किं केन भेद्यं वह्नेर्वा हि दाहादिसमर्थस्वरूपं तथा कल्पितं एवं परमेश्वरस्य परिकल्पिते
पि शक्तीनां आनंत्येन कश्चिद्भेदः इति न कदाचिदीश्वराद्वयवहतिः नन्वेवं परिकल्पितोपि शक्तीनां भे
द एवभासते इति कथमपह्नवः इत्याशंक्याह न वा सो पारमार्थेन न किंचिद्वासना हते न ह्यस्ति किं
चित्क्वचित्तत्र भेदोपि वास्तवः भानमेतत्केवलं यत्किंचिन्नास्तीत्यसौ भेदोपि भासमानतामृते।
न किंचिदपि तु परमार्थसत्त्वेति शक्तीनां तद्गतश्च भेदोपि पारमार्थिक एवेति वाक्यार्थः एवं भेदा
स्य भानेकस्वभावत्वान्न तत्त्वातिरेकः इति नाद्वयवादक्षतिः नापि शक्तीनां तत्तत्स्वभेदेन स्थितत्वस्य
व्यवहारस्यापह्नव इति सर्वस्वस्य ननु परमेश्वरस्यानन्तात्माशक्तिरेकैनास्तीत्युक्तं इच्छादयस्तु

25

किंतर्हि स्फुर्जितमात्रस्वतन्त्रस्वतंत्रात्मनिशान्तं तत्रापीत्याशंक्याह स्वशक्त्येकजननकं तादात्म्यादस्तेनो।
द्रियत शक्तिस्तदपि देवैवं भान्यमानास्वरूपिणी यन्नाममेयंवां तत्र शक्तिरेव चिद्रूपवस्त्वादेः वस्तुनः स्व
स्याः शक्तेरितिव्यपदेशप्रवृत्तिनिमित्तभूतायाः निर्विशेषक्रियामात्रनिष्ठायाः सामर्थ्यलक्षणा।
याः शक्तेः कटेकोदाहरणकादिविशेषरूपशान्तं तत्रात्मतयोल्लसनेन तत्प्रजनकमवभासकं तत्तदा।
पितादात्म्यादेवं विषयस्वशक्तेरैककरूपत्वाद्यथा कटरूपास्वैव शक्तिरिति संबंधः समर्थोहि वह्निः स
वेदाहादिकार्यजातं कुर्यादित्यभिप्रायः एवं परमेश्वरस्यापीच्छाद्यवान्तरशक्तिरूपतयावभास
मानापि शक्तिर्देवी तत्तदिच्छादौल्लासेपि परप्रकाशाभिन्नस्वभावतयावभासमानावभासात्स्वात्तंत्र्याख्यैव
तिगुणत्वं एकएवास्यधर्मोसौ सर्वार्थेष्वपेणावर्ततेइति एवमेकैवास्य स्वातंत्र्याख्या शक्तिस्त।
यातथास्पष्टेन भेदेन भायादिति सिद्धं न केवलं शक्तिरेवास्य वै कल्पितेन भेदेनावभासेत याव।
त्स्वयमपीत्याह शिवश्चालमपि भेदेन तथा स्पष्टावभासते स्वसंविन्मात्रमकरो स्वातंत्र्यात्भाव
नादिषु शिवश्चैवासंविन्मासंविल्लक्षणं यस्यासौ बुद्ध्यादेरग्राहीतान्मग्रहः परिनिष्ठितप्रमाता
सएव स्वच्छस्वात्मभित्तिबिंबसदृक्त्वेन मकरस्तस्मिन् भावनोपदेशादौ बोवान्तरप्राप्तयाभाव्यमा।
नत्वाद्वितीयाकल्पितेन भेदेन स्पष्टः प्रमेयतामापादितएवावभासेत नैव मथ्यसो प्रमातैकरूप
तान्तरयाभवतीत्युक्रममविलम्बविभवइति अपरिग्रहीतप्रमातृभावइत्यर्थः तदुक्तं स्वातंत्र्यादस्व

श्री· ते· लो· २९

यात्मानेस्वातंत्र्याज्ञानादिषु प्रभुरीशादिसंकल्पैर्निर्मायव्यवहारयेदिति एतदेवोपसंहरति तस्मा
द्येनमुक्तिविधेयभासनेशेणापितस्तथा शाक्तिरित्येषवैलेवशाक्तिनहस्तक्रमःस्फुटः तस्मादुभयोरपिशि
वशक्त्योस्तत्पस्फुटेनभेदेनावभासमानोपयोर्न्हेतोरपिशिवः प्रकाशमात्ररूपह्लादनेशेणापियेन
भुवनाद्यन्यतमांपालक्षणेनमुखेनभावनादौभासतेतेनक्रांतवेशोवीमुखमिहोच्यते इत्याद्युक्त्यात
याशिवप्राप्त्युपायत्वयाशक्तिरेवनेयितद्वारासादाद्रुपायोंतरमप्युपपद्यतेवा अतश्चशाक्तिशा
क्तिमतोरुपायोपेयभावात्माक्रमः सम्यगेवस्फुटः नकश्चिदत्रसंशयः इत्यर्थः अतश्चानयोरुपा
यायोपेयभावस्तत्रतत्रागमेषूद्घोषितइत्याह श्रीमत्किरणशास्त्रेवनत्प्रश्नेनात्मपूर्वके अत्रभावोपि
कल्पोपिमानसोनमनःशिवे प्रविशत्यशिवंदीक्षाकथमित्यत्रचोत्तरं उदितिशिवागमेशाक्तिरुपा
यत्वमुक्तमितिवाक्यशेषः एतदेवचप्राह्यार्थरूपत्वेनशास्त्रस्यैवविवेचनप्रष्टेतरकण्ठारेणदर्शयति
प्रश्नभवइत्यादिनातत्रगरुडेन शिवतत्वंकथंस्पृष्टंतत्कृत्यंनाक्षगोचरः प्रत्यक्षंचात्रविज्ञानंतदती
तेनकिंचनेति प्रत्यक्षागोचरत्वात् शिवतत्वेनकिंचिदितिदृष्टे मायाहेयाशिवोग्राह्योग्राहकःपु
रुषःस्मृतः मायाधर्मैःशिवःसूत्रइत्यादिनाअतींद्रियंचवस्तुतत्राप्यनुभवेत्किं प्रश्नभवामनो
यत्नःप्रसिद्धःस्वस्वात्स्वाद्धिसंयतेशिवतत्वस्यपरोक्षेइंद्रियाप्रत्यक्षेपिमानसप्रत्यक्षविषयत्वात्किंचिदे।
नप्रतिसमाहितेतत्प्रश्नपुनरासुर्यगारुडेन प्रश्नभेदोविकल्पार्थोविकल्पोमानसःसच समनस्के २९

वत्तेयसमनस्कंसत्त्वपकं अतएवादेशिकमत्रकण्ठदीक्षांकरोत्यसौ ज्ञेयःसर्वात्मनैवार्थःसङ्केयेनैव।
सर्वथेत्यादिनाऽष्टमम् एतत्सप्रतार्थपवग्रंथकृतामेतद्विकीर्षयास्ववचसैवनिबद्धः तत्रायमर्थः य।
त्नामेन भक्ष्यादिन्यायेन शिवस्यमानसप्रत्यक्षादिविषयत्वमुक्तं तत्रमानसोनुभवः संकल्पकमत्रमनश्च।
त्तिनीत्यासंकल्पात्मकत्वाद्धिकल्पः तस्यचार्थासंस्पर्शित्वेद्रूपमितिमनस्तावछिवेनप्रमाणेयत्रचन
प्रमाणेप्रवर्ततेतेनतत्रातेभवेदित्यत्रेपिशिवत्वेकण्ठदीक्षास्यात् देशिकाद्धिपरंतत्वेत्तावातत्रदी
क्षयादीक्षयोजयेत् अतएवगुरोज्ञानेश्वराद्युक्तं इतिशाङ्कः प्रश्नसमासौ अत्रैतिगरुडोक्तं उत्तरमिति
भवाबद्धं प्रतिसमाधाने तदेवाहतत्त्वथायत्रभवेनैवविकल्पानहिमानसः नशाङ्कोभिन्नक्रमः तेन
प्रश्नानिषेधविषयत्वेनयोज्यः नायंप्रश्नइतिहिशब्दहेतौ यतोत्रभक्ष्यादीनांविकल्पात्मकएवमान
सोनुभवोनभवतीत्यर्थः मानसाद्धिप्रत्यक्षविकल्पकमानसप्रत्यक्षविषयत्वमप्यस्तिप्रत्यघातत्स्वभा
विनः तुभतेयमितिविकल्पस्योदयोनस्यात् सविकल्पकमानसप्रत्यक्षविषयत्वेप्यास्तानकश्चिद्दोषः
तस्यवस्त्वाश्रयत्वेनप्रमाणत्वाभ्युपगमात् एवंशिवोपिमानसगोचरोभवत्येव किंतुशक्तिद्वारेण।
तिविशेषः यदुक्तं तत्रैवोत्तरग्रंथे तथायत्रभवोयत्रविकल्पोमानसः। तत्कथं। मूलपाकिलयंगतः त
त्वतस्त्वसविशिष्टस्तैनासौविनवर्जितः ज्ञानेचोर्वेद्रियार्थेषाकर्मणार्त्मामनःक्रिया शिवःसाध्ये
त्रमेतद्धाविभूत्पोकथमंतइति यत्तस्यमूत्पत्वमुक्तंमयापदेपावरेणतद्धर्मैःपरिणामित्वादिभिःशू।

श्री. तं. लो. २७

27

मत्वात् सूत्रमित्युक्तं अस्यापि तथात्वं तदिति अत्र शिवे शक्तिद्वारेण ज्ञातावादेशिकत्वत्रदीतयादीयं योग्
जयतीति तिन काचिन्तेति: ननु सर्वात्मनो ज्ञातो ज्ञातो भवति न त्वेकेन विकल्पस्य सर्वात्मनार्थत्वात् नेन श
क्तोति नियताभिनिवेशित्वात् तस्य अत एन शिवः शक्तिद्वारेण विषयीकृतोपि सर्वात्मना तज्ज्ञो स्वरीभा
वात् ज्ञात इति प्रश्नशेषमाशंक्याह एतावता न व्यस्तत्वेपि तद्रूपादेव यथा तत्के विकल्पे त्रितत्त्वम्वतना
नादबिन्द्वादिना शिवे विकल्पोत्र निर्विकल्पक एष भावी ग्राह्यः तेन सः तत्त्वरूपपरमार्थात्मकमपि तद्
पायात्मनैव स्फुरति न रक्ताद्यात्मनापि नियतत्वात् स्फुरणस्य नहि सर्वात्मत्वेनाग्रहीतत्वात् दग्र
हीत एवासाविति वक्तुं युज्यते अनुभवविरोधात् तद्वन्नादबिन्द्वाद्यात्मकशक्तिद्वारेण शिवोपि ज्ञा
त एव भवतीति सिद्धान्तः तदुक्तं तत्रैव प्रत्यक्षेण यथा देहो रूपमात्रादि दृश्यते एवमादेयो ग्रहीतानोत
थेशे ज्ञानशक्तितः गृह्यते तत्स्वभावेन स्वस्वभावविवर्जनात् इति तथा बिन्द्वादेस्तथा शक्तिः स्वरूपे
परिकल्पिता: चेतसः स्थितिहेत्वर्थं पुनर्नित्यं स्थिरं भवेत् अतीन्द्रियः स्वस्वरूपनान्तस्तः शक्तिः सततं
तः ज्ञानशक्तिर्मता सापि तज्ज्ञानाज्ज्ञात एव सः एवं शक्तिरेव परतत्त्वाधिगमे परमुपाय इति सिद्धं सा च
भुवनादिरूपतया अनन्तप्रकारेत्युक्तप्रायम् एवं यत्किंचन जडाजडात्मकविश्वं वैचित्र्यं यश्च उद्दिष्टं येस्तु
स्थादिज्ञाग्रदवस्थादित्वात्तत्सर्वं परमेश्वरस्य शक्तिस्फार एवेत्याह बहुशक्तित्वमस्योक्तं शिवस्य च
देतो महान् कलातत्त्वपुरार्णवपदादिभेदविस्तरः सृष्टिस्थितिरोधानसंहारानुग्रहादि च उक्ता। २७

मित्यपि देशात्मवस्तुशक्तिमत्त्वं मितं जाग्रत्स्वप्नसुषुप्तमात्यन्तदतीतानि पान्यपि नान्यच्च तु यत्र नाथस्याः
स्यात्तच्चलहरीभरः महामेघेषामेघेषामेघः शिवपुराणमाः सकलाकलयोनिशिवस्यैव विभूतयः
पदादीत्यादिशाहेन भूतभावग्रहणं सृष्टिस्थितिसंनेनेन क्रमभेद उक्तः तुर्यमित्यस्य शाहवाच्य स्व
ष्पादीनामेतर्वर्ति पूर्णरूपं यनेनेन वत्तुष्टयस्यापास्तु त्वेणकृते तेन स्थितो संहारेति रोधानानुग्रहयो
रंतर्भावकार्येयेनैतत्स्यात् अन्यत्तर्येजाग्रत्स्वप्नमनेनावस्थाभेद उक्तः सकलाविति विज्ञानाक
लप्रलयाकलौ अनेन प्रमातृभेदः तदेवं वैविध्यभाक्तः षट्त्रिंशत्तत्वात्मकस्य जगतः चिदानंदैक
घनः परमार्थः शिवपदवाच्य प्राणकतयावर्तते इत्याह उक्तग्रामस्य सर्वस्य धर्मः स्यादनपायवान्
आत्मैव हि स्वभावात्मेत्युक्तं श्रीत्रिशिरोमते द्विविधो हि धर्मः पदार्थस्य प्राणप्रदो विशेषाधान
हेतुश्च आद्यो यथा सामान्येन द्विगोत्वमंतरेण गोः गौरेव भवति द्वितीयो गुणः शुक्लादिर्लब्ध
मन्नाकेवलं विशिनष्टि एवमिहात्मैव तत्त्वसमूहस्य प्राणप्रदत्वात्स्वभावभूतो धर्मः अनपायवान्
पायवान्निरपायियुक्त इत्युक्तं हि शाह्यो देतीनत्वं किंप्रमाणमित्याशंक्योक्तं त्रिशिरोमते इति तत्र प्र
मेव ग्रंथं शास्त्रस्य शाहार्थरूपतया द्वैविध्येन प्रहेतेरुभयथाप्याह लिंगस्थसर्वदेहस्थस्वभावस्य
स्वसत्त्वं सम्यग्रहैवत्तनानेत्यामथाहेन कीर्तितं सम्यग्रूपवसाम्ययोग्यामशद्धो हि सत्त्वं हार्थेह
तिः कवलीकृतनिःशेषतत्त्वग्रामस्वरूपकमिति आदिग्रथयोगादर्शनात् तन्मध्यमवेत्र वाचे देहे तोतः

श्री॰
तं॰लो॰
२८

28

साधकमात्रसाधारणतयाहि विशेषेण वर्तमानमित्यर्थः अत एव स्वभावे स्थावरजंगमाद्यात्मनि नियते रूपे स्थि-
ते एवमपि हृदि बोधे स्थितं तं तदैकात्म्येन परिस्फुरदिति यावत् अत एव स्वस्वात्मं परिक्षेपेण च ग्रामस्य
बाह्येन संकुचितग्रामधर्मोचित एव इत्याह ग्रामैव धर्मः स्वकः शिवात्मतया स्थितः परानंदचमत्का-
रमय इत्याह प्रकाशावस्थितं ज्ञानं भावाभावादिमध्यतः स्वस्थाने वर्तनं ज्ञेयं दृष्टं विगताहृति वि-
विक्तं वस्तु कथितं शुद्धविज्ञाननिर्मलः ग्रामधर्महतनिष्कलस्य सर्वं प्रसिद्ध्यति आदिशब्दाद्भावोऽपि
तेन भावाभावयोः भावयोर्वा यन्मध्यमो न तालेन तदवलम्ब्य प्रकाशे स्वात्मन्येव न पुनर्भावादिस्वरूप एव
स्थितं यज्ज्ञानं तत्स्वस्य स्वात्मनः स्थाने स्थितौ वर्तनं ज्ञेयं ग्रामधर्मविषये वृत्तिः ज्ञातव्येत्यर्थः इदमत्रता-
त्पर्यं भावान्तरस्य भावाभावयोर्वा प्रतीतिकाले मध्ये तद्वृत्त्यावच्छेदे दृष्टे शून्यमुपलभ्य तद्भावाभावा-
दिपरामर्शकाले तद्वैव सावधानस्य परमे शिवामृतपरिपूर्णे परमात्मनि वृत्तिर्जायते इति तदुक्तं उभ-
योर्भावयोर्ज्ञाने ध्यात्वा मध्यं समाश्रयेत् युगपच्च द्वयं त्यक्त्वा मध्ये तत्त्वं प्रकाशते भावे त्यक्ते निरुद्धा
चिन्नैव भावान्तरं व्रजेत् तदा तन्मध्यभावेन विकसत्यतिभावनेति ज्ञेयमिति काकाक्षिन्यायेन योज्यं
तेन वर्तनमपि परमार्थसाक्षात्काररूपं दृष्टं ज्ञेयं तच्च विगताहृति विगता विहृता भावाभावाया
त्मकबाह्यरूपा ग्राहृतिर्यस्य तत् बाह्यदेशाद्यवच्छेदशून्यमिति यावत् अथ च विगता परमात्मना
कालेन रहिता कलनात्मिका हृतिर्यस्य तत् अकालकलितमित्यर्थः तदुक्तं अपराधोऽशेषा यावत्का २८

लःसमादशःपरः परात्परस्तु यत्कालः सप्तविंशाद्दशः प्रभुः प्राणपक्षे विथा कालं कृत्वा चैव प्रजेत्तुनीरि
ति तथा विगतापदैकादशाकात्मिकाष्टत्रिंशत्स्य तत्त्व तत्त्वमिति नियतनतत्त्वकुलायाकारेङ्गितमितिया
वत् यदुक्तं पदैकादशिका साच प्राणे चरति नित्यशः अकार उकार मकारो विन्दुरेव च अर्धचन्द्रो
निरोधी च नादो नादान्त एव च शक्तिश्च व्यापिनी चैव समनैकादशी स्मृतेति अत एव चोन्मनाभिन्नप्र
मात्ररूपं परमार्थसाक्षात्कारलक्षणमेतद्भवतीति पिण्डार्थः तदुक्तं तन्मनातत्तत्त्वनोतीतानदृतीतं नि
रामयमिति अत एव तत्तद्देशकालाकारैर्विविक्तमवच्छेदशून्यं यदस्तु परं महामनात्मपरे तत्तत्तव क
थितं सर्वागमेषु विधानेनोक्तं यक्तुदं परा हं मर्शमयं विज्ञानेतेन निर्मलः तदेकात्म्यापत्त्या विलीकृ
तनिखिलभेदो ग्रामधर्मवृत्तिर्भैरवाङ्ग्रे वी प्राप्नोति इत्याद्युक्तेः अस्य कुलभिरणुक्तश्च इति श्रीकेदारेयमु
क्तिः तदुक्तं तत्र चतुर्थं संप्रवक्ष्यामि ग्रामधर्मविभेदतः इत्याद्युपक्रम्य हरिस्थं सर्वदेहस्थं स्वभावस्थ
मुत्त्वालके साम्यं सर्वतत्त्वानां ग्रामशब्देन कीर्तितं आत्मवैषम्य इत्येको ग्रामधर्मः प्रकीर्तितः प्र
काशावस्थितं ज्ञानं भावाभावादिमध्यतः स्वस्थानेवर्तनं ज्ञेयं वर्तनं वृत्तिरुच्यते वृत्तिस्तत्स्वपदे ज्ञा
नादृष्टं यदि पश्यति प्रवृद्धं तद्विजानीयाद्ध्यानावरणवर्जितं परापरविनिर्मुक्तमेकादशपदोज्झितं
स्वात्मन्यात्मनियत्नानं शिवामृतपरिप्लुतं विविक्तं वस्तु कथितं शुद्धविज्ञाननिर्मलः ग्रामधर्मवृत्ति
रात्मस्तत्रैतस्मिन् सर्वधीदित इति एतदेव च अथवा शिवमन्वेष्टं साधकः परतत्त्ववित् इत्यादि स्थितिः

श्री
तं.लो.
२५

29

कार्यापरत्वं तस्यामध्यशक्तिप्रभान्वितइत्येतत्तत्वत्रयं ग्रंथार्थगर्भीकारेणग्रंथांतरमुपदिशन् कामोग्रंथकार
स्वात्मायेजयति तस्यसर्वप्रसिद्धत्वादिति तस्यग्रामधर्मप्रवृत्तेः प्राणापानगतित्रोटनेनमध्यमात्रप्रवेशा
त्वामपरशक्तिसामरस्यसर्वबाह्यमायेत्तेवचप्रकर्षेण शिवाभेदमयत्वेन सिद्धत्वादित्यर्थः तदु
क्तं शिवभावनयोचध्यावद्धेमनसिसंस्मृतेः काष्ठकुड्यादिवृत्तिमिवसर्वाश्चिवदेमतत्तिप्रतत्वाह ऊर्ध्वस्य
कार्थेविशेत्तारामस्येमध्यदेशगाः ऊर्ध्वमितिऊर्ध्ववाहित्वात्प्राणंप्रथइति अधोवाहित्वादपानंस्यके
तित्तक्रतित्रोटयित्वामः ग्रामधर्मवृत्तिरर्थात् मध्यनाडीप्रविशेत्स च कीदृशः मध्यदेशगः मध्यनाडि
कायाअपि यन्मध्यंतत्रस्थायाविसमन्त्रकावाशक्तिस्तस्यादेशेनतत्त्वमत्रूपप्रकाशस्तगच्छतिज्ञाना
त्मिका मतदेकत्वाननयाउत्तिष्ठतियावत् तदुक्तं मध्यनाडीमध्यसंस्थविसमन्त्राभरूपया ध्यातांतर्व्यो
मयादेव्यातयादेवः प्रकाशतेइतिप्रतपवोक्तंरामस्यइति एकाकीनरमाम्यदमितपात्मत्वारमतेतज
ज्ञात्मनाविश्ववैचित्र्यात्मनाक्रीडतीतिरामः परमात्मतत्वमिति इतितत्त्रूपतयापरिस्फुरतीत्यर्थः तदुक्तं
त्रिशिरोभैरवेः सेव्यमानमथोर्ध्वंतुप्राणापानोर्ध्वरूपधीः ऊर्ध्वस्यकान्तप्रविशेद्रामसंस्थोतपवव त
त्रैवागच्छत्येनभवावत्यारामः किमुच्यते देवयोकप्रभोतस्याभ्यासः कथंनामसर्वमिदंसर्वमहंसर्वेतिए
पभावतः रामस्यपरमेशानियोगोयकीर्तितमया कथयामितथातथ्यमभ्यासस्तस्ययोगात्मने
नप्रतिष्ठायातत्समाधानंबकुलाग्रंथेनकृतंमिदंचग्रंथकारस्तदेवशास्त्रार्थद्वारेणपठति यतिः॥ २५

ध्यानेस्वप्नजाग्रदुन्मीलननिमीलने बुद्धिभेदास्तथाभावाः संज्ञाकर्माण्यनेकशः एवरामो व्यापको विभि
वेः परमकारणं स्वप्नः विकल्पः जाग्रत् ज्ञाने उन्मीलनमीश्वरदशा निमीलने सदाशिवदशा आयामः
अयगतोवासर्थः ज्ञानार्थः तेनायः अयनेज्ञायनेनसामः सेपिनिहन्निरत्तानमित्यर्थः धर्माध्याअहैः
बुद्धिधर्माः संज्ञायाहृष्टिकादि ···· देयः कर्माणि व्यापारः अनेनगमनादिना चतुर्दशकेनसकलः
विश्वस्वीकारः कृतः यथैतत्कृत्यादि एवरामः सकलविश्वावभासनक्रीडापरः परमात्मा परमेश्वरः अ
तएवोक्तव्यापकोविभुः परमकारणमिति अवेतिगतासु उपलक्षितेविश्वस्मिन् शिवस्यैवसंयम।
शेषविश्वात्मास्फारइतिभावः तदुक्तं विषयेषु सर्वेषु इन्द्रियार्थेषु च स्थितः यत्र यत्र निरूप्येत नाशिवं
विद्यतेक्वचित् इति कथं वा तत्र तदेकात्म्यलक्षणा स्थितिर्भवतीत्याह कल्पक्षीणमनसा स्मृतिमा
त्रनिरोधनात् ध्यायेतपरमेध्येयं गमागमपदे स्थिते परंशिवंतत्रजायते भैरवाख्यंतत्पादपि येनतत्क्षी
णकल्पंयतन्नेद्रदावभासकालुष्ययस्यतादृशेमनोऽत्र इतिविमर्शात्मावबोधेयस्य तेनसर्वो विक
कल्पः स्मृतिरिति नीत्या स्मृतिरेवकेवला स्मृतिमात्रं शरीरस्थएवहस्ताद्यात्मके विकल्पेनेतस्य नि
रोधनं आकाशादुल्लेखनेन स्फुरत्वेनप्रतिहननं तदवलेपनतन्निघ्नताकारसंकोचाभावात्परमे
ध्येयं शिवलक्षणं परमकारणं ध्यायेत्स्वात्मभेदेन परामृशेत यदुक्तं ध्यानेयानिश्चलचिता निरा
कारा निराश्रया न तु ध्यानं शरीरादिस्थएवहस्तादिकल्पनेति एवंविधो ध्याता रामो रामनंगतिः अ

श्रीतं लो त

30

गमस्थाव्याप्तिः स्थानेताभ्यांमुपलक्षितेपदेसमस्तंतेवेक्षेचतुर्दशविधेग्रामेयेस्थितंतमपवपरिपूर्णमतएवभैर
वाख्येशिवेव्रजति यावज्जपादित्युक्तं जपाद्यपीतिकोसौजपेनात्यत्याशंक्याह तत्स्वरूपोजपःप्रोक्तोभा
वाभावपदच्युतः तस्यशिवस्यस्वपरावाक्स्वभावमात्मरूपमर्थाद्भूयोभूयः परामृश्यमानोजपः अत
एवभावाभावपदच्युतः पूर्वोक्तनीत्याउक्तस्यस्फुरत्तासंवित्परामर्शसारत्वर्थः तदुक्तं भूयोभूयःपरेभा
वेभावनाभाव्यतेहियाजपःसोत्रस्वयंनादोमंत्रात्माजप्यईदृशःइति एवंग्रामधर्मवृत्तिरेवरामस्येत्य
क्तंस्यात् तदुक्तं श्रीत्रिशिरोभैरवे गच्छेल्लिङ्गस्वरूपंतागुञ्जन्निमिषन्निमिषंस्तथा यावन्नेलवनेचैवग्रा
यामःशक्तिवेदने बुद्धिभेदास्तथाभावास्तेत्वाकर्माण्यनेकशः यच्चतुर्दशविधेरामेत्वपरिकीर्तिते
व्यापितेदेवदेवेनशिवेनपरमात्मना सर्वभावोत्तरस्थितश्चानेकाकारलक्षण कल्मषक्षीणमनसास्व
त्तिमात्रनिरोधनात् ध्यायतेपरमंध्येयंगमागमपदेस्थितं परंशिवंतुव्रजतिभैरवाख्यंजपादपि तत्
स्वरूपोजपःप्रोक्तोभावाभावपदच्युतइति नन्वत्रप्रायःसर्वत्रैवध्यानस्यव्यतिरिक्ताकारध्येयविषयत्वं
जपस्यविकल्पात्मकवाचकवाच्यजप्यनिष्ठत्वेचोक्तं इहपुनःस्वात्माभेदेनपरामर्शमात्रमेवाभवा
भयोरूपमित्तिकिमेतदित्याशंक्याह तदत्रापितदीयत्वात्तेनैवोपकल्पितः इहासन्नादिकोभेद
स्थितत्वात्तेनापेक्षया इहाहंपरामर्शमात्रसारत्वात्सत्तेत्रप्रकाशात्मापरमेश्वरएवपरमार्थइतितः
स्यासावुपदेशाभेदेनतदुपकल्पितमेवोपायानांनानात्वंतेनविकासात्तेनप्रधानतयाउल्लसितउपा २

यथा सन्नश्रस्यच्यते अन्यथेति निमिरस्याह हेतीति एवमप्युपेयासन्नतयाकस्यचिद्देवोपायत्वेनाशक्यमुपा
योपेयभावस्य हारहारिभावेन वक्ष्यमाणत्वात् तदेवोपसंहरति एवं स्यात्तेअशृङ्गित्वादनिङ्घेटकायंये
केननामनद्रूपेण भावते परमेश्वरः द्रूपेणेतितत्तत्वशक्त्यात्मनेत्यर्थः अत एवाह निरावरणसाभाति
भाति हृत्तनिजात्मकाः आहृतानाहृते भाति वडुधा भेदसंगमः इति शाक्तीश्चैयंता येस्यात्तेआपरता
मके इच्छादिभिरभिधाभिर्युक्तभिः प्रकटीकृते निरावरणमिति शुद्धप्रकाशमयत्वात् आदतेतिभेद
कालुष्योदयात् आहृतानाहृतेति शुद्धमयथेवपि भेदकालुष्यासंवरणात् अत एवापरापरपरापरत्वेव
डुधेति पश्यणीयत्वादिनात्मत्वादनेकप्रकारमित्यर्थः निरावरणेत्वपि तिषिध्यमानत्वाद्भेदस्यवास्त
मात्रेणावस्थानमिति स्वरूपपरामर्शकः तेनैतदवाभासमाने निरावरणत्वादिपरादिरूपशक्तिव
येगृहभिरेतत्ष्कास्तावतारकैरिच्छादिसंज्ञाभिः परमेश्वरविघतयोन्मीलितमपिस्यात्तेअशक्त्यभिः
यातमेवेति वडुशक्तित्वमप्यस्यतत्क्षेत्रेवाविषुक्तेनति निर्वाहितं वडुशक्तित्वमेव चैतदभियायि
कानां प्रवृत्तिनिमित्तमित्याह देवोदिव्यर्थशास्त्रोक्तैः शब्दैः समुपलक्ष्यते महाभैरवदेवोर्यपतिर्यः
परमः शिवः अन्वर्थैः अनुगतैस्तैस्तैः शास्त्रोक्तैः सामवायिकैः तदेवाह विश्वं बिभर्ति पूरणधारणा
योगेन तेनच स्मियते स्वविमर्शनया रवरूपतत्त्वसंसारभीतहितत्वस्य बिभर्ति धारयति पोषयति चस्वा
त्मभिति संलग्नतेन तद्ब्रह्ममात् तेनेति विश्वेन स्मियतेइति धार्यते पोष्यते चतस्य विश्वमयत्वेनैव सर्वत्र

स्फुरणात् रवरूपत्व इति शब्दनस्वभावात् तेन भरणाद्रवणाच्च भैरव इत्यर्थनिरुक्तः भीरूणामयं हितकृदि-
ति भैरवः भीरुत्वे निमित्तं च संसारस्तेन संसारिणाम भयप्रदश्त्यर्थः भयं भीः संसारत्रासः तया जनितो यो
रवः भगवद्विषय आक्रंदः परामर्शो वा तत्तो जात इति भैरवः तेनाक्रंदवतां परामर्शवतां च हृदि परमा-
र्थभूमौ स्फुरति इति यावत् भवाङ्गये भीस्तस्या रवः विवेचनं विमर्शनं शक्तिपातप्रविलायकारणमिति भै-
रवः संसारवैरस्येऽप्ययमेव निमित्तमिति भावः भानि नक्षत्राणि ईरयति प्रेरयतीति भीरः कालः तस्य तद्व-
त्रुटघात्मकं स्वरूपं तस्य समग्रं निःशेषेण शोषं समभिभवे कुर्वतीति कालं वद्वयतीति भैरवः कालग्रास-
समर्थिद्रूपावधाना योगिनः तेषु यः स्वरूपत्वेन प्रकटः स्फुरति इति भैरवः संकोचितोः भेदप्रथामयस्य
पशुजनस्य भियं तनुते खहावाद्युपजननत्रासा यरवर्णशब्दराशिस्तस्य कादिकलाविमर्शमयो रवः।
यासां ताः स्वकरणदेव्य इन्द्रियशक्तयः तथान्तर्बहिः प्रमातृप्रमेयात्मा चतुर्विधश्च तत्प्रकारः खेचर्या-
दिगणः खेचरी गोचरी दिक्चरी भूचर्यो भीरवास्तासामयं स्वामी भैरवः महाभीम इति भीषणः तेनात्र भैरव।
शब्दः संकेतित इति भावः एतदेवोपसंहरति भैरव इति गुरुभिर्विभैरवत्वर्थैः संस्तुता शास्त्रेषु गुरुभिस्तत्र
छास्त्रावतारकैरेभिः समनन्तरोक्तैरस्यार्थैर्यथागमतैर्वाचकैः संस्तुतापि विचिताः शास्त्रविशेषात्तुपदा-
नात् सर्वत्रैवार्थ इक्तः अस्याभार्थैः सकलजगद्भरणादिसामर्थ्यप्रतिपादनद्वारेण स्तुत इत्यर्थः यदुक्तं
भियासर्वं रवयति सर्वदो व्यापकोऽखिले इति भैरवशब्दस्य सततोच्चारणाच्छिव इति तथा भरणाद्भरतिस्थि। ३१

त्तिरिति ईमैतिनिविंसेगुरुणादितैर्विनित श्लेषः पादः हेयेत्यादिना देवशब्दस्य निर्वचनमाह हेयोपादेयक
थाविरहेणानंदघनेयोच्छलनं स्वस्वातंत्र्यमहाशक्तिवादिनि सततनाशेषविश्वात्मना उल्लासनमेवास्य क्रीडा सर्वो
त्कर्षेण वर्तनेच्छा तथा स्वतंत्रं व्यवहरणमिति भिन्नस्वात्मनि भेदेन संजल्पः क्रीडेति दिव्यति क्रीडतीति
ति देवः नचात्र क्रीडायां तिरिक्तं निमित्तमित्याह हेयेत्यादि नकिंचिदुपादातुं हातुं वा जगत्सर्गादावीश्वरः प्र
वर्तते अत एव स्वानंदघनत्वमेवात्र हेतुरुपात्तः अत एव चास्य स्वतंत्रत्वमेव सर्वोत्कर्षेण वर्तनेच्छा वि
जिगीषुता विजिगीषो हि कथं नाम सर्वानभिभूयाहं वर्तेयेति तादृशीयमेवेच्छा भवति तथा चाहुः सर्वोपेत्यास
मुख्ये तेन दीव्यतीति विजिगीषते इति भावः देवशब्दस्य सर्वस्माद् भिन्नेऽपि स्वात्मनि भेदेनाहमिदं जानामि
मीतियोऽयमस्य संजल्पः तद्व्यवहरणमपारमार्थिकेन रूपेण स्फुरणमित्यर्थः तेन दीव्यति व्यवहरतीति दे
वः यतः सकलमिदं जगत्तत्त्वरूपलाभात् स्मरतीति समस्तेति कर्त्ततायां तदा यत्तत्प्रहृष्टिविषयस्तुतिः सर्वैर्दि
शिवे मंत्रमहेश्वरादयस्तत्परं तत्र हृष्टिनिबर्हणं तया प्रकाशयन्तीति भावः अस्येति कर्मणि षष्ठी तेन दीव्यते
स्तूयते देवः समस्तापूर्णविमर्शलक्षणा च क्रिया प्रकृता यस्यासौ हृत्क्रियाया गुणः शक्तिः यस्यासौ अय
ते यमेवंविधस्ततः अस्य गतिः विशेषानुपादानात् सर्वत्र ज्ञानं प्रसरणं चेति सर्वज्ञः सर्वव्यापकश्चेति सि
द्धं तेन दीव्यति जानाति प्रसरतीति देवः एतद्देवो यन्नेऽहरति इति निर्वचनैः शिवतनुशास्त्रे गुरुभिः स्फुटेनो दे
वः गुरुभिर्विहस्यति पादैः स्फुटम् इति वामो देवः स दीव्यति क्रीडति प्रभुर्यस्मादित्यादिना अविहतगतिः

32

सयस्माद्देवः तस्मात्सदाशिवो गीत इत्यनेन ग्रन्थेन वर्णित इत्यर्थः शासनेत्यादिना पतिशिवशब्दयोर्निर्वचन-
माह शासनरोधनपालनपाचनयोगात्सर्वमनुग्रहवस्तुपकुरुते शासनं शास्त्रोपदेशादिना रोधनं बोधने
रोधनं संसारिणां विलयशक्त्या ज्ञानात्मनात्मनैवावस्थापनं पालनं यथास्थितस्य विश्ववैचित्र्यस्य नियतनियं-
त्रणयात्तथैवस्थापनात्मकं संरक्षणं पाचनं कर्मणां कर्मिणः प्रतिफलदानादौ नाम्नाव्यञ्जनं उक्तं हि
स्वापे ज्ञोथाने थत्याच यत्कर्मिकन्ममायाशक्तीर्वीर्यक्रियोरयः प्रकुर्वन् पश्यन्सर्वं यथावेति .....
हमिति तेनेति रक्षणार्थे वैसाधितोपिकारकेन .... देवेनेत्यर्थः अत एव पाति रक्षतीति पतिः श्रेयो
मयः परस्माद्वयस्वभावत्वात् शिवमिति तेन समं न त्वेवमपि किं विशेषेणयोग्योनेत्याशङ्क्याह ईदृग्रूपं
कियद्यपि मद्देयपिंडादिषु ...... स्फुरयोनानातोनावच्छेदनुदेपरममहत्यद्विशेषणमुपात्तं ईदृगिति
भैरवादिशब्दैष्वन्वर्थतयादर्शितं कियदिति किंचिदेव न तु सर्वं एतद्व्यंशांशिकया सर्वं चैवं भवेदि-
तिभावः अत एवानवच्छेदानसर्वातिशायप्रतिपादनार्थं परममहदित्यदलक्षणं विशेषणमुक्तं न
नु ज्ञाने संस्थितो निमित्ते ज्ञाने च मोहे स्वस्वरूपाख्यातिर्ज्ञानेन तद्याख्यातिश्च ज्ञाने स्वात्मना स्वस्वरूपं
परः प्रकाशः स एव स्वरूपे स्वेच्छया प्रच्छाद्य विश्वरूपतामवभासयेत् एवमपि तद्यथा मे ज्ञं क्रियैवा
पायेयेन स्वरूपाख्यातिर्भवेत् इयदेव ज्ञातव्यं यत्सर्वेषामेव शास्त्राणां प्रतिपाद्यं तस्य ... मिति
एवं वितत्यैवं इत्याशङ्क्याह इति यज्ज्ञेयसतत्त्वं दर्श्यं तेनच्छिवा ... मयासमेविस्तरतर्कपतिशास्त्रविक ३२

क्रमात् इत्थमनेन प्रकारेण ज्ञेयस्य बंधमोक्षादेः शास्त्रान्तरदृष्टत्वात् सतत्वं पारमार्थिकं रूपं प्रदर्श्यते इदं सं
क्षेपेणोक्तं किं तत् तन्मया शिवाज्ञया स्वसंविदाघवलेख्या च दर्श्यते विस्तरेणोच्यते इत्यर्थः शिवोऽत्र गुरु
र्यो गुरुः स शिवः प्रोक्तो यः शिवः स गुरुः स्मृतः उभयोरेतयोर्नास्ति गुरोरपि शिवस्येति न तत्र तदादेश
मंतरेणाधिकार एव भवेदित्यर्थः स्वसंविदनुभवः तर्को युक्तिः पतिशास्त्रं भैरवप्रधानं शैवं त्रिकं परा
दिशक्तित्रयाभिधायकं शास्त्रक्रमः चतुष्टयार्थः समाहारे द्वंद्वः इह सर्वमेव स्वानुभवेन युक्त्या स्वा
म्नायागमेन विशेषागमेन च सिद्धमुपदिश्यते इत्यागम उपाहृतः इति श्रयोग्यमेदेपेणाधर्मादौ हृत्स्येतेटं
हृतेदीनाराद्यवराज्ञाभिधानं शास्त्रार्थं यस्मिंस्तत्तथा तदेवं प्रतिज्ञाय शास्त्रार्थगर्भीकारेण संप्रत्य
वतारयितुमाह तस्य शक्तय एवैतास्तिस्रो भांति परादिकाः सृष्टौ स्थितौ लये तुर्ये तेनैता द्वादशोदि
ताः तस्य परमेश्वरस्य भैरवशब्दाभिधेयस्यैता निखिलशक्त्यंतरगर्भीकारेण प्रधानतया प्रतिपा
दिताः परादिकास्तिस्रः शक्तयः सृष्टौ स्थितौ लये संहारे तुर्ये नाख्ये च भांति सर्वं परसंविदात्मकेन रूपे
ण स्फुरंतीत्येकैकस्याश्चातुर्विध्येन सृष्ट्यादिकालाद्यात्मकतया द्वादशोदय इति वाक्यार्थः तदुक्तं या
स्तास्त्रयाणामप्येवांस्तु सृष्ट्यादिक्रमयोगतः भवेच्चतुर्धावस्थानमेवं द्वादशधोदिताः स्वसंवित्परमादितः
प्रकाशपुरमध्यग इति तदेक एव परप्रकाशात्मको भैरवादिशब्दव्यपदेश्यः परमेश्वरस्य समलस्य
ताभिन्नैकैकस्वातंत्र्याख्याशक्तिविस्फारादिति तत्कथमस्य द्वादशोदय इत्युक्तमित्याशंक्याह तावान्

श्री॰
ने॰ तो॰
३३

र्णस्वभावे सोऽपरमः शिव उच्यते तेनात्रोपासकाः सान्तानवैव परिनिष्ठिताः तावानिति द्वादशाशक्तयः परिसा
ण मस्य सतथा अत अत एव पूर्णस्वभाव इत्युक्तं पूर्णं सर्वमस्ति सर्वत्र पूर्णमस्ति अन्यथास्य पूर्णत्वं नैव न स्यात्
अत एव द्वादशात्मचक्रे योऽउपासकास्तत्र परमशिव एव परिनिष्ठितः तदेकात्म्यभाजो भवन्तीत्यर्थः
एतच्च बहुप्रपंचं कक्रवत्वमिति शाक्तोपायाह्निके एव वितत्य विचारयिष्यते इति नेहायास्तं तत्र कथ
मेतदुक्तं यत्नोऽत्र संख्यायाम् तत्र तत्र न्यूनत्वमाधिक्यं च संभवतीत्याशंक्याह तासामपि च भेदांशान्यूनाधि
क्यादियोजनं तत्त्वातिरेव लादेव शास्त्रेषु परिभाषिते तदेवाह एकवीरो यामलोऽथ त्रिशक्तिश्चतुरा
त्मकः पंचमूर्तिः षडात्मा च सप्तको ष्टकभूषितः नवात्मा दशदिक्शक्तिरेकादशकलात्मकः द्वाद
शारमहाचक्रनायको भैरवस्त्विति एषेकवीरो भूतित्रितिप्रथमध्याने यामलः तत्रैव प्रक्रियायां त्रिशः
शक्तयः पराद्याः चतुरात्मा जयादिभेदेन पंचमूर्तिः सद्योजातादिना यादुक्तं सिद्धान्ते पंचकं सारं वक्त्र
षट्वामदक्षिणे त्रिकं तु भैरवे तन्त्रे इति षडात्मेति यदुक्तं विश्वान्तदीशकारो ईवीरकाद्ये त्रिकात्तथा गुर्वी
ति षडेते देव्याः इति सप्तकेति यदुक्तं ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा वाराही चैव चामुण्
डा चैव तु मातरः इति अष्टकेनाघोरादिनाप एवैतद्दष्टमध्यवर्तीनावात्मा दशदिक्शक्तिरिति यदुक्तं
उमा दुर्गा भद्रकाली स्वस्ति स्वाहा शुभंकरी श्रीश्च गौरी लोकधात्री वागीशी दशमी स्मृतेति एकादशे
ति विंशकोऽकाशयदन्ते तत्र तत्स्वीकारः भैरव इति त्रयोदश ॱॱ नेनाधिकसंख्याहत्वं न आधिक्यं संख्या ३३

कत्वं निर्वर्त्तीत्याह एवं यावन्महस्रारेति: संख्यारेपि वा प्रभुः विश्वचक्रे महेशानो विश्वशक्तिविजृम्भिते स
हस्रारेति त्रिशिरोभैरवप्रथमपटलोक्ते ग्रन्थविस्तरभयात्तन्न प्रातिपाद्येन संवादितं निःसंख्यारेति भुवना
दीनां मानं त्याज्य एवमेव तस्यात्यतिरिक्तमित्याह विश्वशक्तिरिति तदुक्तं शक्तिश्च शक्तिमांश्चैव पदा
र्थद्वयमुच्यते शक्तयोस्य जगत्कृत्स्नं शक्तिमांस्तु महेश्वरः तत्र विशेषामपि चक्राणां यदि प्रभुरेव परा
मार्थस्तदेकेनैव कौतार्थत्वात्किं शास्त्रे बहूनि किमुक्तानीत्याशंक्याह तेषामपि च चक्राणां स्ववर्गानु
गमात्मना एकेन तत्र क्रमो भेदः सम्प्रदायनिरूपितः एकेन तत्तल्लक्षणायात्मनि यत्तक्रम्पकाविनादिना
मातृयेन तस्य नियतक्रम्पकाविनादि वा स्ववर्गानुगमात्मकत्वमुक्तं अत एव चक्रगोभेद इति शास्त्रेषु
चक्राणामानन्त्येन ते देव दर्शयति तत्तः षष्टिर्द्विगुणनायोगात्त्रैशिरसे मते षट्चक्रे स्वतन्ता यथोक्ता
विजनिजात्मतेः चतुर्णां द्विगुणनायोगेनाष्टौ पुनस्तावत्त्वेन षोडश षण्णां द्विगुणनायोगेन द्वादशानु
नस्तथा तेन चतुर्विंशतिः इति षण्णां चक्राणां मीश्वरतत्तत्क्रमसुलाससचक्रक्रमपुत्रायि वैचित्र्या स्थिता
नानाकारा उदितविक्रस्यात्मस्वत्रयलेभात्मिता क्रतिर्यस्यातत्पवनाथस्य तत्त्व शालिनः तत्तस्य का
यिप्तातः प्रभोः त्रैशिरसे मते त्रिशिरोभैरवे उक्ताभिहितेत्यर्थः तदुक्तं तत्र चतुष्का षट्कोष्टके द्वादशा
रे षोडशारे कं चतुर्विंशारकं देवि प्रभवविभक्त्यात्मु ··· मित्यादि बहुप्रकारं चक्राणां भेदनिमित्तम
पि त्रिशिरोभैरव एवोक्तमित्याह नामानि चक्रदेवीनां तत्क्रमस्य विभेदतः सौम्यरौद्राकनिष्ठानेयाः

श्री
तं लो
३४

गीत्यत्वर्थकल्पनो उक्तेति पूर्वश्लोकालिंगादिविपरिणामयोग्यं एकपदं हि परमेश्वरः तत्रतत्राथकशमान्त
सर्वे नियतो सौस्यारौद्रादिरूपो माकृतिमाभासमानोत्तांसिद्धिं नियच्छेत् येनयेन हि रूपेण साधकः संस्मरेत्त
दा तस्य तन्मयतां याति चिन्तामणिरिवेश्वरः इति श्रीत्रिशिरोभैरवप्रथमपटलाद्यायमेवार्थः स्वयमेवाभिधि
तव्यः अस्माभिस्तु ग्रंथविस्तरभयान्नप्रतिपादितं तदेवाह एकस्य संविन्नाथस्य ह्यांतरी प्रतिभा।
तनुः सोयं वान्य क्लितं संविहृर्भिचक्रमुपास्यते अंतरी प्रतिभा स्वातंत्र्यशक्तिः अन्तःश्रेष्ठे अतएव तत्तत्सौ।
म्यरौद्रादिनियताकारावच्छिन्नतान्मितम् एतदेव विभज्य दर्शयति अस्य स्यात्सृष्टिरित्येषा संविद्दीन
येविनाग्र ध्याना तं जल्पसंमिश्राद्यापाराश्चापि बाह्यतः ध्यानाद्येव क्रमेण निरूपयति सृष्टिरित्यादि
ना ततश्चेति समनन्तरोक्ताद्धेतोः अतः इति सृष्टेः सुष्ठुकरमीभावापादनलक्षणत्वात् जल्पमापादकेतत्तथा
ने सृष्टिप्रयोजकं स्मर्णमित्यादिरूपे संप्रतिमंजल्पमपि लौकिकभेदेन द्विधा व्याचष्टे येचेत्यादिना तत् इति दं
स्योष्ठ्यावर्णः तो संविदं सृष्टिरूपो बीजभावे मंत्रभावे अतएवास्य संजल्पस्य लौकिकत्वं देशोष्ठ्याप्रायादि
भिः यदुक्तं वर्षगण्याद्येनेशास्त्र इति तथाग्रुष्टावाव्याद्यनेव गौरिति एवंमूर्धन्यादीनामपि ग्रहणं विकार
स्यात्मत्य तेन लौकिकत्वं दर्शितं ता मिति सृष्टिरूपा संविदे इदानीं बाह्यमपि होमादिरूपं व्यापारं विभज
यति असृतेत्यादिना दीरं दधि तदुक्तं दधिहोमाः स्मराः सृष्टिरितिबलाबदहशाहून प्रत्येकं संबंधः तेनेति
गुरुत्व्यादिनाऽव्यक्ता तेन बीजमिति शरीरकारणभूतं शुक्रशोणितादि यातत्रा तं पत्नामिति सृष्टिरूपा ३४

क्रियां एतदेव प्रमेयांतरमुपेत्योपसंहरति तस्माद्धि सेश्वरो बोधभैरवः समुपास्यते अवच्छेदानवच्छिन्नाभोग
मोक्षार्थिभिर्जनैः अवच्छेदानवच्छिन्नामिति अवच्छेदः समनंतरोक्तनीत्या ध्यानादिनियतविधिनियो
जितत्वं तदभावात्त्वनवच्छेदः यदुक्तं साधकानां बुभुक्षूणां विधिनियततयोक्तिः मुमुक्षूणां तु तत्त्वविदा
मप्येवं तन्निरर्गलम् इति भगवतश्चैतत्त्वावच्छेदमपि रूपमनवच्छिन्नस्वरूपप्राप्तिमेव न हि तत्स्वरूपानु
प्रवेशं विना किंचिदपि सिद्ध्येत् एतदेव शास्त्रार्थहारकं गीतार्थेनैव संवादयति येऽप्यन्यदेवताभक्ता इत्यतो
गुरुवादिमान् इत्यतः इत्येवमादिकाद्यावकदेवकादित्यर्थः गुरुरिति तात्त्विकार्थोपदेष्टा भगवान्वा
सुदेवः तथा हि त्रैविद्या मां सोमपाः पूतपापा यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयन्ते ते पुण्यमासाद्य सुरेन्द्रलोकं क्षी
णपुण्ये मर्त्यलोके विशन्ति इत्यादिना भोगार्थिनाम् अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते तेषां नित्याभि
युक्तानां योगक्षेमं वहाम्यहं इत्यादिना च मोक्षार्थिनाम् अवच्छेदानवच्छेदाभ्यां क्रमेण स्वरूपमभिधाय पुनः
सावच्छेदेऽपि रूपेणावच्छिन्ने रूपस्यैवेत्यभिधत्ते येऽप्यन्यदेवताभक्ता यजन्ते श्रद्धयान्विताः तेऽपि मामेव कौन्ते
य यजन्त्यविधिपूर्वकं इत्यादिना तेनोपदिष्टं एतदेव व्याचष्टे यो बोधादतिरिक्तो हि किंचित्तत्त्वगणाधिपः
तेऽपि बोधैकविश्रान्ता बोधाभेदेन मन्वते येऽयाजका बोधाद्धि देवैकस्वभावात्स्वात्मरूपात् व्यतिरिक्तमन
तं मन्त्रनियताकारं इन्द्रादिदेवतं सुज्ञातिशययोगात् गाढं गाढं विमृश्यन्ते वेद्यावेदकतामासो वेदकः
संविदात्मनो इत्यादिन्यायेन बोधाभेदेन परप्रमात्रैकस्वात्ममयत्वेनावबुध्यन्ते इत्यर्थः ननु देवतोद्देशेनद्र

श्री. तं. लो. ३५

35

यतारोपयागाश्चस्येकेः इत्यादयोर्थमुद्दिश्यैव देवता भवति न च वेदार्थैकरूपस्य स्वात्मनत्वस्य तथात्वेनोद्देशोऽस्ति का
र्यमस्य यागस्येतिमित्याशंक्याह तेनावच्छिन्नतामर्शरूपादेनाप्रथात्मनः स्वयंप्रथस्य न विधिः स्पष्टात्मास्य धा
पूर्वगः तेनावोधात्मदेहेनाप्रस्य सक्तो हि भातो यमात्मेति त्याधिनानवच्छिन्नतयाविर्भूतेन रूपेण पराहंप्रका
शपरामर्शमयस्यानपवस्तयेप्रथस्य प्रमाणादिभेदैरपेक्षणे स्वतः सिद्धस्य विधिरप्रवृत्तप्रवर्त्तनात्मार्थः न
केवलबोधस्वात्मतत्त्वे विधिविषय उपपाद्यते तस्य विधिप्राप्त्यभावात् यावदप्राप्तं हि विधेः विषयः न च स्वा
त्मनः कदाचिदप्राप्तिरस्ति आदिसिद्धतया सर्वत्र स्फुरणात् ननु विधिनियोगभावनाद्यात्मतया बहुवि
त्वमुक्तं स्यात्मा पुनः कस्य विधेर्विषयतां न भजते इत्याशंक्याह विधिनियोगस्वेशाप्रभावनाबोधनात्मि
का विधिरप्रवृत्तप्रवर्त्तको न पुनरज्ञातज्ञापकः यदाहुः विधेर्लक्षणमेतावदप्रवृत्तप्रवर्त्तने प्रतिबेग
द्वेषेण नाज्ञातज्ञापनं विधिरिति सर्गाधारायेष्वसाध्यसाधनभावे अबोधयतोऽस्य विधेः तावत्प्रवर्त्तकेय
त्सप्रत्ययस्य पुंसः प्रवृत्तिर्नोह्यमिति प्रेरणात्मकः कार्यात्मा उद्देश्यार्थमर्थो नियोगः स च दर्शपौर्णमासाभ्यां यजे
त स्वर्गकाम इत्यनेनाधिकारात्तद्बवेयः अत एव वह्याद्बवेयबोधवो नियोग इत्युच्यते केचिद्वा विधिर्युक्तेः इ
ति नियोगस्वरूपमिति भावना च बाध्यनिष्ठो भावकव्यापारः भाव्यं स्वर्गादि फलं तन्निष्पत्त्युत्पादकः पुरु
षव्यापारो भावना पुरुषो हि भवन्तं स्वर्गादिकमर्थं स्वव्यापारेण भावयतीति भावनेत्युच्यते सा च हि विध्या
शाह भावनार्थं भावना चेति तस्याश्च किं केन कथमित्यदशनिति यार्थभावनायां किमित्यपेक्षायां स्वर्गः ३५

केनेत्यपेक्षायां यागः कथमित्यपेक्षायां भाव्याप्रकर्षप्रवृत्तिः केनेत्यपेक्षायां शाहः कथमित्यपेक्षायां अर्थवाद।
वाक्यव्यापारः संबंधनीयः चोदनावैदिके विधायके वाक्ये यदाहुः चोदनेति क्रियायाः प्रवर्तकं वचनमिति।
पत्तश्चोभयत्रापि संबंधनीयम् तस्य प्रमाणं तत्र प्रतिपन्नमेवार्थमभिदधत्प्रमाणतां लभते तेनार्थमाथया।
ति ऐंद्राग्नमेकादशकपालं निर्वपेदित्यादौ निर्वपणादिव्रीहिष्वाइंद्राद्यादेवता अपि विधेयाद्यदेवता
संबंधस्यैव साक्षात्प्रतिपादनात् तदेवाह तदैकसिद्धाइंद्राद्याविधिपूर्वाहिदेवता अहंबोधस्वतनतया
तेन संबंधरूपिणः विधिपूर्वाः विधिरेव पूर्वं पूर्वंभावि अनधिगतार्थप्रकाशनात्मकं प्रमाणं यासां ता
धोक्ताः स्वात्मव्यतिरिक्ता हि देवताः वेद्यप्रायाः प्रमाणांतराप्रतिपन्नास्वप्रामेद्रेण साध्यंते इति युक्तः पक्षः
अहंबोधैकरूपः पुनः आत्मा पूर्वोक्तप्रत्ययस्यदेवप्रकाशमानत्वान्न सिद्धौ प्रमाणं किंचिदपेक्षते इति प्रक्र।
प्रक्रमविधिपूर्वकमिति तदेवाह अहंबोधइति तथेति विधिपूर्वा इत्यर्थः ननु यदि प्रमाणांतरैर्नैरपेक्ष्ये।
णैव स्वात्मा स्वयं प्रकाशते किमिति न सर्वं देवसर्वेषामित्याशंक्याह तेहित्यादि ते इति स्वात्मव्यतिरिक्ते
द्रादियाजकाः ते सर्वं दैवं प्रकाशमाने स्वात्मानं वेद्यवेदनान्यथानुपपमात्तदतिरिक्तस्यान्यस्य देवता
त्वानुपपत्तेर्वस्तुतो वदंतोपि न विदुः वेद्यताया एव प्रथान्येन दर्शनात् वेदैकरूपतया न जानीयुरित्य
र्थः अतश्च नियततत्तद्देवतादिरूपग्रहणेन च्यवंते इत्यर्थः तदुक्तं तत्र नतु मांमभिजानंति तत्त्वेनातश्च्यवंति
ते इति तदेव व्याचष्टे चलनेन अवच्छिन्नरूपतापत्तिरेव या पतदपि तत्पतनं ग्रंथेनैव संवादयति देवता

श्री
गी.टी.
३९

न्देवयजो यान्तीत्यादिनेत्यत्ररूपतः तेनेत्यवच्छिन्नरूपतापत्तिलक्षणेनेदंतनेत्यर्थः यदुक्तं यान्ति देवव्रता देवा
न्पितॄन्यान्ति पितृव्रताः भूतानि यान्ति भूतेज्या यान्ति मद्याजिनोऽपि मामिति ननु यद्येवं कथमन्यदेवताभक्ता
अपि यजन्तीत्युक्तमित्याशंक्याह निमज्ज्यैव यत्तोयेनत्तत्र मे विन्मयी स्थितिं विदुस्ते परानवच्छिन्नेन तद्भक्ता अपि
यान्ति मां तत्रेति स्वात्मव्यतिरिक्ता या देवता यास्तद्भक्ताः स्वात्मव्यतिरिक्तदेवतायाजिन इत्यर्थः मामिति
परबोधैकस्वभावमात्मानं अस्मिन्परमात्मरूपमये मे चिन्मयतयावस्थानमेव यान्ति: तत्समापत्तिरेव च फ
लम् ननु भगवद्वासुदेवेनोक्तस्य मामित्यस्मच्छब्दस्य तदेकवाचकत्वात्कथं बोधमात्राभिधायकत्वं व्याख्यातमित्याश
क्याह सर्वत्रास्मदंशो बोधमात्रैकगोचरः स भोक्तृप्रभुशब्दाभ्यां ग्राह्यश्च तथोदितः अत्रेति गीता
ग्रंथे अनवच्छिन्नस्य बोधमात्रस्यैव प्रतिपादयिषितत्वात् अत एव केवलस्यैव बोधकस्य वाचकः परास्त्व
हे सत्कम् नहि प्रकाशाद्वितीयस्यापोह्यस्य प्रतियोगिनः संभवोऽस्ति तस्य प्रकाशमानत्वाप्रकाशमा
नत्वविकल्पोपहतत्वात् यत्तु शरीरादौ कृशोऽहमित्यादिरहंविमर्शः सविकल्प एव शरीराद्यपेक्षया।
परस्यापोह्यस्य प्रतियोगिनः संभवात् ननु यदि बोध एवाप्रतिपक्ष एकोऽस्ति तत्कथं मां यजन्तीत्यादौ या
ज्ययष्टृतया भेदः पारमार्थिकः स्यादित्याशंक्याह स भोक्ता इत्यादि बोध एवोभयात्मना स्फुरतीत्यभाव
तदुक्तं तत्र अहं च सर्वयज्ञानां भोक्ता च प्रभुरेव च नन्वेकस्योभयात्मत्वमिति कथं संगच्छतामित्याशंक्याह
यजमानी मे चिदेव याज्यानान्यदिति चोदितं तत्राकृतिः कृतेरप्यन्या देवता न हि मे चिताः मे चिदेवया ३९

ज्येति दिनं प्रतिज्ञाते न पुनः कुतोपि हेतोः अन्याकृतिविहादिरूपाभावसंविधाज्ञमात्मैव न प्रत्ययाभिज्ञा
याज्ञमानसंविदहं यमयीत्यर्थः सोपि चेविधाकृतिमतीवासंविदेवतानो विना संविधिभेदादुपपत्तेः सं
विदितिक्रिस्य वज्राशात नवज्रं स्यैतमानैकस्वभावं देवतानेयुज्यते इति स्वप्रकाशासंविदेवैका
त्मदात्मनास्फुरतीति प्रकाप्रके सपव याज्य यहुतयो दितइति अतपवादिसिद्धतान्नसंविदिकिंचि
विद्याधिसिद्धनिमित्तप्रक्रमिणार विधस्तोकः कोपयसंज्ञादिशितियामवा इद्दावल्लवेदवाक्यानिमं
त्रब्राह्मणत्वेन हि याब्राह्मणवाक्यान्यपि विध्यर्थवादनामधेयात्मकत्वेन त्रिधा तत्र विधिवाक्यानां
वत्त्वं विधिव्यापारेणास्तीत्युक्तप्रायं एवं मन्त्रादेरपि नाक्षिप्तव्यापारः यतो मन्त्रादिहेतोर्विधिव्यापारा
त्मनः क्रियायाः यथा श्रयत्वेन विना क्रियाया असंपत्तेन च संविदि वाच्यवाचकयाज्ययाजकभावाद्या
त्मको भेदः कश्चित्संभवति एतएवादिसिद्धो बोधइति सिद्धं ननु यद्येवं तत्कथं सर्वज्ञत्वाज्ञात्मा विश्व
प्रसरस्याशंक्याह सोयमात्मा नमात्मस्थितो जडपदंगतः आहृतानाहृतान्मानदेवादिस्याप्तो
त्माः ज्ञानान्तर्यो पि तत्स्याद्धेतूपपत्त्यात्मिकचिद्गता आहृतेति स्वस्वरूपगोपनात्मिकया मायाशक्त्यासं
कोचवार्तामाभासयेत्यर्थः जडपदमिति परप्रकाशभावराशिस्वरूपतामित्यर्थः विश्वनिर्माणेच्छु
र्हि परमेश्वरः प्रथमं स्वात्मतिरिक्तमेव विश्वं प्रकाशयेत् अर्थेत्यादिसर्गः तत्तदागमेषूच्यते अनेनतरं
यदा स्वमायया सर्गचिकीर्षा भवति तदा स्वस्वातंत्र्यात्मदर्पणे तत् ग्राह्यग्राहकद्वयाभासमेतत्तो

श्री॰
ते॰ लो॰
३०

उल्लासयति स्वांगभूतभावराशिमध्यादेव हि देहप्राणबुद्धिशून्यानि स्वगतहंतात्मककर्तृतार्पणेन ग्राह-
कीभावयति तदपरं शब्दादि चेदंताविषयतया चिद्भूतानि क्रमेण न्याघनाभासयति अत एव च देहा-
दिः कर्तृतां ज्ञातृतां च स्वात्मनि यथनितदितरस्य कादंतो ज्ञेयतां अत एव चैषां जडाजडत्वव्यपदेशः तदाह
अद्वितानानात्मेति एवमप्यत्रास्य प्रकारवैचित्र्येणानंत्यमित्याह जडेत्यादि विचिनोति तत्र जडस्यता
वृक्षादिभेदेन तस्यापि तारतम्यादिभेदेन बहुप्रकारत्वं अजडस्यापि संतानभेदेनानंत्ये पि वैचित्र्य-
स्य तारतम्यादिभेदेन नानात्वं संकुचिताः प्रमातारो हि तत्तत्कर्मानुरूपयानुसारेण परिभ्राम्यंते स्वतन्त्रदा-
स्या स्वैकमपि स्वात्मानं धर्माधर्मादिबुद्धिभावरसहितत्वेन तत्तद्दिक्कापरिच्छिन्नत्वेन च नानाकारतया
वैचित्र्येण जानन् जडं च विषयं सुखदुःखादिकाधितया नानात्वेन परिविंदंतीति एवं वैचित्र्यस्य किंनि-
मित्तमित्याशंक्याह तत्स्वतंत्रभावो हि किं किं यन्न विचिंतयेत् तदुक्तं त्रिशिरःशास्त्रे मसबुद्ध इति वेत्ति
यः एतदेवार्थद्वारकं संवादयति तदुक्तं इत्यादिना इति वैचित्र्यं यो वेत्ति स बुद्धः सम्यक् बुद्ध इत्यर्थः
त्रिशिरःशास्त्रे त्रिशिरोभैरवे तत्र हि अन्यथा स्वल्पबोधस्तु तेन भीकीटवर्णना मलतंतमसानुष्फ-
क्रीकृते देहपंजरे इत्युपक्रम्य सम्यग्बुद्धस्तु विज्ञेय इत्यादिना नानाकारैर्विभवैर्विभ्राम्यते तु तद्वय-
था स्वबुद्धिभावरहितमिच्छातः सबहिष्कृतमित्येतं बहूक्तं ननु देहादिग्रहकतयाभिमतो पि ज्ञा-
ज्ञेय एवेति तस्य कथमेवंविधं ज्ञानमित्याशंक्याह ज्ञेयभावो हि चिद्धर्मस्तच्छायाच्छादयेन्न ताम् ३०

37

ज्ञेयत्वं ज्ञानधर्मः न ह्यर्थं ज्ञानमित्यर्थस्य कश्चिद्‌ अतिशयः अपि तु ज्ञानस्यैव तज्ज्ञानरूपता तदुक्तमत्रापि ज्ञेय
स्य ज्ञेयता ज्ञानमेवेति अत एव चैतेषां ज्ञेयानां सतां देहादीनां छायाश्लेषेणैव स्वस्यावरकत्वायोगान्न चित्‌।
माच्छादयेदात्मरूपं यायैनैव विथं ज्ञानेन तस्मात्‌ तेन देहादात्मग्रहेणात्मनो न काचिद्रूपताहानिः तदु।
क्तं तत्रैव ज्ञेयस्वभावचिद्रूपलक्ष्मायायैनैवच्छादयेदिति अत एवाह तेनाजडस्य भागस्य शुद्धत्वादेवादिसं
ज्ञितः अनावरणभागांशे वेत्ति ज्ञेयतया स्थितं तेनेति चिदानन्दाच्छादनेन हेतुना अनावरणेति शुद्धमपि चिद्रू
पेऽप्यात्मनीत्यर्थः देहादीनां हि मे चिद्रूपत्वेऽप्यात्मत्वे ज्ञेयत्वेनावभासादशुद्धत्वमपि स्याद्भवेत्‌ न तु संविदि।
भेदानुपपत्तेः कथं वैचित्र्यं संगच्छतां इत्याशंक्याह संविद्रूपेण भेदोऽस्ति वास्तवो यद्यपि ध्रुवे तथाप्याहु।
तिनिर्ह्रासतारतम्यात्स लक्ष्यते आहुतेः आणवस्य मलस्य निर्ह्रासः परिक्षयः तस्य तारतम्यं मृदुमध्यादि
मात्रात्मातिशयः ततः लक्ष्यते इति न तु साक्षात्संभवतीत्यर्थः अत एव पूर्वं वास्तव इति विशेषणमुपात्तं।
किं च उत्तरं तस्येत्याशंक्याह तदिदं तेनैव दासाः शक्तिपातविनिर्णये सत्तत्र ॰ तत्रास्योत्यप्रसंगे
वर्णयिष्यते वक्ष्यामः इति यद्दृश्यते लक्ष्यते परीक्ष्यते चेत्यर्थः इह हि सर्वस्यैव वस्तुमात्रस्य प्रमेयजातस्यो
द्देशाद्यवभवेदिति भावः यद्दृश्यते विज्ञानसिद्धिकरणे सर्वस्योद्देशानक्रमादिति तच्चास्माभिर्ग्रन्थविस्तर
भयान्नातिपद्येत दर्शितमित्यत्र यमेवावधार्यं एवं मलनिर्ह्रासतारतम्यात्तु सारमेवात्मनामपि भगवत्‌
स्वरूपमपि प्रथते इत्याह अतः कंचिन्ममानं प्रतिपद्यते प्रभुः पूर्णमेव निजं रूपं केचिदंशांशिकाक्रमा

श्री
त.लो.
३८

केचिन्मितीतिवन्निर्ह्रासतारतम्ये अंशांशिकाक्रमादिति आहृतिनिर्ह्रासतारतम्यभेदादिप्रायत्वात् नन्वकिं
नामपारमेश्वरस्वरूपस्यपूर्णत्वमपूर्णत्वं वेत्याशंक्याह विश्वभावैकभावात्मस्वरूपप्रथनेहि यत् अपरज्ञानतत्परे
ज्ञानेनदन्यदपरं बहु विशेषणनीलसुखादीनांभावानांयएकोभावः प्रकाशमानत्वान्यथात्वपर्यायप्र
काशलक्षणप्रथानास्तत्वात्तदात्मयत्नस्यात्मनोरूपंतस्ययत्प्रथनमविकल्पहृद्यासाक्षात्करणंतदेवापर
नोपरं पूर्णं पारमेश्वरंज्ञानंतेनैवंविधापूर्णज्ञानादन्यद्विकलात्मकंशाक्तादिज्ञानमपरंचित्स्वरूपप्रथा
विरहादपूर्णंबहुवक्ष्यमाणप्रकारेणानेकप्रकारमित्यर्थः तदेवबहुप्रकारत्वंदर्शयति तत्रासाक्षादुपा
येनतदुपायादिनापिचप्रथमानंविविचित्राभिर्भंगीभिरिहाभिधत्ते तदित्यपरमपरंवाज्ञानंसाक्षादुपायेन
तिशांभवंतु तदेवचबहिस्तेपरज्ञानवान्यो निमित्तं सपरंचपरंकाष्ठांप्राप्तादुपायस्तुच्यते अतएवानुपा
यइतिनोपायविधिनिषेधमात्रमितिवक्ष्यते तस्यशांभवस्योपायः शाक्तः आदिशब्दात्तस्याप्युपायआण
वः भिधत्तेइतिनोपायविधिनिषेधमात्रमितिवक्ष्यते तस्यशांभवस्योपायः शाक्तः औपचारिकंभेदमेतीय
र्थः नकेवलमेवंयावदन्यदपियत्तदेवचित्रंनिमित्तमस्तीत्याह तत्रापिस्वप्रतारद्वारितात्मदेशांशांशाः व
वधानाख्यविधिनाभूयान्भेदः प्रवर्तते स्वेनयथाशांभवेनशांभवं अतएवस्वपरलक्षणेनद्वारेणद्वारिसोपा
यैः सर्वशः इति पूर्णात्मनाद्वेशांशाः इति पूर्णेनत्ववधानेतिसाक्षादुपायत्वाभावात् प्रथमंतावदुपायत्वेनयाः
शांभवादिभेदात् तेषांचद्वाविद्वारभावेद्वैयेयद्ध तत्रापिप्रत्येकंपूर्णत्वापूर्णत्वेतद्वैयर्थ्यादशान्तेषांचप्रत्ये ३८

केव्यवहितत्वाव्यवहितत्वे नेदं हेयं च तत्त्वविंशतिव्यवधानं च वक्ष्यमाणं विज्ञातीयं इति भेदानां भूयस्त्वं न च ज्ञानेन ताव
दुपेयतया प्रतिज्ञातमिति तेनोपायेन केनचिद्भाव्यं न च न ज्ञानमेवोपायत्वात् नाप्यज्ञानेन तदनोपायित्वा
त्स्येति किं नामोपायस्वरूपमित्याशंक्याह ज्ञानस्य चाप्युपेयो योऽनन्तदा ज्ञानमस्त्विति ज्ञानमेव तत्तत्त्व
पदं विज्ञानात्मकं मतं किं तत्तत्त्वं वैकल्पिकस्थूलशास्त्रादिज्ञानविलक्षणं मतमिति संबंधः अत एव शा
भवमित्यर्थः अत एव ज्ञानात्मकमित्युक्तं शास्त्राणामयोर्हि ज्ञानक्रियात्मकत्वमिति भावः नन्वेवमपि क
थमेकस्यैवोपायोपेयभावः संगच्छते इत्याशंक्याह उपायोपेयभावस्तु ज्ञानस्य स्थौल्यविभ्रमः यैषेव च
क्रियाशक्तिर्बंधमोक्षैककारणं स्थौल्यं चिदानंदैकघनपरस्वस्वरूपनिमज्जनाद्दनं तद्ग्राह्यग्राहका
त्मनाभेदावभासनं तत्कृतोयं भ्रमः यदिदमुपेयमयमुपायश्च निवस्तुतो हि परं प्रकाशात्मा शिव एवोपे
यः स च सर्वमेवावभासते तत्स्य कश्चिदप्यनपायात् अत एव नानोपायानां किंचित्प्रयोजनमस्तीति ज्ञा
पकत्वात्तेषां तदुक्तं अपरोक्षे भवत्तत्त्वे सर्वतः प्रकटे स्थिते केऽभ्युपायाः प्रवर्त्यन्ते नूनं ते न विदंतीति इति
अनेनैवाशयेन चानुपायनिरूपणं करिष्यते ननु यद्येवं तत्कथमयं व्यवहार इत्याह अथाहमुपाहृ इत्याशंका
ह यैषेवेत्यादि क्रियाशक्तिरिति तत्तद्भेदवैचित्र्यावस्थितिकाविनात् तेन परमेशस्वस्फारणमेवायतया
जेणाज्ञातो बंधको ज्ञातस्तु मोचकः तदाह बंधमोक्षैककारणमिति यदुक्तं सैषाक्रियात्मिका शक्तिः ॥
शिवस्य पशुवर्तिनी बंधयित्री स्वमार्गस्था ज्ञाता सिद्ध्युपपादिकेति नन्वेवमपि किं नामोपायतयास्म

श्री·
ते·लो·
३९

तस्मिंत्पाशेकथाह तत्राद्यपरामर्शोनिर्विकल्पैकथामति तथैवंसति आद्येप्राथमिकालोचनात्मनि अत
एवनिर्विकल्पेनएवनिर्विकल्पेनएवभिन्नस्यपरामृश्यमानोल्लासात्स्वपरामर्शोस्फुरत्तामात्ररूपेयत्प्रकटेस्फु
रेत् साक्षात्कारतयास्फुरणंउक्तान्तादिस्वाभ्यंप्रकीर्तितं इत्यायान्तरनिर्णयेतत्वादृव्यवधानेच्छाशक्ति
स्फाररूपः शांभवाख्यउपायउक्तइत्यर्थः एतदेवदृष्टान्तेनोपदेशेनस्फुटीकर्तुमाह यथाविस्फारितदृशामा
त्रसंधिविनापलम् भातिभावः स्फुटस्तद्वत्केषामपिशिवात्मता भूयोभूयोविकल्पांशनिश्चयक्रमचर्चना
त् यत्परामर्शमभ्येतिज्ञानोपायस्तुतद्विदुः तथैवात्मैवेदंसर्वमित्येवमात्मनोविकल्पस्यात्मनाख्याश
ह्यवाप्येपितथैवप्रतीयोनिश्चयपूर्वकोयोयोयोनः पुनर्नोनाशास्त्रोपोनिश्चयः तस्ययत्क्रमेणचर्वनेयथाय
थंस्फुटत्वाभाविताद्विनासंस्करणंततोयद्विकल्पमानमात्मस्वरूपपरामर्शामिर्थमेवेदमित्येवप्रतीति
समभिन्नासाक्षात्तात्मतामभ्येति सज्ञानोपायेविदुः ज्ञानशक्तिस्फारात्मकेशाक्तउपायेज्ञानीयुरित्यर्थः
तुशब्दःपूर्वस्माद्व्यतिरेचकः इहहिविकल्पएवक्रमेणनिर्विकल्पतातीत्युक्तं ननुपुनर्निर्विकल्पतयै
वसाक्षात्कारणंरूपमततएववचानयोर्द्वाविद्धारभावः यत्नतकल्पनात्मकमेवबहिर्भूतार्थसाधने क्रियोपा
येतदास्तानेभेदोनानाप्रवर्गाः तथात्तदात्मस्वरूपेक्रियोपायेक्रियाशक्तिस्फारात्मकाणवोपायेस
मधिगम्यमसर्वागमेषूक्ताः यतः ताभिर्भेदप्रथामयीभिः कल्पनाभिः ल्हमः स्वशिल्पेनकल्पितः बहिर्भूतो
विच्छिन्नेयोसोउच्चारादिरर्थस्तत्साधनेतत्राह्यव्यतिरेकोशाक्तेह्विकल्पएवार्थः इहतत्वार्थोपिइति अत ३९

एवंनत्त्रैाभ्यासादिः तत्तदुपायभेदादुपेयभेदोऽपि स्यादित्याशंक्योक्तं भेदो नात्रापवर्गस्य इति स्वरूपप्रथने
त्वपवर्गः तत्र सर्वैरेव हिङ्गादिहादिभावेन भवतीति भावः ननु ज्ञानमेवोपाय इति सामान्येन प्रतिज्ञातं त
कथमाणे च क्रियोपायत्वमुक्तं इत्याशंक्याह यतो नान्या क्रिया नाम ज्ञानमेव हि तत्तथा बुद्धेर्योगो नाना
ग्राममिति श्रीरामशासने श्रूयते वर्णात् ज्ञानात् यतस्तु ज्ञानमेव बुद्धेः परोहात् योगसंज्ञः परा काष्ठा
त्वेष्मसंस्तत्तथा क्रियेति सर्वत्राभिधीयत इत्यर्थः नन्वत्र किं प्रमाणं इत्याशंक्योक्तमिति श्रीरामशासने इति
ग्रंथाइक्तमिति शेषः तत्त्वमेव ग्रंथं पठति योगो नान्या क्रिया नान्यान्तस्तु बुद्धेहि यामतिः स्वचित्तवा
सना शांते सा क्रियेत्यभिधीयते एतच्च स्वयमेव व्याचष्टे स्वचित्तेवासनाकर्ममलमायाप्रसूतयः ना
शोशांतिनिरिक्तेया मतिः संवित्स्वभाविका निमित्तमित्यनेन सप्तमी व्याख्याता संवित्स्वभाविकेत्यने।
न सप्तमी व्याख्याता संवित्स्वभाविकत्यनेन मतेः ज्ञानार्थत्वमुक्तं सा मतिः प्राणेवेणत्तत्वं शारीरोत्प
त्तिकारणं स्यसेत्क्रमेण देवर्षि त्रिंशादेकं वमेतद्येत्यासका मुङ्डे देहारंभीणसाधारणानि तत्तथा बाह्य
स्थानानि हेयाश्रानमयः ऊर्ध्वं च येत्तेवरानेने यावत्तासमनाशक्तिरित्यासुत्यात्तदीक्षादिनासाधा
रणानि तत्त्वानि प्रथिपशयना स्वचित्तवासनाशांतिकाविताक्रियास्यात् तथा सेव योगात्वमिङ्कतिवा
स्तेनेत्यास्तत्त्वात्तज्ज्ञानोचितियोजनायोगः स्यादिति नानयोः ज्ञानातिरेकः इति युक्तमुक्तं योगो ना।
न्यः क्रिया नान्येति ननु कथं ज्ञानमेव क्रिया भवेदिति दृष्टांतोपदर्शनेनोपपादयति लोकेऽपि किल बाह्या

श्री।
तं। लो।
५०

मीत्येवमेतःस्फुरेद्वथा सादेहे देशमहोऽस्या॰ विशंतीगतिक्रिया अंतरात्मनि गच्छामीति यास्फुरणस्फुरणरू
यज्ञतात्मिकासंवित् सैव देहाद्याविशंती वैवमपाविष्कारणेन सत्त्वमयज्ञानमापादयंती गमनक्रिया भवती
तियुक्तमुक्तं ज्ञानमेव हि तत्र येति गंतर्हि गच्छामीति स्फुरणायां सत्यां कर्तृकरणकर्मात्मक शरीरा
यादग्रासाद्यावेशेन गमनक्रियासंपत्तिः स्यात् तदेवं विपर्यये हेत्वंति तस्मात्क्रियानामज्ञानमेव हि सा ततः
ज्ञानमेव विमोक्षाय युक्तं चैतदुदाहृतं तत इति क्रियायाः ज्ञानात्मकत्वात् तेन दीक्षायैव विमोक्षचयस्तु
र्धशैवे यामनशत्यपीत्यादिना क्रियायाः अपवर्गनिमित्तमुक्तमेवं च युक्तमुक्तं ज्ञानं मोक्षैककारणमिति
तदाह युक्तं चैतदुदाहृतमिति स्वतंत्रात्मातिरिक्तं स्तिव्यादिना प्रागात्मज्ञानातिरिक्तं मोक्षो नाम न।
कश्चिदस्तीत्युक्तमिति ज्ञानमेव विमोक्षायेत्यनेन हेतुफलाभावो न येरुच्यमानः कथं संगच्छते इत्या
शंक्याह मोक्षो हि नाम नैवान्यः स्वरूपप्रथनं हि सः स्वरूपं चात्मनः संविन्नान्यत्तत्र च याः पुनः क्रिया
थिकाः शंक्यस्ताः संविद्रूपाधिका न हि असंविद्रूपतायोगाद्धर्मिणश्चानिरूपणात् नन्वस्वरूपमेव
नामक्रियस्यापि प्रथने मोक्षः स्यादित्याह स्वरूपमिति तेन स्वस्यात्मनो रूपं संविदेवेत्युक्तं तत्तस्य प्रथनं य
याततत्वं ज्ञानं स एव मोक्ष इति यथोक्तं युक्तं यः पुनरयं हेतुफलभाव उक्तः स काल्पनिक एवेत्याह वि
कः यद्दृशति यतो ज्ञानेन मोक्षस्या हेतुफलतोदिता न तत्त्वति अन्यादिति संविदतिरिक्तमित्यर्थः
नन्वात्मनः संविदतिरिक्तं यदि रूपं नास्ति तत्कथमस्य शंक्यं तत्र योगित्वस्यादित्याशंक्याह तत्रेत्यादि ५०

४०

तथाह्यत्र ननु यस्य धर्माः शक्तयः स्युरित्यात्मक्ता साहात्म्यन्तुः धर्मितया शक्तीनां च धर्मतया निरूपणं कृतमि
ति धर्मिणश्चानिरूपणादसिद्धोयं हेतुरिति शंकयाह परमेश्वरशास्त्रेहि न च काणाददृष्टिवत् शक्ती
नां धर्मरूपाणामाश्रयः कोपि कथ्यते यथा बलानामाश्रयत्वादिसंबंधात्मेत्यादिना धर्मिरूपमात्मानं नि
रूप्य तस्य गुणाः बुद्धिःसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्कारसंख्यापरिमाणपृथक्त्वसंयोगविभागा
इत्यादिना तत्समवेतमात्मगतमुपाधिभिन्नं धर्मजातमभ्युपागमन् नैहमिह शक्तितद्वतोः धर्मधर्मिभावः क
श्चिदभिधीयते परं परं एकस्वतंत्रोबोधस्तत्तदुपाधिवशात्तत्तच्छक्तितया व्यपदिश्यते इति न वस्तुतः कश्चिच्छ
क्तितद्वतोर्भेदः यदुक्तं प्राक् मातृत्वमेयैर्हि भावस्य तत्र तत्र वपुष्यले को भेदो वस्तुतो वह्नेर्दग्धपक्तृत्व
योरिवेति ननु यदि काणाददर्शनवदिहापि धर्मिधर्मभावस्य निरूपणं क्रियते तदा को दोषः स्यादित्या
ह तत्र च दृक्क्रियेच्छाद्याभिन्नाश्चेच्छक्तयस्ततः एकः शिव इतीयं वाग्व्यर्थैव जायते यदि हि शक्ति
तद्वतोः धर्मिधर्मभावेन वास्तवः परस्परभेदः स्यात्तदेर्थनानाविधैरूपैः स्थावरैर्जंगमैरपि जडत्वप्रसक्तेः।
नित्यमेक एव शिवः प्रभुरित्यादावेक एव तत्तीयमद्वयप्रतिज्ञात्मिकाः नैकेषां शक्तितद्वतामर्था
नां संभवाद्वस्तुशून्याभिधेयरहिता स्यात् अद्वयवादिनामभवन्तीति यावत् ननु यदि वस्तुतः संवित्स्वभा
वः शिव एवैकोस्ति तत्कथमयं चिदादिनानाशक्त्यात्मा व्यवहारो न्यथा क्रियते इत्याशंकामुपसंहार
भंग्योपशमयितुमाह तस्मादेकं चित्रमेवैतत्त्वात्तेऽयं यत्तद्दृश्यते विविधमाभासवैचित्र्यपर्यवसितिशक्ति

श्री· ते·ला· ४१

ष्ठ एतच्च निर्णीतपूर्वमिति न पुनर्विहायते यथोक्तं बहुशक्तित्वमपश्यतः केचिदेवा वियुक्तेनेति इहात्मज्ञान·
मेव मोक्ष इति ज्ञानमोक्षयोः कार्यकारणभावस्ततो नास्तीति न वाच्यं कारणानि कार्ये वेति भवंतीति न्या
येन ज्ञानिनां सत्यपि ज्ञानाख्ये कारणे कार्यात्मा मोक्षो न स्यादिति निष्पादनात्मायं प्रसंगो नाशंकनीय
इत्याह यतश्चात्म प्रथा मोक्षस्तेनेहाशंका मीदृशी नावश्यं कारणात्कार्यं न ज्ञान्यपि न मुच्यते तानि ना
अवश्यभाविनी मुक्तिरिति भावः अत एव चैतेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते प्रियो हि ज्ञानिनो
त्यर्थमहं स च मम प्रिय इति तथा ज्ञानी त्वात्मैव मे मतमित्यादिगीतं न तु ज्ञानविमोक्षयोरत्यादिना ज्ञा·
नमोक्षयोः कार्यकारणभाव उक्त एवेति कथं नाह प्रसंग इत्याह यतो ज्ञानेन मोक्षस्य यथाहेतुफलतोदि·
ता न स्यादव्याप्तितो नायं प्रसंगा इति निश्चितं एतच्च निर्णीतचरमिति नेह पुनरायस्तं एवमुपसंहरन्नत्य·
द्वतारयति एवं ज्ञानस्वभावे च क्रियास्थूलत्वमात्मनि यतो वहति तेनास्यो चित्तनाटम्यतां किल ज्ञा·
नस्वभावेति क्रियाया ज्ञानविनाभावित्वात् यदुक्तं न ज्ञानरहिता क्रियेति स्थूलत्वमिति अंतर्योगस्याह·
कात्मना भेदो नोल्लासात् तेनेति स्थूलतां वहते न हेतुना चित्ते नेति तन्न क्रोधादिभेदवैचित्र्यात् अत एव·
वाह क्रियोपायोऽप्युपायानां ग्राह्यबाह्यविभेदिनां भेदोपभेदवैचित्र्यात्त्रिःसंख्यातमवेतरात् ग्राह्याः
आराधाः बाह्याः कंडमेडलादयः उच्चारादयो क्रियाश्च भूमिगता बाह्यत्वेनावसिता अपि चक्षुरादिवाह्ये
न्द्रियागोचरत्वात् प्रमार्जनतां समायाता आत्मनबाह्याः कंडमेडलादयः पुनर्बाह्येन्द्रियगोचरत्वात्स्याथा ४१

41

राण्यान्तरवाद्याः सन्तः ग्राहकत्वे ग्राह्यबाह्यविभेदिनामिति एवं नियतभेदत्वेष्वेषां एवान्तरभेदाः इदोपभेदः
नानात्वाभिः संख्यात्वे बहुप्रकारत्वमित्यर्थः तथाहि उच्चारस्य प्राणादिभेदात् प्रथमं पञ्चभेदास्तत्रापि बिन्दु
नादादयो बहव उपभेदाः एवमणूच्चार्यमाणानां मन्त्राणां ग्रन्थेऽस्मिन्नसंख्यभेदत्वम् एवं यत्तेनान्याक्रि
यानामेत्यादिना उपक्रान्तं क्रियायत्नानामात्मकत्वं युक्त्यागमाभ्यां निर्वाहितमित्येक एव ज्ञानात्मा मोक्ष।
वैश्चो उपायमिति तेनोपायनानात्वमत एव तत्फलभूते मोक्षेऽपि न कश्चिद्भेद इत्याह अनेनैवैतत्प्रध्वस्तं येके
वलशाशांकिवे उपायभेदान्मोक्षेऽपि भेदः स्यादिति सूत्रयः येकेवलसूत्रयः इति शशांकिवे इति संबन्धः के
वलसूत्रयत्निभेदवादिनः न ह्यहि हेत्वोः फलयोः वास्तव एव भेद इति हेतुभेदात्फलभेदोऽपि स्यात् इह
नः प्रदेशो ब्रह्मणः सार्वरूप्यमनतिक्रान्तस्याविकल्पस्येत्यादिनीत्या संविदेव सर्वमिति केनाम हेतुफल
भेदः काल्पनिके हेतुफलयोर्भेदे ज्ञानात्मैक एवोपायोऽभ्युपगत इत्युपायनानात्वस्यैवाभावात्कोना
म फलभूतेऽपि मोक्षे भेदः स्यात् ननु तस्य साक्षात् उपायेनेति आदिना साक्षादुपायनानात्वमुक्तमिति क
थं तत्त्वेदादुपायेऽपि भेद इत्याशंक्याह मलतत्क्षक्तिविध्वंसतिरोभूयस्थितिः स्थगनः हेतुभेदेऽपि नोभिन्नाघ
टध्वंसादिरूपिवत् यत्र वास्तव एव हेतुफलभावोऽस्ति तत्रापि हेतोर्दीक्षादेर्भेदेऽपि तत्फलभूतस्य मल
तच्छक्तेर्विध्वंसादेर्न कश्चिद्भेदः कलातत्त्वभुवनादिना भेदेऽपि दीक्षायास्तस्या विशेषात् तथा च घट
स्य मुद्गरकरभित्तिघट्टाद्युपायभेदेऽपि अविशिष्ट एव ध्वंसतिरोभावादिः अत्रत्यावयवमेव हेतुभेदात्फ।

श्री॰
तं॰लो॰
धर

42

लोभेदइतिनायमेकांतः यतःपुनःकल्पनिकएवोपायोपेयभावस्तत्रकानामेयंवार्तेतिभावः तदेवमिछाज्ञान
क्रियात्मकत्वादुपायस्यत्रैविध्यमितउपेयभूतेपवर्गेणकश्चिद्भेदइतिसिद्धं नकेवलंयुक्तितएवैतत्सिद्धं याव
दागमतोपीत्याह तदेतत्त्रिविधत्वंहि शास्त्रेश्रीपूर्वनामनि आदेशिपरमेशेनसमावेशविनिर्णये तत्रयमे
वग्रंथंपठति अकिंचिच्चिंतकस्यैवगुरुणाप्रतिबोधतः जायतेयःसमावेशःशांभवोसावुदीरितः उच्चार
रहितंवस्तुचेतसैवविचिंतयन् यंसमावेशमाप्नोतिशाक्तःसोत्राभिधीयते उच्चारकरणध्यानवर्णस्थान
प्रकल्पनैः योभवेत्ससमावेशःसम्यगाणवउच्यते अभ्यासपदेचायमाशयः यदुपायोपेयादिनाद्वारेद्वा
रभावेनशांभवोपायएवशाक्तानवविश्रांतिरितितदेवक्रमेणव्याचष्टे अकिंचिच्चिंतकस्येति विकल्पानुप
योगित्वा तयाचकडितिज्ञेयमयोभावःस्थिरःपूर्णःसमंततइत्यादिदृष्ट्यात्तेयस्याव्यपत्तातव्यापारमार्थिक
स्यचिदात्मनोरूपस्यसमापत्तिःस्यात् विकल्पोहिद्वैभावबलात् स्वजल्पविकल्पांतराविर्भावकतया
विगलदस्फुटत्वादिनायथायथमातिशय्यविकल्पजननाक्रमेणाविकल्पकात्मकसंविन्नादात्म्यमये
ति यद्वक्ष्यति प्रविविक्तविकल्पस्यकार्यातिसंस्कारमंतरेणस्याद्युपक्रमस्यसंविदभ्येतिविकसलामविकल्पस्व
रूपरूपतामिति अतएवशाक्तोपायस्यभेदः ननुकथंविकल्पानुपयोगित्वेपिवैतत्स्यादित्याशंक्यदर्शयि
तुमाह सकथंभवतीत्याह गुरुणातित्रमीयसा ज्ञेयाभिमुख्येनभेदेनद्वा॰कप रूपतापाशालिना प्रतिभाभि
मुखेनाभिमुख्येनचवस्तुनंतरापेतंतत्त्वात्रौचित्याच्चिन्मात्रमित्युक्तंज्ञेयमस्मिति अतिगरीयस्त्वमेवव्याख्या धर

तेशाक्रमत्रूढेनैवास्मदुक्तं ज्ञानाग्निनेन यथोक्तविकल्पक्रमोपहारोहाभावः सूचितः ननु कथमनयोर्भिन्नविभ।
क्तिकयोः सामानाधिकरण्यं इत्याशंक्याह तृतीयार्थे तसिःख्याख्या वा वैयधिकरण्यतः तृतीयार्थे तसीति
तसीति प्रत्ययं वृत्त्यलोपप्रयोगः तृतीयार्थ इति सर्वविभक्तेभ्यो तास्यातिपदिकात्तसेष्टेः वाशब्दः पक्षांतरे वैयधि
करण्यत इति गुरुणा कृतो यो बोधः ततश्च यर्थः आवेशश्चात्र तत्रस्य स्वतद्रूपनिमज्जनात् परतद्रूपतायां
मोरायाख्यकाविभागिनः प्रस्वतंत्रस्य जडस्य देहादेः मितस्य प्रमातुः स्वमसाधारणं तत्त्वं कवितं यद्रूपं नि
मज्जने गुणीभावः तदवलंब्य परमेण स्वातंत्र्येण बोधेन या तद्रूपता तादात्म्यं स आवेशः इति संबंधः यदुक्तं
मुख्यत्वं कर्तृतायास्तु बोधस्य च चिदात्मनः शून्यादौ तद्गुणे ज्ञानं तत्समावेशलक्षणम् इति ऊनः पुनर
यमागत इत्याह शंभोरिति न पुनः शाक्तेरणोर्वा आयादिति तत एव शाक्तेरणोश्च प्रभव इति भावः अत एव
शाक्तिरत्रेच्छा ज्ञानतत्तानं क्रिया वा तयोः समावेशोऽत्र रागतत्त्वेनाभिधास्यमानत्वात् इह पदार्थावगमपुरः
सरीकारेण वाक्यार्थावगम इति पदार्थयोजनानंतरं वाक्यार्थमपि योजयितुमाह तेनायमत्र वाक्यार्थो
विश्वेयं प्रोन्मिषत्स्वयं विनापि निमित्तेन ज्ञानक्रियासमादर्पणबिंबितं मातारमधरीकुर्वन्नक्याविभूतिं प्रदर्शया
न् आस्ते हृदये नैर्मल्यातिशयेन तावत्तास्यतः विश्वेयं विकासात्संपापारमार्थिकं रूपं मातासकलकरा।
णग्रामप्रसवनिमित्तत्वाद् बुद्धिः सैव विश्वायां संक्रांतिसहिष्णुत्वाद्दर्पणः तत्र प्रतिबिंबितं गृहीतात्मग्रहं
परिमितप्रमातारं प्रथरीकुर्वन् बुद्ध्यादात्माभिनिवेशं गुणीभावमापादयन्नेवं तरतमभावेनानन्यमाया

श्री॰
तं॰ लो॰
धत्र

43

रणं विभूतिं बोधात्मताप्रधानतोरचयन्समनंतरोक्तयुक्त्याविकल्प्योपायारोहमंतरेणानुपायेनत्वाज्ञद् इति सैषा
सारतयाप्रोक्ताहृदयंपरमेष्ठिनइत्याद्युक्तेः हृदयंविसर्गः तस्यनैर्मल्यमनन्योन्मुखत्वादपरिम्लानत्वंतस्याति
शयः पराकाष्ठातत्रस्वयंप्रोन्मिषत् प्रोल्लसत्स्वप्रकाशतयाप्रकाशतेइत्यर्थः ननुक्तेयंतावत् जडाजडात्मद्विधा
संभवति तत्रसंविदिजडेननीलादिनाप्रवेशोस्तीतिकथंबोधात्मैवसमसमावेशइत्युक्तमित्याह ज्ञेयंद्विधा
चचिन्मात्रंजडंचाद्यंचकल्पितं उतरत्रतथासत्यंतद्विभागोयमीदृशः जडेनयःसमावेशःसप्रतिच्छंदका।
कृतिः चैतन्येनसमावेशस्तादात्म्येनापरःकिल ननुकथंस्वप्रकाशायाश्चितेःपरप्रकाशत्वंज्ञेयत्वेना
मेत्याशंक्योक्तमाद्यंचकल्पितमितिचशेकायांतकः परमेश्वरएवस्वातंत्र्यादपरिहृतवेदकभावमपि
स्वात्मानंभावनोपदेशादौशिवएवसर्वक्रियाणांकर्ताविज्ञेयाइत्यादिपरामर्शैर्वेद्यतीतिमंतरोक्त्
त्यवेद्यतयाप्रतिपादयति इदमेवद्वितीयंसाक्षात्तु यत्स्वरूपंवेदकमेवसत्वेद्यत्वेनावभासयति अतएवक
ल्पितेवस्तुशून्यमित्युक्तं इतरदिति जडंनीलादितथेतिज्ञेयतया तत्रनीलज्ञानमित्यादौचितोनीलादि
नादर्पणमलवन्यायेनप्रतिबिंबनमात्रमेवसमाविष्टार्थोनतुतादात्म्यं तथात्वेतिकर्मव्यवस्थैवनस्या
त् संकुचितायाश्चितःपुनरसंकुचितचिन्नैकात्म्यमेवतस्याएववस्तुतोभावात् तेनबोधैकात्म्यमेवस
मावेशार्थइतियुक्तमुक्तमस्वतंत्रस्यपरतंत्रपदानामावेशइति तदेवोपसंहरति तेनाविकल्पसंवि
न्निर्भावनायनपेक्षिणी शिवतादात्म्यमापन्नासमावेशात्रशांभवः संविन्निर्वर्णात्संकुचितरूपा नन्व ४२

ऽत्यन्तो विकल्पापेक्षत्वं माभूत्तथा तेहि शाब्दोपायादस्य भेदो न स्यात् ऽत्र कालिकाः पुनर्विकल्पाः किमप
पेक्षं तेन वेत्याशंक्याह तस्मादाद्यनः प्रथाज्ञाविनोद्विविभ्रमाः सततताहात्म्यमापन्ना ननु तेषामुपायता :
तस्माद्देनेन निर्विकल्पपरामर्शः अविकल्पतेयैव संविन्माधिवात्मनाभिगमः कृतं इति कृतस्य कारणयो
गात् तत्पृष्ठभाविनां विकल्पानां तत्राकिं चिकारकमित्याह न तेनैषामुपायतेति अत एवाविकल्पस्यावि
कल्पापेक्षत्वं प्रमाण्यं वदंतो निरस्त इत्याह विकल्पापेक्षतया मानमविते अनधिगतार्थविषयं प्रमाणं य
दाहुः अनधिगतविषयं प्रमाणमज्ञातार्थविषये वा इति निर्विकल्पकगृहीतमेव च वस्तु तत्पृष्ठभावीवि
कल्पः परिच्छिनत्तीति तस्य गृहीतग्राहकत्वात् स्वयेव प्रामाण्यं नास्तीति कथमन्यस्यापि प्रामाण्ये नि
मित्तता यथात् अत आह सिद्धं हि विकल्पेनानुगम्यते इति सिद्धमिति प्रथिगते अनुगम्यते इति अनुप
श्चात् गम्यते अधिगम्यते इत्यर्थः ननु प्रवर्तितां गृहीतेर्थे विकल्पः तत्र पुनरर्थावसायात्मकत्वादग्राह
कत्वं न युज्यते इति गृहेहं गृहला मीत्य विकल्पेक बलात् प्रतिपद्यते तद्रूपविकल्पार्थे कोकारादिना
तिर्विकल्पकैकात्म्यावलंबबलादिति युक्तमुक्तं विकल्पेनागृहीतं गृह्यते इति न तु ज्ञानेन खलु ताप
कं न तत्कारकमिति तेन वस्तुनो ज्ञप्तिः स्यान्न तत्सिद्धिरिति कथमुक्तं सिद्धं विकल्पेनानुगम्यत इत्याशंक्या
ह अविकल्पात्मसंविन्नियोगात्स्फुरत्येव वस्तुनः सा सिद्धिर्न विकल्पात् तत्स्वयोग्यताविवर्जितात् आभासवादे
हि आभासमानतैव सिद्धिरित्युक्तं स्फुरत्येव वस्तुनः सिद्धिः स्यादित्याशंक्याह न विकल्पादिति सर्वो विक

श्री॰
तं॰ लो॰
४४

ल्पः स्मृतिरितितिनीत्या विकल्पानां तावत्स्मृतिरेव न रूपं साक्षात्संनिहिते पूर्वानुभूत एवार्थे प्रवर्तते इति विकल्पानां व
स्त्वनपेक्षितेत्यद्यपि वस्तुतस्तत्र विकल्पादेर्हेतूनां निर्मितानां योजनास्ति पूर्वानुभवसंस्कारजत्वादेवतेर्थाऽस्फुटं व
स्त्वपेक्षा विवर्जितादिति यस्य च यदपेक्षा नास्ति स कथं तत्संयोगनिमित्ततां यायादिति भावः यद्येवं निर्विकल्प
कसिद्ध एवार्थे विकल्पः प्रवर्तते नाधिकं किंचित्करोतीति किमिति तेन सम्यक् चिदपेक्ष्यते इत्याह केवलं संविद
सोऽयं नैर्मल्येन रविभ्रमः यद्विकल्पानपेक्षत्वं मापेक्षत्वे निजात्मनि एवं संविदः सर्ववादिसिद्धं व्यवहारादौ।
विकल्पसापेक्षत्वं परिहृत्य विकल्पानपेक्षत्वमेव स्फुटीकर्तुमुदाहरति निषेधेपि मणिरत्नानि विद्रुमा।
लप्रदर्शितान् तांस्तान्विशेषांश्चिनुते रत्नानां भूयसामपि वैकटिकोऽद्य चिरस्थायिनि परिमितेऽप्यालोके भू
यसामपि रत्नानामतिसूक्ष्मात्परस्परविशेषानवमायेविनापि अनुभावातिशयादेव जानीते येनेदमस्त
मिदमहर्समिदमिति महदन्तमितिपस्य विवेकः स्यात् किंचात्रानुभवातिशयेन निमित्तं येन विकल्पेनेदं पेक्षा।
णापि वस्तुनः सिद्धिः स्यादित्याह नैर्मल्यं संविदश्चेदं पूर्वाभ्यासवशाद्देशा अनियन्त्यसौ वेद्यातः इत्येतच्चवेधि
ष्यते त्रयोदशाह्निकादौ न केवलमस्याविशेषस्यैवैविध्यमेवास्ति यावदवान्तरप्रकारत्वमपीत्याह पं
चाशद्विधता चास्य समावेशस्य वर्णिता तत्र षट्त्रिंशकेतस्य स्फुटमेवाभिसंधितः वर्णिता पूर्वशा।
स्त्रे षडर्कांतत्र रुद्रशक्तिः समावेशाः पंच यानतु चर्च्यते भूततत्त्वात्ममंत्रेशशक्तिभेदात्तराननेन आत्मानस्त्रि
विधः प्रोक्तो दशधा मंत्रसंज्ञकः द्विविधः शाक्तिसंज्ञोपि तानवं परमार्थतः पंचाशद्भेदभिन्नोयं समावेशः ४४

44

प्रकीर्त्तितइति अत्रचहेतुः तद्धेति तत्त्वषट्त्रिंशकंच एतत्स्थानानितत्त्वषट्त्रिंशत्कमथपतितानि पुंस्त्वादीनि।
पृथग्व्याख्यास्यमानानितत्त्वानिच तेषांयः वक्ष्यमाणः प्रकारः स्फोटोभेदस्तस्यानुसंधानं तमेवभेदंनिरूप
यति एतत्तत्वांतरेयत्स्युविद्याशक्त्यात्मकंचयं अंभोधिकाष्ठास्वलनसंख्यैर्भेदैर्यतः क्रमात् उद्भिन्नमितिव्य
वहारः अतस्तत्रपुमानामावतविंशविषइत्याचुक्ताः अंभोधिभिः सकलप्रलयाकलविज्ञानाकलशुद्धा
लक्षणैश्चतुर्भिर्भेदैर्भिन्नः तथाविद्याकाष्ठाभिः वर्णबिंदुवनिरोधिनीनादनाचांतशक्तिव्यापिनीसमनो
न्मनात्मभिर्भेदैर्भिन्नां तथाप्यग्निज्वलनैरिच्छाज्ञानक्रियात्मभिस्त्रिभिर्भेदैः ननुकिमितीदमेवतत्त्वत्रयं
भेदेननिर्दिष्टमित्याशंक्याह पुंविद्याशक्तिसंज्ञंयतस्तत्सर्वव्यापकंयतः अव्यापकेष्वपरेष्वनेनेदंभेदनगणि
तंकिल अव्यापकेष्वइतिव्याप्येभ्यः तत्त्वांतरेभ्यइत्यर्थः मायांतं ह्यात्मतत्त्वस्य सदाशिवांतं विद्यातत्त्वस्य
व्याप्तिः यदुक्तं मयासदाशिवशिवप्रांतव्याप्तीनत्वक्रमादिति नकेवलमेतत्त्वतत्त्वांतरेभ्योभिद्यते यावद
स्यात्मपीत्याह अशुद्धिशुद्धिमानत्वशुद्धितस्तमिथोपियत् पुमान्शुद्धोभेदमयत्वात् विद्याशुद्धमा
नाभेदाभेदमयत्वात् शुद्धाशक्तिरभेदमयत्वात् ननुस्त्वेवंभूताःपुनः एषञ्जिदेशोकिंनिमित्तमित्याशं
क्याह भूतान्यथतत्त्वसिद्धानिकार्यहेतवतुमेयतः तत्त्ववर्गात्पृथग्भूतावासमाख्यात्पत्तएवहि भूतानिताव
त् प्रत्यक्षसिद्धानि इतितदेवैषां तत्त्वांतरेणभेदेनोपादनेनिमित्तंतानिहि नित्यानुमेयान्येव तदाह कार्य।
हेतवतुमेयतत्त्ववर्गादिति तथाचभूतानिकारणपूर्वकाणि अचेतनेसतिअनेकसंख्यायोगित्वात् घटवा

दिवदित्युक्तमाते येषां कारणं तानि तन्मात्रेभ्यश्च भूतानीत्याद्युक्तेः स्वकारणानि इति सकार्येभ्यः भूतेभ्यः प
षामनुमेयत्वं एवमनेनैवानुमानेनायोगतः सकलतत्त्ववर्गोनुमातव्यः एतच्च तत्राद्यन्तिमभविष्यतीति इति
नेहायस्तं भूतपदेवेति प्रत्यक्षसिद्धत्वात् न तु भूतानां प्रत्यक्षसिद्धत्वमनुमेयात् तत्त्ववर्गात् पृथक्केस्तनि।
सितं कथं पुनर्भूतत्वेपि तदेवेत्याशंक्याह सर्वप्रतीतिसद्भावगोचरं भूतमेव हि विदुश्चत एवेवाश्च
भावकाशात्तदास्थितिं सर्वेषां विदुषामविदुषां वा प्रतीतौ सत्तापरिमर्शिकेन सत्ताया गोचरमेव हि भू
तमुच्यते भूतं हि सत्यं तस्य सत्यं यत्तु न कदाचिदपि कस्यचिदपि विप्रतिपत्तिः अत्रमेयपुनरविदुषां ता
वत्प्रतीतिन्नास्त्येव विदुषां च प्रतीतावपि बहुप्रकारं परस्परं विप्रतिपत्तिरिति तत्र सत्यत्वसंभावना
पि भवेतिभावः अतश्चात्र सर्व एवावकाशलक्षणात् त्वादवकाशः तन्मद्धिते वाद्येते च त एवेह पृथिव्या
दिभूतपंचके सर्वप्रतीतिसद्भावगोचरत्वात्तस्य भूतत्वस्य स्थितिमवस्था ...... विदुरितिपुक्तमुक्ते
भूतसामान्यात्पतयेवेति एवं भौतश्चावेशः पंचधा शाक्तावेशः चत्रियाप्यकोपि पुंस्त्वतत्त्वरूपश्चात्मभे
दः तत्त्वमध्यावस्थायाः अन्यथाहि तत्त्वाश्चावेशास्त्रिशाङ्गानस्यात् त्रियायाश्च समन्वतरोक्तेन सामा।
न्यात्मना संत्रेणाद्रूपेणादशधाप्यावेशः विशिष्टेन तत्त्वमेव मन्त्रेशमहेशात्मना रूपेणास्यात्त्वमध्ये
परिग्रहणेने एवं शाक्तेरप्येकं भेदं तत्त्वमध्येम्यवस्थाय उदीयश्चावेशा हि यथा शिवत्वसमावेश एवे
तिन तत्रावेशोस्तितस्य परमाह यत्स्वभावत्वात् दयेतयासमावेशएव समावेशकलत्रणभेदानुपप

तेस्तद्युक्तमक्रमस्य समावेशस्य पंचाशद्विधत्वमिति ननु श्रीपूर्वशास्त्रे रुद्रशक्तिसमावेशस्यैव यथातद्वर्णने प्रति-
ताय भूतादीनां स्वरूपनिरूपणं कृतमित्याह रुद्रशक्तिः समावेशः पंचधा तत्र वर्ण्यते कोवकाशो भवेत्तत्र भूता-
वेशादिवर्णने प्रसंगादेतदिति चेत्समाधिः संभवत्ययम् नास्माकं मानसावर्जी लोको भिन्नरुचिर्यतः कोव-
काश इति भौतादीनामप्रस्तुतत्वात् इदमेव हि तदप्रस्तुताभिधानं यदन्यदुपक्रम्यान्यदभिधीयते इत्यत-
श्चोदितं कोवकाशो भौताद्यावेशवर्णने इति अथ रुद्रशक्तिसमावेशचर्वने प्रतिज्ञातेपि प्रसंगादेतदुक्त-
मिति समनः तदप्ययुक्तमित्याह प्रसंगादित्यादि ------ निर्णीतप्रायो प्रक्रांतोर्थे यत्किंचिदनुषक्तं तेना-
प्रकृतमभिधीयते तत्रायं समाधिः प्रसंगादेतदुक्तमिति इह रुद्रदिष्टेपि प्रकृते लक्षणपरीक्षायुक्तेवा-
भूतावेशादीनामाकस्मिकमेवाभिधानं कृतमिति कोनामायं प्रसंगः एवं हि प्राकरणिकानां प्रमेयनामा-
नन्यादंतानंतप्रमेयप्रतिपादनप्रसंगः स्यादित्युक्तं नास्माकं मानसावर्जीति यद्येवं तर्हि किं प्रतिपित्सवसि
त्याह उच्यते हेतृशास्त्रे श्रीपरमेशाद्विभेदिता भूतादीनां यथासात्र न तथा हृद्यवर्जिते अत्रेति ग्रंथे हृद्यशास्त्रे श्री-
श्रीपूर्वे सेति विभिन्नता तन्निषेधेन हृद्यवर्जितत्वे हेतुः तत्र च किं स्यादित्याशंक्याह यावन्न वेद विशिकः सो-
येय हार्यदपि किंचन एतावतीमहादेवीरुद्रशक्तिरनर्गला: अन्यदिति तद्वेदाभुवनाद्याः अनर्गलेति।
व्यापकत्वादप्रतिहतार्थः यदुक्तं तच्छक्तिचक्रात्मकमेव विश्वं ग्राह्यग्राहकत्वरूपेणात्मनैतत् अत्रादि
मध्येषु सदा विभाति नान्यत्पृथग्भिन्नं भवतोस्ति किंचिदिति एतच्च तत्र ग्रंथेनार्थेन संवादयति तत्र एव हि तीव्र

श्री॰
तं॰ लो॰
४६

46

स्मिन्नधिकारे व्युत्पाद्यते यदादेर्विश्वरूपत्वं पंचदशधादिभेदतः तत इति कटशाक्तेरेवतावत्स्फुरत्त्वात् अस्मिन्निति
श्रीश्रीपूर्वशास्त्रे यदुक्तं तत्र शक्तिमच्छक्तिभेदेन धरातत्त्वं विभिद्यते स्वरूपसहितं तत्तु विज्ञेयं दशपंचधेति
आदिःशिवः सा तावन्न भिद्यते इत्युक्तं एतच्च तत्त्वभेदेन भविष्यतीति ग्रंथविस्तरभयान्नेहायस्तं ननु यद्येवं तत्
किं तदशक्तिसमावेशोऽभिधीयतां किंभूतायावेशनेति समपवदोष इत्याशंकां गर्भीकृत्यैतदेवोपसंहा
रभंग्या दृष्टान्तेन दर्शयन्नुपपादयति तस्माद्यथा पुरःस्थेऽर्थे गुणाद्यंशांशिकात्मके निरंशाभावसंबोधस्त
थैवात्रापि बुध्यतां यथा संनिहिते घटादावर्थे लोहिताद्यंशाभासद्वारेणानेकसामान्याभाससंमील॰
नात्मनोऽंशस्याखंडस्यार्थस्य सम्यक् स्वालक्षण्यबोधो भवेत् तथैवात्रापि भूताद्यंशाभासत्वेन निखिलरू॰
इशाक्त्यावभासरूपस्यापि बोद्धव्यं एवमपि किंस्यादित्याशंकाह अत एव विकल्पानवेद्योऽयमशाम्भवैर्भवैः आ॰
न्यैर्वा शक्तिरूपत्वाद्धर्मैः स्वसमवायिकैः सर्वशोऽण्वथ वांशेन तं विश्वं परमेश्वरं उपासते विकल्पौघसंस्का
रापेक्षितोऽपि तान् तेन तत्त्वविकल्पान्तः ..... स्फुरन्नद्धर्मपादवत् धर्मिणः पूर्णधर्मोऽयमभेदेनाधिशी
वतेः अत एवेति धर्मसामान्यावगमस्तुत्वेन धर्मिण एवावगमात् अवयवभावाद्यौ व्यनिस्यतं अन्यैरिति पूर्ण॰
त्वादिभिः स्वसमवायिभिरिति शक्तिरूपत्वादभिन्नैरित्यर्थः ये केचन न्यक्कृतिविता युक्तितत्तन्नियत॰
धर्मविषयस्य विकल्पौघस्य संस्कारमवलंब्य परमेश्वरं समनन्तरोद्दिष्टाभिः सर्वाभिरेव शक्तिभिः एक
यैव वा शक्त्या समाविशंतीति ते समाविष्टाः संतः तेषां विकल्पसंस्कारामेतः स्वाकारतया स्फुरतः तन्नियताम् ४६

नियतावा धर्माः शक्तयः तेषां पारस्पर्यप्रवेशाय तदाश्रयपूर्णधर्मैः ह्यनंतत्वविततत्वेन पूर्णस्वभावधर्मिणो
शक्तिमंतं परमेश्वरं अभेदेनाधिशेरते तद्रूपतयास्फुरंतीत्यर्थः नन्वेकस्यापि नानाविधधर्मयोगित्वे ना
र्थस्यार्थं तेनैव प्रतीतिगोचरीभावः संभवति न वितरथेति किमेतदुक्तमित्याशंक्याशंत्यर्थमेतदेव सं
वादयति तद्विवादेन तत्पदार्थाविद्याधिपतिरादरात् तदेव पठति तत्स्वरूपमविकल्पमतज्ज्ञाकल्पनेन
विषयीकरोतीति येन अंतर्हितविततचित्रसंविदेतो भूभूरत्वभूतयः स्युः यदि नामैंद्रियिकी निर्विकल्प
कप्रतीतिरविकल्प्यमविभागमपि तत्स्वरूपं कल्पनेन नियततद्धर्मविषयत्वेन भेदेन सविकल्पं विषयीकु
र्यात् उक्तं हि नियतैकतरधर्मावभासमुखेन धर्मिस्वरूपावभासस्तेन धर्मिस्वरूपावभासयोः तत्
स्फुटाकारत्वेनोल्लिखिताश्चित्राः प्रवितताः नानाधर्मविषयाः संविदेयास्तासां पत्युविचारेणुभूयः प्रभ
वनो भवेयुः नेत्यपेवं नितरां यदि हि सर्वधर्मात्मना धर्मिणि सर्वे ऽनुभवाः स्युः तत्परिवाहिन्या द्वावेके
कस्यापि भिन्नाः कल्पनाः भवेयुः तेन स्वेच्छावशात् अर्थिताकुरोयाहानेवधर्मिण्यवभासो भवेन्न हि न
र्थेनियुक्तमेकतरशक्त्यवभासेनानंतशक्त्यावपि परमेश्वरे भास इति एतच्च तत्केवलं युक्त्या सिद्ध्या
वदाभासेनापीत्याह तदुक्तं श्रीमंगलादौ स्वशक्तिकिरणात्मकं अथ पशुरधिष्ठानमित्याद्युक्तं विशेष
णैः तत्त्वोदिविसदीक्षा मा निष्कल्या चलमूर्तिमान् कालोसैव पूरा स्वलासर्वेदुक्तात्मनानिका अथ त्या
वर्णशोभावलमात्रातिलालसाः आर्यं नो परता साधीमूर्तिर्नेनोपवर्यते स्वशक्तिकिरणात्मके यदुक्तं

श्री॰ तं॰ लो॰ ५१

47

तत्पस्वरधिष्ठानमित्यादिभिर्विशेषणैर्यथाहि शिष्यस्त्वन्मितिसंबंधः अथ पस्वरधिष्ठाने स्वशक्तिकिरण
त्मकमेवेपाटपथः ग्रंथकृता पुनः एवंविधानुभवदर्शिनाथ्यापाठः कृतः तान्येव विशेषणानि दर्शयितुं ता
स्यामित्यादि उपवर्ण्यते इत्यंतमागमाभासः पठितः स्वात्मनन्यसाधारणाः याः शक्तयः ता एवाभिन्नप्रकाशत्वाने
त्यादिना करणानश्मयः तद्दाम्नकेपञ्चः शक्तिमतोधिष्ठानमभिव्यक्तिस्थानमित्यर्थः शक्तिरेवउज्ज्वलमावुपायः
यदुक्तं यथालोकेन दीपस्य किरणैर्भास्करस्य वा ज्ञायते दिग्विभागादि तद्वच्छक्त्या शिवः प्रिये इति अत एव तत्सा
शक्तो विद्योतमानाया सोपि स्फुटदीप्तात्मा महाप्रकाशवपुः अत एव निष्कंपः स्वस्मिन्नेव रूपेवस्थितः तस्य प्र
शात्मनः स्वरूपात्प्रच्यावे सर्वमिदमंधं स्यात् अत एव चलया महाप्रकाशमय्या प्रशस्यया मूर्त्यायुक्तः यत
अतस्तामेवंविधायामयमेव विषयस्ततः सैव परा काष्ठा लोकोत्तरा विश्रांतिभूः अत एव स्वात्मापरिच्छिन्नमशा
क्यपरप्रमात्रैकरूपत्वात् अत एव वस्तुमात्रे पारमार्थिके रूपेतिशायेन लालसा उत्स्फुरत्तात्मिकेति यावत् प
वेच्च प्रकर्षेण निःसंस्कारतयाध्वस्तानि ---

द्रूपप्रतिबिंबवादोभिलक्ष्यते स्वात्मन्येव भित्तिभूते निखिलमिदं वाच्यवाचकात्मजगत् दर्पणनगरवत्स्वात्मनि वि
भासयन्विजयते विजयः इदानीमनुपायानेनार्धेण क्रमप्राप्तशांभवोपायं द्वितीयार्धेन प्रतिपादितं प्रतिजाने
ग्रथपरोपयिकं प्रतिपाद्यते पदमत्र ज्ञानमेवमहेशितुः इति १ ननु यद्दिनामपरोपायस्याप्यनुत्तरमेव रूपं तस्या
द् प्रकाशमात्रं यत्प्रोक्तं भैरवीयं परंमहः तत्र स्वतंत्रतामात्रमधिकं प्रविविच्यते २ यः प्रकाशः स विश्वस्य प्रकाश
नं प्रयच्छति इति प्रकाशमात्रमिति प्राधान्यात् न हि निर्विमर्शः प्रकाशः समस्तप्रपंचनेवा प्रोक्तमित्यनुपाया
त्रिके प्रथिकमिति कल्पनामात्रेण न हि वस्तुतो वस्तुनः स्वभावोतिरिच्यते तथाभिवासस्वभावएव न स्यात्
स्वतंत्रे प्रकाशनक्रियाकर्तृत्वम् तस्य चैतन्यं यत्स्वभिन्नावेव स्वेच्छया सर्वं प्रकाशयतीति तदेवाह यः प्रका
शः इति यः खलु प्रकाशनक्रियायां कर्ता परप्रमात्रात्मानुत्तरशब्दाभिधेयः प्रकाशः स सर्वस्य प्रमातृप्रमे
यात्मनो विश्वस्य प्रकाशत्वं प्रकाशमानतां प्रयच्छति स्वात्मैकात्म्येनाभासयतीत्यर्थः न हि विश्वं नाम प्रका
शमानत्वातिरिक्तं किंचित्संभवति तदतिरेकाभ्युपगमेप्यस्य प्रकाशमानत्वायोगाज्ज्ञानमेव न स्यात्।
दाह न च तद्व्यतिरेकव्यक्तिविशेषसद्भावे भासते इति ३ बाह्यार्थाभ्युपगमे ननु यद्येवं तर्हि प्रकाश एव प्रकाशते इ।
ति विश्वस्यावभास एव न स्यादवभासते विश्वमिति किमेतदित्याशंक्याह अतोसौ परमेशानः स्वात्मव्यो
मन्यनर्गलः इयतः सृष्टिसंहाराडंबरस्य प्रदर्शकाः इति ४ अतः इति प्रकाशातिरिक्तस्य विश्वस्य भानायोगा
त् परमेश्वरो हि अनर्गलत्वलक्षणस्वस्वातंत्र्यमहात्म्यात् स्वात्माभिन्नावेवानतिरिक्तमपतिरिक्तायमानेश्य

श्री॰
तं॰ लो॰
४८

48

हिस्वावैचित्र्यं प्रदर्शयतीति इत्येवं विश्ववैचित्र्योल्लासेऽपि प्रकाशमात्रस्वभावे स्वात्मन्यस्यानधिकं किंचिज्जातमिति ।
कदाचित्थितमत्र योग्यतानिरूपणं कुरुते अत एव चानेन विश्वस्य चित्प्रतिबिंबनमित्युद्देशोद्दिष्टस्य प्रतिबिं
बवादस्यावकाशो दत्तः यथा हि दर्पणादौ परस्परव्यावृत्तात्मनः प्रतिबिंबिता घटाकारविशेषास्तेनानतिरिक्तत्वेनाव
भासन्ते तद्वदिहापि इति तदाह निर्मले मकुरे यद्वद्भान्ति भूमिजलादयः अमिश्रास्तद्वदेकस्मिंश्चिन्नाथे विश्व
वृत्तय इति ४ रूपादिपंचवर्गाग्रे विश्वमेतावदेव हीत्याद्युक्तयुक्त्या पंचैव रूपादयस्तावत्सर्वमिति तेषां प्रतिबिं
बनव्यवस्थया विषयविभागं दर्शयति सदृशे भाति नयनदर्पणांबरवारिष्विति सदृश इति सजातीये अंबरे ।
ऽंबरस्य नातितीव्रं नातिमन्दं सौरं चान्द्रं वा तेजः तत्र हि छायापुरुषोपदेशविद्भिः शारीरसंस्थानप्रतिबिंबमुच्य
ते यदाहुः नभस्येव तेजसि रूपप्रतिबिंबयोग इति यद्वा विषयान्तरोपलक्षणपरतया शब्दप्रतिबिंबविषयत्वे
नव्याख्येयं तेन नभसि प्रतिश्रुत्का तथा परामृश्यमानस्य कटुतिक्तादेरसस्यास्यादिष्वाहृस्य गंधस्य च दंता
दर्केकदादौ स्पर्शस्य विदितेव गंधरूपादिपंचवर्गाग्रे विश्वमेतावदेव हि दृश्यते पंचभिश्चक्षुरादिभिरिन्द्रियैः पुं
वायमर्जयाम् ग्राणेनैव च क्रमेण प्रतिबिंबमिति एतदेव दर्शयति तथा हि निर्मले रूपे रूपमेवावभासते १
इह पृथिव्यप्तेजसां त्रयाणामेव रूपवत्त्वमिति पार्थिवे दर्पणादौ आप्ये स्तिमिते जलाशयादौ तैजसे चक्षुरादौ
रूपाख्यः स्वच्छोऽस्ति गुणः सन्निवेशसंस्थानात्मेति तत्प्रतिबिंबनमेव तत्रावभासते न स्पर्शादेस्तत्खल्वा
तेदस्थानाद्यात्मकेषु केदायायारादिषु स्पर्शादेः संभवात्स्वनिसंक्रामति तेन रूपवयत्र स्वच्छोऽस्तिगुणः सदा । ४८

वतत्प्रतिसंक्रामतीत्याशयः नचैतदप्रतिबद्धमिति व्यावर्णयितुं सदृष्टांतमाह प्रच्छन्नरागिणीकांतप्रतिबिंबिता।
सेर्ष्यं दर्पणमक्षचक्षुर्भ्यां स्पृशंत्यपि न तत्पश्यति ॥ नहि स्पर्शोऽस्य विमलो रूपमेव तथा यतः ॥ प्रच्छन्ना वस्त्रच्छन्न।
रागिण्याः कांतायाः गुरुसन्निधानादेवं तदायत्प्रार्थनात्मा ह्यादर्शनाय प्रमावपि दर्पणप्रतिबिंबितं दूरेणानन्य
संवेद्यं दृष्टो मया कांत इति संतोषाभिमानात्कांतदर्शनं कृतं अत एव सेर्ष्यं दर्पणमित्यनेन दर्शने वशाभिमुखताज्ञाता
तिशायकारितायां स्वसूचितं एवमनन्यसंवेद्यमेतत्स्पर्शोऽपि मे भूयादिति तत्कृतप्रयत्नापि सा दर्पणस्पर्शा।
प्रतिसंक्रांतममलभमाना न तत्पश्यति न प्रतीयत इत्यर्थः ननु यथा रूपं प्रतिबिंबितं तद्वदभिवर्तितस्वभा
वः स्पर्शोऽपि न किं प्रतिबिंबित इत्याह नहीति अस्येति दर्पणस्य तथेति विमलं स्वच्छमेव हि अस्वच्छस्य दर्पण
एवमप्रत्यक्षस्य प्रतिबिंबं करोतीति भावः नैर्मल्यं नाम चैतत्किमुच्यते इत्याह नैर्मल्यं चानतिविद्धः सजातीयाभा
वेनाकलुषितायेसजातीयाय यथा दर्पणे रूपपरमाणवस्तेषां एका विजातीयाभावानिस्सहायायासंगतिः
नैवं तथैव णवस्थानात्स्पृष्टत्वादिपविहारेण स्तातानात्मसंहतत्वं तत्र नैर्मल्यं यादेवं हि विजातीयैः सजातीया।
भावैश्चाकलुषितं दर्पणादेरूपमुपलभ्यते तदा रूपप्रतिबिंबयोगो यत्र च विजातीयैर्वाष्परजोरूपादिभि।
स्तत्कालुष्यमुपनीयते तदा नेत्यन्वयव्यतिरेकाभ्यां निश्चीयते योग्यस्यैव प्रतिबिंबान्याकांक्षितया विशिष्टः
स्वच्छता स्वो गुणः स एव तत्प्रतिबिंबनं करोतीति अत एव च रूपेऽप्येवं रूपमवभासेतेत्यादौ प्रतिज्ञानो दर्पणे।
ऽपि स्वप्रतिबिंबे दिग्विशेषेण बिंबप्रतिबिंबभावो न भवतीत्यपाकृतं एतदप्रकारांतरेण विव्याचष्टे

श्री॰
तं॰ लो॰
५५

स्वस्मिन्नभेदाद्भिन्नस्य दर्शनक्षमतैव या । अत्यक्तस्वप्रकाशस्य नैर्मल्यं तद्गुरूदितं ॥४॥ अत्यक्तः प्रतिबिंबितेपि भावांतरे त-
स्य विकल्पस्यैव निर्भासमात्रादतिरोहितः स्वप्रकाशो यस्य दर्पणादेः स्वात्मन्यभेदमवलंब्य यद्भिन्नस्य भिन्नदेशस्य प्र-
तिबिंबार्पकस्य पर्वतादेर्दर्शनेन गभीकृततयार्थतात्म्यकठीकारणं नहि दर्पणदेशादणुमात्रेपि बाह्ये देशे प्रतिबि-
बे भवतीति भावः तत्र यास्तमता आदर्शादिवैलक्षण्येन प्रतिबिंबग्रहणसहिष्णुता तदेव नैर्मल्यं न चैतत्स्वोपज्ञमेवा-
स्याभिहितमित्याह गुरूदितमिति गुरुणा परमगुरुणा श्रीमदुत्पलदेवेन अथार्थस्य यथारूपमित्यादि त-
था न च युक्तं जडस्यैवमित्यादि श्रीप्रत्यभिज्ञाकारिकाद्वयटीकायामेव तन्निखिलमेव प्रतिबिंबमतत्त्वमुदित-
मित्यर्थः तदेतन्नैर्मल्यं सर्वत्रामुख्यतया हि प्रकाशमिति दर्शयितुमाह नैर्मल्यं मुख्यमेतस्य संविन्नाथस्य सर्वतः । अं-
शांशिकातः क्वाप्यन्यत् इति मुख्यमिति सर्वस्यैव रूपाद्यात्मनो विश्वस्य प्रतिबिंबग्रहणसहिष्णुत्वात् अत उक्तं सर्व-
त इति संवित्तिलग्नमेव हि विश्वं संवेद्यते अत एवास्याः सर्वतः स्वच्छत्वं तथा क्वापि दर्पणादावंशांशिकातो रूपा-
दिलक्षणे अंशमात्रमवलंब्यान्यदप्युक्तं नैर्मल्यं तद्धि क्वचिदेव किंचिन्निर्मलमन्यथा सर्वत्र सर्वं भायादिति दर्प-
णेपि स्पर्शः प्रतिबिंबेत स्फायात् एवं च शब्दादस्याभेदो न स्यात् तन्नैर्मल्यं च तत्तदंशमेव नियमितमित्याह वि-
मले तन्न दिश्येतेति ॥६॥ तदिति रूपादि अत एव स्पर्शादि तत्राविमलमित्यर्थसिद्धं तेन तच्छक्तिरेव तथा प्रस्फुरते-
ति भावः अत आह भावानां यत्प्रतीघाति वपुर्मायात्मकं हि तत् । तेषामेवास्ति सद्विद्यामयं त्वप्रतिघातके र-
ति ॥७॥ प्रतिघातीति प्रतिहतत्वादन्यानुप्रवेशासहमित्यर्थः तद्धि मायीयं स्वरूपगोपनाकारित्वाद्येयं पारमेश्व ५५

रीक्रियाशक्तिस्वरूपात्मकं अत एव भेदप्राधान्यात् वेद्यतयावस्थितस्य तत्त्वस्य स्पर्शत्वमिति प्रतिबिम्बग्रहणाभासं तेजस्तत्त्वम्
यस्य नरप्रतीच्यातिभावानां वपुरुल्लसद्द्योतमयं ज्ञानशक्तिस्वभावमत एव तद्रूपेतयान्तःस्वच्छमिति तत्प्रति
बिम्बग्रहणसहिष्णुत्वम् तेन सर्वं प्रतिबिम्बात्मकमिदं तत्तद्गृह्णातीति विशेषः एवं परमेश्वर एव स्वस्वातन्त्र्यमाहा
त्म्यात् तत्र हि बिम्बप्रतिबिम्बाद्याभासवैचित्र्येणावभासत इति तात्पर्यार्थः तदाह तदेवमुभयाकारमवभासं प्रका
शयन् विभाति वरदो बिम्बप्रतिबिम्बतयाखिल इति १६ उभयकारमिति प्रतीच्छ्यप्रतीच्छकात्मकं आभास
मात्रसारमेवैतत्तात्त्विकमित्युक्तं प्रवभासं प्रकाशयन्निति उक्तं च तस्मादेको महेशानः स्वातन्त्र्यापादितस्थितिः
द्वित्वेन भासते सोऽपि बिम्बमतत्त्वउपपादकेषां च नैयायिकानां प्रत्याहते नयनरश्मिभिः स्वस्यैव मुखस्य ग्रहणमपि
दर्पणमुखमिति भ्रान्तिरत्र पुनः सत्यत्वभ्रान्तत्वव्यतिरेकेण तृतीयराशेरपत्तेरस्याभावात्प्रतिबिम्बं नाम न
किंचिदस्तीति मतं निराकर्तुमाह यस्त्वाह नेत्रतेजांसि स्वच्छात्प्रतिफलन्त्यलम् विपर्ययस्य स्वकं वक्त्रं गृह्णन्ती
ति संप्रपद्यत इति १७ यत्त्वेकघनेन स्वच्छाकारान्नुवितत्वान्तर्वेषां नैयायिकानां तन्मतमिति सूचितं केचि
देव स्वग्रहणेनैतदुक्तमिति भावः अत एव हि विकारभूषणकारादिभिरेवन्नामापि न स्पृष्टम् स्वच्छादिति वा
द्वा दर्पणादेर्विस्पन्दितिपरावृत्तेनेत्यर्थः अत्र च प्रतिफलन्तीति विशेषणद्वारेण हेतुः अन्यथा स्वदेहसंमुखीभाव
वर्षवेषां न स्यादिति कथं स्वमपि वक्त्रं गृह्णीयुः एतदेवेति स्पतद्भ्युपगमे कल्लवाशयइति तदेवाह देहाद
न्यत्र यत्तेजस्तदधिष्ठातरात्मनः तेनैव तेजसा जडे कोऽर्थः स्याद्दर्पणेन तत् इति १८ उक्ताधितवक्तृगः समस्तदेहा

श्री॰
नं॰ लो॰
५॰

50

इहि॰ प्रसक्तं यन्नापनेतेन तेनैव विपर्यस्तनेतेऽमात्माधिष्ठायकस्यात्मनो यदि स्वमुखाज्जातस्वाताभावेन तद्दर्पणेन को॰
ऽयं गुणः प्रतिफलनहेतुर्नामत्येषां प्रपिककुमादीनां तत्र संभवात् अथ दर्पणादय एव प्रतिफलनहेतवो न कुम्भा
दयः इति स्वकं दाभिधानमेतत् यतः समानेपि प्रतिघातहेतुत्वे दर्पणादय एव तथा न कुम्भादयः इत्यत्र न किंचि
दुत्पश्यामः अथाधिकः स्वच्छत्वाख्यो धर्मोस्ति निमित्तमिति चेन्नैतत् स्वच्छत्वे हि न प्रतीघातेनिमित्तमेव च्छो
कस्य स्वच्छत्वात्तस्मिन्नस्ति तिनभसि न कस्याप्यवकाशः स्यात् प्रस्तुतं तत्स्वतिबिंबग्रहणे निमित्तमिति विरुद्धत्व
मेव हेतोराह इति नेन प्रतीघातेम्र्न तेनाप्येव निमित्तं तच्चोभयत्रापि समानं यद्वा दर्पणेन प्रतिफलनस्फुट
त्वादिदानीं दर्पणं विनापि स्वमुखग्रहणं स्यादिति तेन किं प्रयोजनं एवं च प्रतिफलनबलात्प्रत्याहृत्याय॰
दिनायनाः यमयः स्वकमेव वक्त्रं रूढमिति तन्निजएव देशे तत्र आयेनान्यत्र दर्पणादेत इत्याह विपर्यस्तेन
तेजो ग्राहकात्मत्वमभावैः रूपंह्रपेपतवदनेनिजेनसंकरोतते इति ९५ रूपमिति स्ववदनसंबंधि वदनेनि॰
जइति स्ववदनदेशएवेत्यर्थः स्वदेशावस्थितमेव हि ग्राह्यग्राहकोऽवद्धातीति भावः न हि नीलदेशाप॰
विहत्यनीलज्ञानं नीलं परिच्छिंदत् क्वचित् दृष्टम् ग्राहकात्मत्वमिति गृहीतसंबद्धमेव वैतज्ज्ञेयं आत्माधि
ष्ठितानामेव हि एष ग्राहकत्वव्यवहारः किंच बहिर्निस्सृतानां नयनतेजसां आत्माधिष्ठानं किमशरीरेण
सशरीरेण वा आद्ये पक्षे शरीरस्य भोगायतनत्वं न स्यात्तेन विनापि बहिर्बुद्धिलक्षणभोगस्य सिद्धत्वात्
एवं च तस्य भोगायतनं शरीरं इति स्वसिद्धान्तभंगो भवेत् सशरीरेणाधिष्ठानेन च बिंबवदेवास्य प्रतिपत्ति ५॰

स्याच्चत्वन्यथेत्याह स्वस्वविमर्शावेशेन तद्रूपं भायात्मेत्यलं न तत्स्वस्य प्रतिबिम्बस्य वैधर्म्यकीर्तनस्वरूपिणी इति ९९ य
दीदं निजस्वत्वाधिकरणत्वेनात्मनो रूपमवभासते तन्ममेदं रूपमित्यहंतास्पदत्वेन पर्यायमात्रप्रतिपत्तिः स्यात्
न पुनर्व्यापकस्यात्मनोऽस्येदं रूपमितीदंतास्पदत्वेन सुप्तज्ञानां बालादीनामयमित्येवैकारस्य प्रतिपत्तिः
सुप्तज्ञस्तु संमुखमेवेदमत्र प्रतिबिंबितमित्यभिमन्यतां नाम को दोषः बिंबात्तु पुनरस्य प्रतिबिंबत्वे भेदेन प्र
तिपत्तिरस्त्येव तत्रैवंरूपतस्यापह्नोतुमशक्यत्वात् किंच स्वस्वरूपपर्ययात्मनो भानरूपं स्यात्तत्स्पर्शेणापि
भायात् रूपसन्निवेशो हि कामं गुरुत्वगंधवत्त्वादिरहितोऽस्यास्तां न पुनस्तदव्यभिचरितस्वभावत्वात्स्पर्श
हीनोऽपि कश्चिद्दृष्टो रूपप्रतिबिंबे तु स्पर्शाच्छिन्नमेव रूपं प्रतीयते न ह्यग्निः प्रतिबिंबभाजोऽस्मत्करस्य कश्चिदस्म
त्स्पर्शोपलब्धं तद्रूपप्रतिभासे यथा तद्धर्मस्य सन्निवेशस्यावश्यंभावेन तथा तस्याभिचारिणः स्पर्शस्यापि यदि स्व
रूपमेवावगम्यते तस्मान्नयुक्तमुक्तं स्वकस्यैव वक्त्रस्य ग्रहणमिति तन्वत एवोक्तं भ्रांतिविषयमिति यत्त्वमुखमे
वावगम्यमाणं भ्रांत्याभिमन्यते दर्पणे गृहीतमिति यद्येवं तर्हि सैवास्तु किमसंवेद्यमानस्य स्वमुखग्रह
णस्याभ्युपगमेन भ्रांतौ स्वारोप्यमाणमेव परिस्फुरति न वस्तुतत्त्वमपि शुक्तिकायां रजतनिर्भासे हि रूप्य
दिग्धशुक्तिकापि भयान्नेष्यते रजतनिर्भासेनेति भ्रांतिरेव न स्यात् एवं स्वमुखमेव चेत्स्वत्वं गृहीतं का नाम भ्रांतिः
भ्रांतावपि किंवा दर्पणप्रवृत्त्वेनाभासनमत्र परमुखत्वेन न तावदाद्यः पक्षो दर्पणस्यास्वदेशस्यैव निर्भा
समानत्वात् नहि रजतनिर्भासावसरे शुक्तिकायाः प्रतिभानं भवेत् नापि द्वितीयः एवं सौदासीन्यमवलंब

श्री
तं.लो.
५१

51

मानः सर्वो जनः स्वमुखेक्षणविभ्रमप्रसाधनादावनादृतः स्यात् तस्मात्क्षोभिताभावाद्बिंबविलक्षणं प्रतिबिंबा
त्मैव स्वतंत्ररूपत्वेन दृश्यपरोक्तत्वं अत्राह रूपसंस्थानमात्रं तत्स्पर्शगंधरसादिभिः न्यग्भूतैरेव तद्युक्तं वस्तु तत्प्र
तिबिंबितं १७ तदुक्तात्क्षोभाभावादेव हेतोः स्पर्शादिशून्यत्वात्केवलं तद्रूपसंस्थानं तत्र दर्पणादौ प्रतिबिंबितं
मस्त्येव न पुनस्तद्वस्तु किंतु स्पर्शादिभिर्न्यग्भूतैरेव तद्युक्तं अन्यथा ह्यस्य बिंबाद्विशेष एव स्यात् तस्माद
स्यैव प्रतिबिंबलक्षणस्य तृतीयो राशिरित्याशयः किं नाम चेदं स्पर्शादीनां न्यग्भूतत्वमित्याह न्यग्भावो ग्राह्य
ताभावात्तदभावो प्रमाणतः सचार्थसंगमाभावान्मोघादर्शेनवस्थितेरिति १८ स इति प्रमाणाभावः अ
नवस्थितेरिति अर्थात्स्पर्शादीनां यदि नाम ग्राह्यस्पर्शादीनामवस्थानं स्यात्तत्तैः सहेंद्रियाणि संप्रयुज्येरन्
तत्सन्निकर्षादेव चोत्पद्यमानं ज्ञानं तत्र प्रमाणतां यायादिति तत्प्रतीयमानस्य स्पर्शादेर्ग्राह्यभावो भवेदि
तिभावः किंच अत एव गुरुत्वादिधर्मो नैतस्य भासते न ह्यादर्शे संस्थितोसौ तद्दृष्टेः सम उपायकः १९ अत इ
ति स्पर्शादीनामनवस्थितेः यदि हि तस्य प्रतिबिंबितस्य रूपसंस्थानमात्रस्य स्पर्शाद्यपि स्यात्तत्तद्धर्मं गुरु
त्वादिरपि भायात् तदभावे चास्य किं प्रमाणमित्याह न ह्यादर्शे संस्थितोसाविति असाविति गुरुत्वादिध
र्मः प्रतिबिंबितस्य पर्वतादेर्गुरुत्वादिधर्मसंभवे हि तद्धारणाद्दर्पणस्य चाल्पः स्यात् न चैवमिति प्रतिबिं
बेऽपि तन्नास्तीत्युक्तं गुरुत्वादिधर्मो नास्य भासत इति ननु रूपेणावश्यं स्पर्शाद्यव्यभिचारि सर्वत्रैव दृष्टं बिंबे
चैवमिति दर्पणे रूपमेव केवलं किमिति प्रतिसंक्रांतमित्याशंक्याह तद्दृष्टेः सम उपायक इति तद्दृष्टाविति ५१

तस्य रूपसंस्थानमात्रस्य हस्तावभासनेत्यर्थः दर्पणे हि पूर्वोक्तयुक्त्या रूपमेव सङ्क्रमतीति तदवभासनप
र्यवसायकत्वेन स्पर्शादेरपीति भावः उपायापायेवोपायक इति स्वार्थे कन् ननु यथा दर्पणस्तद्वद्रूपाय
स्तथालोकादयस्तदुपायतया विशेषे एव कस्मादप्याधारा उच्यन्त इत्याशंक्याह तस्मान्न तेषु भेदे
न यद्यपि तत उच्यते थाद्रष्टि यतः पुनस्तस्मादादर्शादेव प्रतिबिंबोभेदेन पृथक्त्यान भातितनेह तैः
तिलेषु तैलमिति वदभिव्यापकतया स्यैव आधार उच्यते अत्र पुनरुक्तत्वन्नस्य सतः प्रतिबिंबस्य तदभावालो
कादय उपाया इति तेभ्योस्य विशेषः तदाह तत्र रूपयादीपदृक्संविदः क्रमात् ४ दीपचक्षुर्विबोधानां
कारित्वाभावतः परं सर्वत्र व्यापिनैर्मल्यात्तद्विना दर्शवत्पृथकु इति ४ क्रमादिति दर्पणाभेदेनोक्तस्याव
भासाद्रूपस्य कारकत्वं निते हि दर्पणे जातेपि प्रतिबिंबे दीपं विना कस्तद्व्यवहारः कोहि वेदो यतस्समेद दर्पणे
मुखं संक्रान्तं एवमस्य सङ्क्रान्तेपि मुखे सत्यपि लोके न तद्व्यवहारः अत एवास्य चमत्कृत्यैवं सामग्ग्र्याकेना
पि वैगुण्येन यदि इन्द्रियार्थसन्निकर्षाभावान्नज्ञानेनोत्पन्नं एतत्कृत्यं परिच्छिन्नाद् इत्येतज्ज्ञानावधावस
दितानां रूपायत्वं अवभासमात्रसारमेव हि प्रतिबिंबमतत्त्वमित्येतदिह प्राधान्येनोक्तं ननु तत्कथं स्याद
र्पणादीपादीनां अपि विशिष्टमेव प्रतिबिंबग्रहणसहिष्णुत्वमिति किमिति नतेपि स्वात्मभेदेन तद्भास
मे युरित्याशंक्याह दीपेत्यादि सत्यमस्त्येव दीपादीनां स्वात्मनि प्रतिबिंबग्रहणसहिष्णुत्वं किंतु प्रति
बिंबस्य दर्पणे यथा नतिरिक्तत्वेपि ततो तिरिक्ततायमानत्वेन प्रकाशकतया नावेति यतस्तदाह न विना दर्श

श्री॰
तं॰ लो॰
५२

52

वस्तुथगिति यतो दीपादीनां काठिन्यस्याभावः कठिने हि दर्पणादौ प्रतिसंक्रान्तं सद्वायामस्य स्थैर्यात्पृथक्प्रति-
भासते दीपादितेजः पुनः काठिन्याभावाद्वेगवदिति तत्रास्थैर्यात्तथा न प्रकाशते यथा निर्मलेपि जलाशया-
दाविस्तिमितत्वात्प्रतिसंक्रान्तमपि स्पष्टत्वादिना लक्ष्यते तथेहापीति भावः नन्वेवमप्यपिद्रवत्वात्काठिन्याभावा-
त्तैले मिश्रेपि प्रतिबिम्बस्य पृथग्भासेन स्यात् न ह्यस्य वैशेषिकं काठिन्यं न हि यथा नभसि भुजंगविभ्रमयतेन प्रती-
घातस्तथात्रापीति अत एवात्र वाकुम्भान्तरतः पुंसो वा कोऽपरं तद्देहेन परिश्रमः किं तु तदापेक्षिकं न हि यथाऽऽ-
श्रियां काठिन्यमस्ति तथा एव यथा चात्र तथा न तेजसि न हि तेजसि काठिन्यं नास्तीत्युच्यते किं तु तदपेक्षया इति
स्वल्पं प्रतिबिम्बस्य पृथक्प्रकाशनायोग्यमिति अत एव यथाऽऽत्मर्त्तत्वाच्च काशतल्पमेव दीपादयो हि भवेयुः संवि-
दितमेव नैतन्मात्रेणैवेत्यमूर्त्तत्वान्न च न तत्प्रतिबिम्बस्य पृथक्प्रकाशः किं च दर्पणादिषु तत एव स्वच्छत्वेन पञ्चादिति
तत्र मलिनेषु पश्चाद्भागेषु भिन्नन्यायेनाश्रित्य स्वच्छे पुरोभागे प्रतिबिम्बं भासते इह तु सर्वतः स्वच्छत्वात्तद्भावे हि
तत्त्वादेकेन भागेन प्रतिसंक्रान्तमपि स्पष्टत्वादिना लक्ष्यते भागान्तरेणान्तत आलोकादिना प्रतिसंक्रान्तेन तस्याहत-
त्वात् यद्वा काचस्फटिकशकलादयः सर्वतः स्वच्छत्वात्तद्भावे हि तत्र वस्तुदर्शनान्यथानुपपत्त्या नयनानां र-
श्मीनां प्रतिघातकास्तथा दीपादयोपि काठिन्याभावेऽपि सर्वतः स्वच्छत्वाद्भागान्तरेण निर्गच्छतः प्रति-
बिम्बस्येति न तत्र तत्त्वरोद्धः अतिमलिनस्य तत्प्रतीघातकस्य भागान्तरस्याभावात् संविदस्तु नः सर्वतो नैर्म-
ल्यात्स्वप्रकाशेति न तत्स्यावेयत्तयोग्यमस्तीति तत्र कथं प्रतिबिम्बस्य पृथक्प्रकाशः यस्तु नः प्रसरावसरे ५२

दीपिकायाः प्रकाशकत्वेनैवानुभवः स्वतेजसि प्रतिबिंबलसते तत्कंथादिमाहात्म्याच्च तथापि यावत्प्रतिबिंबं दृश्य
ते तत्र तेजसैव चक्षुरिंद्रियैतस्य निस्परीतत्वात् किंतु प्राप्यगोलकश्वतिन कश्चिद्दोषः नचैतत्प्रतिबिंबसत्तत्त्वम
स्माभिः स्वोपज्ञमेवोक्तं इत्याह एतत्सर्वदेवेनैव दर्शितं बोधयहृदये मूढानां वस्तु भवति ततोऽप्यन्यत्रनाप्य
ले २२ प्रतिच्छायाति स्वतंत्रेणेत्यनस्याय्य स्यायि चापिन स्वच्छस्यैव एकस्यापि महिमेति क्लृप्तलनेति २३ एतत्प्रति
बिंबसमतं क्लृप्तलनादेवेन मूढानामिति वस्तुमात्रेणेन प्रकारेण बोधयहृदये दर्शितमिति संबंधः दर्शितमि
ति सामान्येनोक्तेः सर्वैरेवेति भावः तदुक्तं पूज्यैर्हि ववद्देवीः करणत्वेन धीरिति तथा मलदर्पणवत्तेनः
सर्वं व्याप्तं चराचरं तथा सदसद्वस्तु निर्भासी दर्पणप्रतिबिंबवदिति तथा यथांतर्निर्मलादर्शे भांति भा
वाविशेषिणः अनाभिः प्राप्तत्वात्तस्मिंश्चिन्नाथे विश्वहन्तयः इति तथा प्रतिबिंबेति यथार्थस्त्वेतः स्वच्छमणिरिव
ति नभेदं बोधनमेभेदोत्तज्जीवस्यैता विभीषिकाः प्रतिबिंबमिदं दृष्टं जलेष्विव विवस्वतः तत्त्वतावदेतत्प्रतिबिंबं वस्तु
भवति प्रतिभासमानत्वात् नच भातमभातं भवतीति सर्वेषामेव विवादः नचात्र कश्चिद्बाधकः प्रत्यया
क्तित्तस्योत्तरकालमनुदयात् ननु यद्येवं तदेतेन प्रसिद्धं तत्तद्वस्तुजातीयेन भवितव्यमुक्तं अन्यथा सति यः
तेव स्तत्वं भवेत् तेन शशशृंगरूपस्पर्शात्मकविषाणं वस्तुभूतमस्तीत्यपि स्यात् नचास्य प्रसिद्धवस्तुत
ज्जातीयत्वमस्तीति कथं वस्तुभूतत्वं भवेत् वाह्यं वा तन्न वस्तु देशाद्देशांतरमपिव्रजेत् नचैवमतत् तदा
हृ ततोऽप्यन्यत्रनीति ततः इतिदर्पदशात् अन्यत्रेति देशांतरे भवतीति सर्वेषं संबंधनीये वाह्यरूपादि स्पर्शा

श्री॰
तं॰लो॰
५३

53

दिक्ष्वभिव्याप्तिमेव भवति नैवमेतदित्याह मांसलमिति नैतत्पर्याप्तमित्यर्थः यतोऽत्र स्पर्शादिपरिहारेण रूपं संस्था-
नमात्रस्यैव प्रतिभासः न शब्दोऽत्र काकातिवघोज्यः बाह्यश्च पर्वतादि सर्वस्यैव प्रतिहंता तत्सर्वं चास्य मध्ये न मात्
नैवैवमेतत् अत आह प्रतिघातीति न शब्दोऽत्रापि संवेधनीयः अन्यथा स्वभावे दर्पणे कथं तदंतः प्रवेशः स्यात्
नैवैतत् दर्पणस्य स्वच्छता युज्यते तथात्वे हि दर्पणस्यादर्शनं भवेत् बाह्यस्य च सर्वस्यैवास्य नैःकारणापेक्षास्ति
नहि स्वयं भू किंचिद्वस्तु संभवति उत्पन्ने पुनरस्य निरपेक्षत्वमेवास्ते यथा घटः कौलादिपरिहारेण च इदं पुनरुत्पत्ति-
निमित्तं दर्पणाद्यपेक्षत्वात्तेषां न काचिदपि सत्तां लभन्ते न हि दर्पणादिपरिहारेण प्रतिबिंबं क्वचिद्दृश्यते त-
दुक्तं न स्वतंत्रमिति अत एव चैतत्स्वयं स्थिरमस्थिरं वापीत्याह न स्थायि अस्थायि वा अन्येनेति बाह्ये हि वस्तुत्वं त-
स्य हेतुकालयोगित्वात् स्थायीत्युच्यते अन्यथास्थायि एतत्पुनर्दर्पणादेर्व्यतिरेकेण सत्तामेव नोपलभते
इति कस्य कालयोगो येन स्थायि अस्थायि वा भवेत् तस्मात्सिद्धं न तद्वस्तु मानीयत्वाभावात् शशविषा-
णादिवदेतद्वस्त्वेवेति नास्य प्रतिभासो न्याय्यः अथवास्ति प्रतिभास इति किमेतदुच्यते इत्याह स्वच्छस्यैवैव
कस्यापि महिमेति स्वच्छस्य दर्पणस्यैवैष प्रभावो यद्वस्तुवत् विलक्षणमाभासमात्रसारं प्रतिबिंबं नाम
दं प्रतिभासत इति तेन भगवता यथा दर्पणादौ आभासमात्रसारा एवार्था अवभासंते तथा संविद्यपीति
न बहीरूपत्वेनैषां सत्त्वमस्तीति बोधं वर्धयितुं बाह्यार्थाभिनिवेशिनामेतदुपदिष्टं अतः सर्वमेवैतदाभास-
मात्रसारमेवेति न बाह्येऽर्थेऽभिनिवेष्टव्यं येन द्वैतमोहः स्यात् अत आह न देशो नो रूपं न च समययोगो॰ ५३

नपरिमानवान्योन्यासंयोगोनचतदपहानिर्नचस्यान्नचावस्तुतैस्यान्नचकिमपिसारंनिजमितिभवंमोहः॥
ग्रासेप्दितिनिरदिशाहदर्पणविधि २४ प्रतिबिंबनावदर्पणातिरेकेणस्वतंत्रतयापृथक्त्वज्ञानोपलभते इस्य
यथादिति ततश्चनास्यस्वदर्पणात्पृथग्देशस्त्वुक्तो नदेशइति एवंचास्यनचना कादित्यालक्षणमूर्त्तिंविपि
नास्तीत्यर्थः यथाहिदर्पणस्यदेशःपृथग्देशःस्यादेकस्यैवनभेदेशस्यमूर्त्तेनदर्पणेनाक्रांतस्यमूर्त्तान्तरेणाक्र
मितुमशक्यत्वान्मूर्त्तानांसमानदेशत्वविरोधात् अतएवचास्यनोनूपंरूपमुपगुणयोगाइत्यर्थः सहिमूर्त्त
एवभवतीतिभावः अतएवचनास्यकालेसंबंधः सहिकंचित्स्थूलापरभाविनमुपेक्ष्यपृथग्लक्षसन्नाक
स्यात् अस्यपुनर्दर्पणात्पृथक्त्वेनैवनाभीत्युक्तंचकुशः अतएवचनास्यपरिमाणंमतत्त्वएवतद्योगोपपत्तेः
अन्यथाहिपरिमितेदर्पणेदेशेमहाकारंपर्वतादिकथंप्रतिसंक्रांतंभवेत् नापिदर्पणांतरेऽनेकेषामर्था
नांसहप्रतिभासेपिपरस्परंनैरंतर्येनसंश्लेषइत्याह नचान्योन्यासंयोगइति नचनगरप्रतिभासादौयघनेक
योसिन्नदेशानामर्थानामेकस्मिन्नेवपरिमितेदर्पणदेशेप्रतिभासस्तदेषांएकदेशत्वान्यथानुपपत्त्याप
रस्परंसंमीलनेनैकपिंडीभावेनैवास्योन्याय्यः नदेदेवंतर्हितत्रनगरप्रतिभासोनभवेदित्याह नचतदप
हानिरिति सर्वेषामेवार्थानांपरस्परंवैविक्तेनैवप्रतिभासात् नचभातमभातंभवतीतिउक्तंचकुशः अ
तएवचनास्यावस्तुत्वमित्याह नचावस्तुतैस्यादिति सर्वेषामेवार्थानांप्रतिभासादिति एवमप्यस्यवस्तु
तोपपादकमल्पमपिनिजंतत्त्वंरूपेनास्तीत्याह नचकिमपिसारंनिजमिति इत्येवमाभासमात्रसारप्रतिबिं

ग्री॰
ते॰ लो॰
५५

वमतत्वं वा व्याख्यं वा दिनेन निश्चितमेव द्वैतप्रधानात्मकं संकुचितेन ज्ञानेन शाम्यतामित्येतदर्थं दर्पणविधिः अस्मादिवैलक्ष
ण्येन प्रतिबिंबसहिष्णुत्ववस्तुप्रकारो निर्विदिशान्निर्दिष्ट एव एवं च सति अयमर्थः प्रदर्शितो भवति यदिदं समिदं
संविद्दर्पणप्रतिबिंबन्यायेनावस्थितं न तत्तदतिरिक्ततया कृततया बहीरूपमेन वस्तु सदिति न तत्राभिनि
वेष्टव्यं इति तदेवमुपपादितं प्रतिबिंबमर्मार्यक्ष्म्यस्य प्रतिबिंबे अन्यामयिकेनाभियानां नैरन्तर्येणाग्यमिथीयत
इत्याह संपादितं श्रव्यमित्यादि प्रतिसंक्रमणेन आत् श्रवणस्तस्याः प्रतिश्रुत्काया यत्ता प्रति सदृशं श्रवणं प्रतिश्रु
मैवेति इह खलु नैयायिकानां दर्पणादौ चक्षुषा रश्मीनां प्रतिफलनात् स्वकवक्त्रग्रहणे रूपस्य प्रतिबिंबे
श्रोत्रादेः प्रतिफलनाद्ययोगात् प्रतिश्रुत्कादौ मुख्यशब्दादिरूपतापरिकल्पनेनापि उदपन्न एव इति न क्वचिदपि प्र
तिबिंबमस्तीत्याशयः तत्र रूपप्रतिबिंबमस्तीत्युपपादितं तावत् एवं शब्दादीनामपि प्रतिबिंबमस्तीत्युपपा
दनाय तन्मतमाशंक्य दूषयति न च श्रावितेत्यादिना श्रवितिप्रतिश्रुत्का शब्दज इति न पुनः संयोगजो विभा
गजो वा स्वतएव स्वहेतुसमर्थत्वात् स्वयंमुख्यः शब्द इति भावः स च वक्त्रदेशात् क्षणत्वेव प्रतीयते अत एव तत्स वि
धवर्तिभिः प्रमातृभिराद्य एव शब्दस्तीव्रतमप्रायः श्रूयते तेन पुनरंत्यो मंदतमप्रायः दूरदेशवर्तिभिः पुनरं
त्य एव न त्वाद्य इति प्रतिश्रुत्का पुनस्तेनैव वक्त्रात्समीपस्थैर्वा प्रमातृभिराभा ऋजुत्वेन स्वमार्गे प्रवर्तमानत्वेन
संश्रूयते अत एव दूरस्थैर्गिरिगुहाप्रायदेशस्थैः प्रमातृभिर्न श्रूयते तदाभिमुख्येन तस्याः प्रवर्तमानत्वाभा
वात् मुख्यः शब्दश्च बहूनां श्रोतॄणां श्रोत्राकाशमभियानेन भिन्नाभिन्नस्वरूपतामियेति तथा हि सर्वे ५५

54

घोषात्मकमेकविषयत्वेन प्रवृत्तिर्न स्यात् । प्रतिश्रुत्का पुनः स्वयं स्थितं कथितमपशब्दः पानीयभाजनच्छादनरूपा ॥
पिहितशब्दयोगे उपादानविशेषाः । तेषां यानि विशिष्टानि स्थूलसूक्ष्मादिरूपाणि कृत्स्नानि सुषिरस्या गास्तत्र से
गतौ । न देकांशमीलनेनैकशब्दात्मवैचित्र्यं यायादिति वस्तुभूतशब्दजशब्दजातीयत्वानुपलेख्यानासौ शब्द
जः शब्दः । तस्माद्यथा मुखस्य दर्पणादौ प्रतिबिम्बमस्ति । तथा स्वमुखस्य शब्दस्यापि न भवतीत्याह । स्वस्य शब्दस्य प्र
तिबिम्बं मुखादिवदिति । न केवलं वस्तुभूतस्यैव शब्दजातीयत्वाभावादत्र प्रतिबिम्बं यावद्रूपप्रतिबिम्बजातीय
त्वादपीत्याह । इदमन्यस्य वेद्यस्य रूपमित्यभिधीयते । यथादर्शे तथा केनाप्युक्तमाकर्णयेतीति । यथा दर्पणादा
वरेतात्प्रत्ययस्यात्मभावसंबंधिनो रूपास्यान्यसंबंधित्वेन वेद्यतया प्रतीतिः । तथा मयैतदुक्तमिति परामर्शनी
यस्यापि स्वयमुच्चारितस्य शब्दस्यानेकाप्युक्तमाकर्णयेति । अतः प्रतिबिम्बात् तज्जातीयत्वादप्यत्र प्रतिबिम्बत्व
मित्याशयः । न शब्दश्चार्थसंबन्धापेक्षया इति शाब्दो वाक्यसमासौ । न त्वेकेन चिह्नं क्रमयदि उच्चारितः शब्दो हूरे
द्धायकाशे प्रतिसंक्रान्तिमेति । तत्रद्देशवर्तिनां प्रवणं श्रवणं भवेत्तन्नैषामित्याह । नियमाद्धि बिम्बसंसर्गप्र
तिबिम्बस्य यतः । तत्रस्थगाप्रमातारः शृण्वन्ति प्रतिशब्दकं । यस्माद्दर्पणादाविव प्रतिबिम्बस्य नियमेन बिम्ब
संसर्गमेव भवति । तस्मात्तयोः बिम्बप्रतिबिम्बयोरन्तर्वर्तिन एव प्रमातारः । ते बिम्बसंसर्गेण प्रवर्त्तमानं प्रतिश
ब्दं शृण्वन्ति न पुनरन्ये ये गास्त इति विवक्षितस्य गह्वरादिदेशस्थाः । तद्व्यभिचारित्वेन तस्याप्रवर्तमानत्वात् । ननु यद्येवं
तर्हि उत्पथगतैरपि केनापि निमित्तेनाकृतबिम्बाभिमतशब्दाकाराः प्रमातारः कथं बिम्बाभिमुख्येन प्रवर्त्तेत ।

श्री॰
तं॰ लो॰
५५

55

मानेप्रतिशब्दे स्फटिकगुटिकाशंक्याह । विंबग्रहं तदपि विना प्रतिबिंबग्रहो भवेत् स्वपक्षात्स्यापि यंपशेषे हं किं तं मन्तके व॰
पुः भवेदिति प्रतिबिंबग्रहे देशावस्थानात् स्वपक्षात्स्यमिति अतर्कितोपनतबिंबभूतप्रियादर्शनेन विशेषण
हारेणाहेतः नन्वायुक्ता दर्पणादेर्व्यतिरेकेण प्रतिबिंबटस्थक्तत्नामोवतोपलभ्यते इति तस्य बिंबसांमुख्यमभव
तीत्याशंक्याह सांमुख्यं चोच्यते तादृग्दर्पणभेदसंस्थितेः तादृक्‌ बिंबसंमुखो योसौ दर्पणस्तेनाभेदो दर्पणैका
त्म्ये तेन या प्रतिबिंबस्य संस्थितिरवस्थानं तेनैतदेवास्य सांमुख्यं यद्दर्पणे बिंबसांमुख्येन वर्तते तदनधिकवृत्ति
त्वात्तस्य दर्पणादेः परवपभाविबिंबसांमुख्यं अन्यथा प्रतिबिंबस्योत्पत्तिरेव न स्यात् एवमाकाशादेरपि बिंब
सांमुख्येनैव हि शब्दादि प्रतिबिंबग्राहित्वमित्यवगंतव्यं तदाह अतः कूपादिषि स्वाकाशे तत्प्रतिबिंबितं वक्त्रा
काशे सशब्दं संज्ञातितत्परवक्त्रगम् अतो यथोक्ताद्धि बिंबसंमुखाधारविशेषैकात्म्याद्धेतोः कूपाद्याकाशे तद्धि
वभूतं सशब्दं वक्त्रः संवेद्याकाशे प्रतिबिंबितं जानातीत्यभेदवृत्तिसंज्ञातिप्रतिभासत इत्यर्थः शब्दस्य गुणत्वेन
गुणिनि समवेतत्वात्तत्परमेवत्वमेवेति गुणिनैव सहास्य गुणिनि प्रतिबिंबनं युक्तमित्युक्तमाकाशे आका॰
शमिति कूपाद्याकाशस्य वक्त्राकाशसांमुख्ये हृदयंगमीकर्तुं दृष्टान्तयति तत्परवक्त्रवदिति ततः प्रकृतमाह
वक्त्रः परा वक्त्रा प्रतिवक्त्रा तस्मिन्निवेत्यर्थः यथा वक्त्रसंमुखीनो एव प्रतिवक्त्रसंबंधी श्रोत्राकाशः वक्त्रसंबंधि
नः सशब्दस्याकाशस्य प्रतिबिंबं स्फटजानितया तथा कूपाद्याकाशेपीति । इहावलतत्तदिंद्रियकंस्तानेवदृहीत
तत्प्रतिबिंबमेव विषयं परिछिंद्यात् अन्यथा हि निराकारस्य ज्ञानस्य नीलपीताद्यनेकविषयसाधारणत्वा॰ ५५

दिदं नीलज्ञानं इदं पीतज्ञानं इति नियमो न स्यात्‌ अतस्साकारज्ञाने साकारवर्त्तीसंतवेणस्य प्रतिकर्म्मव्यवस्था
नुपपत्तेः न च यदेवास्य जनकं तदेव विषय इति कर्म्मव्यवस्थापि सिद्धेदिति वक्तुं युक्तं जनकत्वाविशेषाच्चक्षुरा
दीनामपि तद्विषयत्वप्रसंगात्‌ अथैतन्नीलेन कर्म्मणा सन्माजन्यते तेन तदेव च सह्यदिनेत्यस्य तदेकविषयत्वमि
ति नैतत्‌ कर्म्मत्वं हि कारकत्वं तच्च क्रियावेशाद्भवति अन्यथा तन्नहत्समात्रं स्यान्न कारकं नीलस्य चेह ज्ञा
नाख्यक्रियावेशः एव विचारयितुं प्रस्तुतः इति कथमस्य तत्पूर्वमस्य कार्त्वं स्यात्‌ इति न जनकत्वेनापि तदे
कविषयत्वं सिद्धेत्‌ यस्मज्जनकत्वाविशेषवस्तुस्वभावकृतमपवार्यं विशेषमन्तुच्यते इत्पलायनप्रकारमा
त्रमित्यलं बहुना यत्तेनेंद्रियाण्यपि रहीतत्वम्प्रतिबिंबाद्योवत्तज्ज्ञस्य विक्षेदमायात सत्संहतेत इति साधुद्
ष्टं तितेतस्यर वत्नवदिति यद्यप्येत क्षोत्रमात्रे संभवति तथाप्यभिनिवेशादिनावश्य प्रतिवक्तोः परस्परमा
वशंभाविसामर्थ्यमित्येतन्निदर्शनीकृतं श्रोत्रूणां पुनरसामर्थ्यमपि संभाव्यते तथा लोके वेदांतो लौकिकाः
श्रात्ता वोहस्यं तेन मया श्रुतमनेनोक्तमिति यद्वा सामान्येन कूपाद्याकाशे प्रतिबिंबितावक्त्राकाशः परश्च वा
वक्त्राभातिव क्रांतरेणोवाश्चावितः शब्दः श्रूयत इत्यर्थः एवं प्रतिबिंबमपि तदभेदवृत्तिना हिंबसंभव एवमेवेति
नियमाद्धिंबसां प्रतिबिंबस्येति अतएव च बिंबप्रतिबिंबयोर्मध्यदेशे प्रमाणान्तरकृतानि नान्यस्याह यथा
वदर्शापाश्चान्यभागस्यापेवंन्निनोसवत्‌ तथान्यथाविधाकाशपाश्चस्यापेवंन्निनध्वनि सावमित्यन्यसंबंधिमुख
प्रतिबिंबं तथाविधेति बिंबसंमुखीनपश्चात्स्पागफल गृह्याप्रायदेशस्य इत्यर्थः ध्वनिमित्तिप्रतिश्रुत्कालन

श्री॰
त॰ लो॰
५६

णं नैवेति इति वेदनमात्रप्रतिक्षेपात् प्रतिबिंबस्य वस्तुतेव स्थानमस्तीति सूचितं न हि तत्ताभावाज्ञेयाभाव इति भावः
तेनोत्पन्नमपि प्रतिबिंबयोरपदेशावस्थानभावान्न ज्ञानान्तरीयत्वर्थः यद्यपि चैतन्निरमादिंबसामुख्यमित्यादि
नैवगतार्थं तथापि प्रतिबिंबसाजात्योपोद्बलनाय प्रवृत्तरूपात्तं ननु तद्रूपप्रतिबिंबजातीयत्वं किमांशांशि
कायासर्वे सर्विकयावात् त्राघेपलेवस्तुभूतशाद्बजशाद्बजातीयत्वमपि प्रतिभाससमानत्वादिनाकेनांशेशा
ननास्तीति तद्रूपतापि प्रसक्तास्यात् सर्वसर्विकयाचैतन्नास्ति यद्रूपत्वेनेपि रूपप्रतिबिंबेहस्तादेर्बिंबस्य
प्रतीतिरिहत ननु तथेत्याशंकां दर्शयति शाद्वेनवानभिव्यक्तः प्रतिबिंबतितद्भवे अभिव्यक्तिश्च तीतस्य
समकाले द्वितीयके क्षणे तत्प्रतिबिंबत्वेश्चातिस्मसमकालिका इहशाद्बस्तावदत्रश्चावित ...... प्रतिबिं
बतोनाश्येति इति नूनमसौ प्रथमेक्षणेऽस्थानकरणाभिघातादभिव्यक्तः स पुनः प्रतिबिंबतामश्नुवानः
श्रूयते इत्यस्य नोच्चारित प्रध्वंसिनो बिंबमेमेतस्य प्रतिबिंबतावसरे प्रतीतिः अतत्रनात्र रूपप्रतिबिंबजा
तीयत्वं तत्र प्रतिबिंबकाले बिंबस्य प्रतीतेः तदेतन्नेत्याह नत्वकाले हि नो हस्तं तच्छायारूपनिश्चयाः यत्र
यद्इति विमर्शात्मावभासः तत्रापि प्रतिबिंबकाले बिंबस्य प्रतीतिः नहि प्रतिबिंबप्रतीतौ बिंबस्यापि हस्त
स्तादेः प्रतीतिर्युक्तायुगपत्प्रतीतिद्वयविरोधात् नचैवं चित्रत्वानंवदेकैवोभयालंबना बिंबप्रतिबिंब
योर्विदेशवर्तित्वादविच्छेदेन प्रतिभासाभावात् ननु हस्तादेः प्रतिभासाभावेपि वस्तुनोवस्थानमस्ती
तिचेन्नैतत् आभासएव हि सर्ववस्तुव्यवस्थापकस्तमंतरेणार्थानां सत्तासत्त्वनिश्चयायोगात् सएववात्र ५६

56

नास्तीति हस्तादेर्बिंबस्य वस्तुतः संस्पर्शे किं प्रमाणं शाब्दस्य बहिर्नीयेत तेणापि न स्यद्वस्यस्य वस्तुतः संस्पर्शा॰
वोस्ति किंतु प्रतिबिंबतावसेन तस्य प्रतीतिरेव न भवेदित्युच्यापि बिंब प्रतिबिंबयोर्युगपत्प्रतीतिरिति स्थि
तमेवास्य तज्जातीयत्वं पूर्वनैयायिकमतापहस्तनेन प्रतिबिंबपरमार्थं स्वपर्याये प्रकृतमेवोपक्रमते
यंता रूपतायामिश्रांतेः नादेशक्तितयाता रूपतया परमेयदेह्वादशांते शिवतया प्रस्फुरन्पंचप्रकारः अ
त एव शरीरेपि हृदयान्मूर्धांतं हृत्कंठललाटशक्त्यंतद्वादशांतेषु ग्रंथ्यादयः स्थितः एवं पंचधा न चापस्व·
स्तत स्तेन रूपेण एव पर्यवसानमिति न पूर्वापरव्याहतत्वं किंचिदाशंकनीयं नन्वेक एवासौ कथं हृदादौ व
र्तते इत्याह व्यापकोपि स इति यदुक्तं तत्र व्याप्तात्मा तर्के एकः प्रेतरात्मा द्वितीयकः तृतीयो हृदयात्मा·
तनादात्मा तच्चतुर्थकः एवमेते महावीरे पंचमः परमात्मकः बिंदुः पंचविधे देवि हृत्कंठे तु ललाटके
नासांते नतथा चांते बिंदुस्तेनैव व्यापकः इति तदेव मन्त्रवीर्यं परमेश्वरी विसर्गशक्तिः हकारपर्यंत·
स्थूलरूपमाभास्य पुनरपि स्वस्वरूपापत्त्या वदनुत्तरे स्वात्मन्येव विश्राम्यति यदवयोतनाय प्रत्याहृता
शेषविश्वः प्रमात्रेकरूपपरमेश्वरवीर्यात्माहं परामर्शः प्रकाशस्यात्मविश्रांतिरहंभावो हि कीर्तित इत्या
दिसर्वशास्त्रेषूद्घोष्यते तदेव च परं तत्त्वं मातृकायाः यदभिप्रायेणैव नवियामातृकापरेणायास्त्वाते
एवं परिज्ञानवतामेवयेयोगिनां भुक्तिमुक्तिलक्षणं सिद्धियच्छेत् अन्यथा तत्तद्वाचकावेयद्वारेण
हर्षशोकादिरूपतामादधाना बंधकारिण्येव पशूनामिति भुक्तिमुक्तिलक्षणफलायोगात्रिपाले ९१

वभवेदिति पिंडार्थः तदुक्तं सैषा क्रियात्मिका शक्तिः शिवस्य पशुवर्तिनी बंधयित्री स्वमार्गस्था ज्ञाता सिद्ध्युपपादिके
ति न केवलमेवमस्याप्येवं संभवेद्यावन्मननत्राणधर्मणां मंत्राणामपीत्याह आदिमान्तविहीनास्तु मंत्राः स्युः श
रदभ्रवत् तथा ह्यस्यार्थे आदिमाः प्राणः अन्तः अहंकारः तेन मंत्रा अहंपरामर्शरूपादिमान्तविहीनास्तद्रूपत्वेना
परिज्ञायमानाः शारदभ्रवत्स्युः अकिंचित्कराण्येवेत्यर्थः तदुक्तं तत्र आदिमान्तविहीनास्तु मूलयोनिमजानतः
न ते सिद्धिकरा मंत्रा निष्फलाः शरदभ्रवत् खपुष्पं निष्फलं यद्वच्छशकस्य विषाणकं वंध्यायाः प्रसवेद्देवि
क्लीबस्य द्रव्यमेव च अग्निस्तु काष्ठयद्वा विनाशस्तु दारुणे तेन निष्फलाः आदिमान्तविहीनानि मंत्राणि वत्स एव च
निष्फलानि भवेयुर्वै यि पवित्रामृतात्मिकामिति अन्यथा पुनरहंपरामर्शकपरमंत्रवीर्यात्मत्वेन परिज्ञाय
मानास्तत्त्वकार्यकारणएव भवेयुरिति तात्पर्यार्थः यदुक्तं एतद्रूपपरामर्शमकृत्रिममनाविलं अहमि
त्यत्रैवैषप्रकाशस्यप्रकाशता एतद्वीर्यं हि सर्वेषां मंत्राणां हृदयात्मकं विनानेन जडास्ते स्युर्जीवा इव
विना हृदा अकृत्रिममेतद्धृदयं रूढे यत्किंचिदाचरेत् प्राणन्वा विमृशन्वापि स सर्वोस्य जपो मत इति श्रुत
वचेतस्य मतानमेव गुरोर्मुखाल्लक्षणमित्याह अनेन लक्षणमेतावदादिमान्तं च वेदयेत् स्वरूपस्मोहमित्या
तानी भवेद्देवतात्मकः अत एव तानि तेयो गायोतन स्वभावो विमर्शनिर्भरोहमित्सर्वे वीर्य इति भग
वदुक्तिः यदुक्तं तत्र आदिदैवतथा वात्यमाचार्यो यस्तु विन्दति स भवेद्योगिमार्गस्य स्रष्टा ऊर्ध्वतरो भवे अ
क्लिष्टं तस्य ऊर्ध्वं तित ऊर्ध्वं तिच अग्रग्रहं वंप्रयक्तेति तत्र वश्यालयति च सृष्टः सर्वं च जायेत अहं देवि यथा तव

श्री॰
तं॰ लो॰
५२

92

सत्तानीवेदरोहे समभवेत्साधको न ममः सर्वेषामन्नमः प्रोक्तो देवतः सर्वसिद्धिदः स यतिः पण्डितश्चैव भैरवेशः प्रकीर्तित
इति अत एव चैवंविधो गुरुः न केवलं स्वभावत एव परिस्फारकत्वपरशक्तिवीर्यात्मनो मंत्रानेव वेत्ति यावत्किंचिन लौकि
कमपि लोकादीत्याह श्लोकगाथादि यत्किंचिदादिमांत्ययुतं ततः तस्माद्धि देहस्तथा सर्वं मंत्रत्वेनेव पश्यति सत्व
लगुरुस्तस्माद्विरतिशयस्तानयोगात्सर्वं यत्किंचिन बाह्यं श्लोकादि तथाहं परामर्शात्वेन परामृशन्मंत्रत्वेनैव
मननं सर्ववेत्तृत्वं त्राणं संसार्थनुग्रहः इत्येवं कार्यकारितया साक्षात्करोति यतस्तदपि आदिमांत्ययुतमहंपरा
मर्शरूपमेवेत्यर्थः नहि प्रकाशात्मपरप्रमातृरूपतामंतरेण किंचिदपि स्फुरेदिति भावः तदुक्तं तत्र श्लोकगा
थात्तथाहं तेगीतकं वचनेन तथा स्तुतिर्वैदंडकं चैव आदिमांत्ययुता यदा तेपि मंत्रा भवंत्येव किंपुनस्तद्रहस्यवि
ति विसर्गशक्तिरेव वेद्यान्विश्वस्फारशक्तिन केवलमस्मन्मयमहादेवेषु शास्त्रेषु भगवतोक्ते यावदितो बाह्येष्वपी
त्याह विसर्गशक्तिर्विश्वस्य कारणं च निरूपिता चेतनीयात्ववेदांते परमेशेन स्वस्वरात् परमेशेनेति मदीयेत
दीयकमुनिभूमिकेन विस्तरादिति निखिलस्यास्य हि ग्रंथस्यैतदेव प्राधान्याभिधेयमिति भावः तदेवार्थद्वारे
णसंवादयति यत्तोहितेन दग्निर्यवीर्यं हृद्यं ङ विग्रहं यत्रांतिवृत्त्यपरमंतत्संचंद्रोदयात्मके लोहिते प्रकाशैका
त्मकतादीमेयदत्रतरं धाम तदेव प्रमात्रेकरूपतादनिर्यं श्चास्य वीर्यं ज्ञानक्रियात्माशाक्तः स्फारः तदेव प्रमा
णप्रमेयादिरूपतयास्त्रयैं ङ विग्रहं इत्येवंरूपायः लोहितवीर्यायः सेचेङः येकात्मेत स्वयतदयः सततमेवानस्त
मितत्वेन प्रस्फुरद्रूपत्वे तत्स्वभावमिदं अकारहकारात्मकं शिवशक्तिसामरस्यरूपं परं ब्रह्म उच्यते यतोयमहं ५२

मिति परप्रमात्रेकरूपः परः परामर्शः उदियात् यन्माहात्म्यान्निखिलोऽर्थवाच्यवाचकात्मास्य समासः स्यात् य
द्गीते अक्षरंब्रह्मपरमंस्वभावोऽध्यात्ममुच्यते भूतभावोद्भवकरो विसर्गः कर्मसंज्ञित इति एतदेवस्वरूपेण शिव
तत्त्वोक्तेन पुनर्विहायस्त्व वर्णक्रमेव यल्लोहितं पञ्चान्तरसरूपमात्मवेतद्विनिस्तत्त्वविपाकोऽन्ते यत्वासर्वस्यां
तवस्य यश्च वीर्यं ध्यानेदफले षट्प्रकरूपपर्यायं तदेतद्देतः तदेतत्सर्वेभ्यो भोग्येभ्यस्तेजः संभृत्यात्मस्येवात्मानं विभाती
त्यादि तत्रसोमात्मतेजोमयत्वात् यत्कार्यसत्त्वस्वरूपं अतएव धामत्रयात्मकत्वादेतदुभयमपि कुंडगोल
कादिशब्दव्यपदेश्यं परं पावनं येनास्य तत्त्वार्थः शक्तिसंगमादित्यादिवक्ष्यमाणनीत्या परमोपादेयत्वमुक्तं
तत्संघट्टादेव च नित्योदितं परंब्रह्मानीत्येव देहादौ मद्धीनाहंभावं भवेयेनायं स्त्रीपुंनपुंसकादिसर्गः यदुक्तं
त्र यदेतत्स्त्रियां लोहितं भवत्यग्नेस्तद्रूपं तस्मात्तस्मान्नबीभत्सेत अथ यदेतत्पौरुषं रेतो भवत्यादित्यस्य तद्रूपं
तस्मात्तस्मान्नबीभत्सेतेति तथाश्रुतिब्रह्मानन्दागानमहमित्यौति अतश्चास्यैव विश्वं वैभवमित्याह तस्यापि
वपरं वीर्यं पंचभूतकलात्मकं भोग्यत्वेनान्तरूपं च शब्दस्पर्शरसात्मकं यदेतत्तस्यैवानां पृथिव्यादीनां भूता
नां मांशरूपं शब्दादिविषयं पंचकं तत्तद्योतकरूपस्य परब्रह्मणः परं वीर्यं शाक्तये स्यज ... त्वे शक्तिनात्व
महेश्वरस्यापुंस्त्वानि सर्वैर्भूतात्मना पर्योकोद्दिश्यतः शाक्तस्फार इत्यर्थः ननु शब्दादिपयेतत्स्फारपवतद
स्य भोक्तृत्वरूपत्वात् तदपि तथैव किं न स्यादित्याशंक्योक्तं भोग्यत्वेनेत्यादि भोग्यत्वेनेति न तु भोक्तृत्वेन पुनरू
पमिति न पुनर्नादिवर्णक्रमेव लोहितवीर्यसंघट्टास्यैव वर्णव भौतिकशारीरादिपरिग्रह इति एतच्चैतदेव यो

श्री· तै·टी· ९३

एवाध्यात्मानि पंचविधमुक्तं वेद यस्मादिदं सर्वं त्रिवृदिति समेषत्ति वित्पृथिवी वायुराकाशमापोज्योतींषीत्याद्युप
क्रम्य तस्माद्योनिं वानादःक्ष्वेदाहमस्मि मन्नादोन्नादयते भवत्यस्यान्नमापञ्च पृथिवी वान्नमिमादि बहूक्तं नतुश
ह्रादयोस्यैवस्फारस्यत्र किं प्रमाणमित्याशंक्याह शब्दोपिमपुरोय स्माद्वीर्योपचयकारकः तद्धि वीर्यं पं
श्रुद्धेविसित्वत्त्वात्मकेमते शब्द इति शब्दादयः पंचापिहृद्याः संतः यस्मात्परं ब्राह्मणो वीर्यस्य उपचयहेतव
यत्तदैवहिमवेतसोक्रीतिएवपरमेविड्ढासः स्यादित्यर्थः यदुक्तं गीतादि विषयास्वादात्समसो त्रिकः
तात्मनः योगिनस्तन्मयत्वेन मनोरूक्षेत्तदात्मतेति श्रुणेनैवाभिप्रायेण श्रीप्रशस्तिभूतिपादैरपि येये
भावाज्ञादिनःद्रूद्दशपास्रभवासंदराक्तृतयः तेषामद्भुतभवकालेस्वस्यिति परिज्ञाघ्राणमवैत्यायुक्ते एवंयद्य
पोपरंब्रह्मत्वेनस्यात्तदवहितचेतसां कथंनामतद्धिकासोभवेदितिभावः नन्वेवंविधंतत्परंब्रह्म किंवाश
न्तं किंवा चित्रमित्याशंक्याह तदीत्यादि हिशब्दप्रशंकानिह्नवार्थः विस्पष्टत्वात्मकमिति निर्मित्यात्म
कत्वेन सदैवतन्नहि स्वैर्वे विमोहात्संवभावमेवेत्यर्थः मतमिति सर्वेषां नप्रनरत्र कश्चिदपि वसतिकार्त्ते श
त्रयादित्याशयः एवमप्यस्य किं विशेषात्तीर्णस्वरूपमन्तविभ्रमयमित्याशंक्याह तदुलेयतदोजस्वितेप्राणः
सावर्कान्तनाः तदेवतत्तद्रूपतयाप्रस्फुरतीत्यर्थः तदुक्तंतत्र सएषोस्वः सएव प्राणः सएषभूतिस्येति त
थामएषमहस्यास्त्वं चेति तथात्रैवएष प्रजापतिरिति गीतं तद्वीर्यं सर्ववीर्याणां ते हि बलवतो व
ले तदोजस्योजसो सर्वेषामत्रतहेव बलेभवमिति विसृजपतयाचास्य स्फुरणप्रकियावंधे दर्शयति तस्माद्धी ९३

गोत्रजास्तत्स्ववीर्यंकर्मत्रकथ्यते यज्ञादिकेषु तद्दृष्टौ सोषधीषु यतः पुनः वीर्यं तच्च प्रजास्वेवं विसर्गो विश्वरूप-
ता प्रजा इति स्त्रीपुंसादिरूपाः ताश्च प्रजा यज्ञादिकेषु कर्मसु वीर्यं कारणं कथ्यते इति संबन्धः एवमुत्तरत्रापि
योज्यं तदिति यज्ञादिके कर्म ओषधीषु नादिरूपास्ववीर्यं इति शुक्रशोणितात्मनि एवं परं ब्रह्मण एवाजवं-
जवीभावेन मन्त्ररूपतया विश्वकारणत्वमिति तस्यैव तद्धि स्वं रूपमित्युक्तं एवं विसर्गोपि विश्वरूपतेति यदुक्तं
तत्र श्रुत्या ततो रेतसः सृष्टिः प्रजापतेर्वै रेतो देवा देवानां रेतो वर्षं वर्षस्य रेत ओषधय ओषधीनां रेतोन्नमन्नस्य
रेतो रेतसो रेतः प्रजा इति तथान्यत्रापि अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते आदित्याज्जायते वृष्टिर्वृष्टे-
रन्नं ततः प्रजा इति गीतं च अन्नाद्भवन्ति भूतानि पर्जन्यादन्नसंभवः यज्ञाद्भवति पर्जन्यो यज्ञः कर्मसमुद्भवः इति
तदेवं विसर्गशक्तिरेव तत्तदामर्शात्मना स्वात्मनि विश्वरूपतामाभासयन्त्यागमेषु तत्तच्छब्दव्यपदेश्याभव-
तीत्याह शाक्तराशिः स एवोक्तो मातृका सा च कीर्तिता क्षोभ्यक्षोभकतावेशान्मालिनीं तां प्रचक्षते एतदा-
ख्यायात्मना विभक्तानां स्फुटानां शाक्तानामविभागस्वभावः कारणात्मा राशिः मातृकेति पशुभिः सर्वेषा-
मेव मन्त्राणां विद्यानां च यशस्विनि इयं योनिः समाख्याता सर्वमन्त्रेषु संविदित्यादि निरूपितेन रूपेण ज्ञाता
मातेति अर्थः तदेवं स्वात्ममात्रावस्थानादस्य व्याख्याया विसर्गशक्तेरात्मिका द्विधा व्यपदेशाद्दर्शितः द्वया
या पुनर्व्यपदेशान्तरमस्तीत्याह क्षोभ्यादितोभ्यः यतयः क्षोभकानि बीजानि तेषां भावः ह्यभिक्रियायो-
गात्मकर्मरूपः संबन्धः तत्र च आवेशः परस्परसंघट्टात्मा लोलीभावस्तेनाभिन्ना बीजैर्दर्शिता येन यः व्यंजना

श्री
तं.लो.
९४

94

नियमाभावात्तथाविधा सती मालिनी मालते विश्वमरूपं धत्ते इति विश्वमरूपं धत्ते इति विश्वस्वरूपिणीत्यर्थः ननु कथ
मेतावतैवमस्या विश्वस्वरूपत्वमित्याह बीजयोनिसमापत्तिविसर्गोदयसुंदरा मालिनी हि परा शक्तिर्निर्णीता
विश्वरूपिणी ॥ अनुत्तरप्रकाशात्मपराशक्तिरूपा हि मालिनी तद्रूपिमभूतशिवशक्तिरूपयोर्बीजयोन्योर्या समा
पत्तिः परस्परसंघट्टात्मसामरस्यं तद्योगाद्यो यो विसर्गोदयः तेन तेन रूपेण परिस्फुरणं तेन सुंदरा निरतिशया ये
न श्रीपूर्वशास्त्रादौ विश्वरूपत्वमस्या निर्णीतं ननु केवैवानुत्तरा परा संविदस्ति तद्व्यतिरिक्तस्यान्यस्य कस्यचित्
संवेद्यमानतायोगात्तदतिरेकेण शिवशक्तिरूपत्वमपि न युज्यते का पुनर्वार्ता विश्वरूपताया इत्याशंक्या
ह ॥ यथा वस्तुतः एकैव परा कालस्य कर्षिणी शक्तिमद्भेदयोगेन यामलत्वं प्रपद्यते ॥ यथेत्यनुत्तरा संवित् कल
यति शिवादिक्षित्यंतं जगत् संजतीति कालः भैरवः तस्य कर्षिणी स्वात्मात्मतया भासयतीत्यर्थः न हि तदि
च्छामंतरेण किंचिदपि प्रस्फुरेदिति भावः यदुक्तं भैरवः रूपी कालः सृजति जगत्कारणादिकीटांतं इच्छावशे
न यस्याः सा त्वं भवतो विके जयसीति किं तत्प्रकाशामर्शलक्षणं मौपाधिकं भेदमवभास्य यामलतामेति
येन शक्तिरिति शक्तिमानिति च व्यपदिश्यते वस्तुतो हि न प्रकाशाद्विमर्शः सवा तस्माद्दतिरिच्यते इति भ
ङ्गशः उक्तं ननु यद्येवं तर्हि न देवास्तु विश्वरूपतायाः पुनः कोऽवकाश इत्याशंक्याह तस्य प्रत्यवमर्शो यः प
रिपूर्णोऽहमात्मकः स स्वात्मनि स्वतंत्रत्वाद्विभागमवभासयेत् ॥ तस्येति यामलस्य अहमात्मेत्यसांकेतिकः
परामर्श इत्यर्थः परिपूर्ण इति पारमित्येश्वस्य विकल्परूपत्वेस्यादिति भावः विभागमिति विश्वरूपतायामिप ९४

र्थः तथात्वेस्य पूर्णत्वादि शब्दाभिधेयं द्वैविध्यं भवेदित्याह विभागाभासनेनास्य त्रिधा वपुरुदाहृतं पश्यन्ती मध्य
मा स्थूला वैखरीत्यभिशब्दितं अस्येति परावाग्रूपस्याहमात्मनः परामर्शस्य स्थूलेति अपरयोः परत्वे सूक्ष्मत्वे वा
र्थसिद्धं परस्या वाचः पुनरस्यापेहं परत्वेमित्यस्याः परतत्त्वरूपं सैव हि पारमेश्वरी स्वस्वातन्त्र्यादिदंरूपतामुल्लास
यिष्णुर्वाच्यवाचकक्रमानुदयाद्विभागस्यास्फुटत्वाभिव्यक्तेति ईषत्प्राधान्यात्तद्रूपतया पश्यन्तीशब्दव्य
पदेश्या ततदनुवाच्यवाचकक्रमसमाश्रयित्वे विभागत्वेपि स्फुटास्फुटत्वेन बुद्धिमात्रनिष्ठतया दर्शनप्राधान्याद्द्रष्टृ
दृश्ययोरन्तरालवर्तित्वेन मध्यमपदवाच्या ततोपि स्थानकरणप्रयत्नबलात्तत्तद्वर्णक्रमोपग्रहाद्विभागस्य
स्फुटत्वाद्रूपैव प्राधान्याद्विखे शरीरभवत्वाद्वैखरीशब्दाभिधेयेत्यस्या विश्वरूपतावभासने त्रैविध्यं एवं न के
वलमासामेकैकस्य स्थूलत्वादि नात्रैरूप्यं यावदस्त्येकमपीत्याह तासामपि त्रिधा रूपं स्थूलसूक्ष्मपरत्वतः
एतदेव वाक्यस्याः स्थूलोपक्रमं विभजति तत्र यास्वरसंदर्भसुभगानादरूपिणी सा स्थूला खलु पश्यन्ती
वर्णाद्यप्रविभागतः तत्र स्वराणां षड्जादीनां यः परस्परं लोलीभावात्मा संदर्भस्तेन एतत्षड्जाद्येकतमत्वेनि
यतोऽनुल्लिखितवर्णादिविभागतया आलापस्तेन सुभगा माधुर्यातिशयाह्लादरूपात एव प्राथमिकनादस्वभावा
या वाक्या खलु स्थूला पश्यन्ती भवतीति शेषः ननु क्रमात्मन आलापस्य स्थानाद्वाय्वादिसंघर्षक्रमवत्त्वमपि स
भवेदत इति चेत्तदेव किं न स्यादित्याशङ्क्याह वर्णाद्यविभागत इति वर्णाद्यविभागहेतुकमेवास्या माधुर्यमिय
दृशादेवात्र सर्वेषामेवासक्तिः साधुरेव हि लोकोऽनुरज्यतीति विवादः अन्यत्र पुनर्वर्णादिविभागासारूप्यप

श्री॰
सं॰ले॰
९५

95

कृयेचनकस्यचिदासक्तिः तदियानन्तयोः स्वात्मभवतिद्वैभेदइतिभावः तदाह अविभागैकरूपत्वेमाधुर्यशक्तिरुच्यते
स्यात्तुवाद्यादिविषयोर्थास्फुटैतेवचपारुषी तदेवमात्रासक्तिभाजांयोगिनांसहसैवसंवित्तन्मयीभावोभवतीत्या
ह तदसांनादरूपार्थासंवित्संविघट्टनतः सान्नात्येतन्मयीभूतिरुगितयैवोपलभ्यते संवित्संविघट्टनतः इति
मध्यमादेवतत्रहीरूपतयाहरहरूपमनुल्लासात् अतएवगीतादिविषयास्वादश्लाघ्यन्यत्रोक्तं नतुकेषांचिद्गी
तादिवद्विहितचेतसामपितन्मयीभावेभवेदितिकथमुक्तमित्याशंक्याह येषांनतन्मयीभूतिस्तेदोहादि
निमज्जनं अविदन्तोमनसंवित्प्रानास्त्यहृदयइति लोकेहिमातिशयीगीतादौतन्मयीभावनसचमत्का
राणांमहृदयइतिअस्यथापरहृदयगाइतिप्रसिद्धिः प्रसिद्धिः एवंपश्यन्त्याः स्थूलंरूपंविचार्यमध्यमायाआ
प्यभिधत्ते यत्तुचर्मावनद्धादिकिंचिन्नैषयोध्वनिः सस्फुटास्फुटरूपत्वान्मध्यमास्थूलरूपिणी तत्रचर्मा
वनद्धेष्वेशादौषएषयोध्वनिः करघातारूपः घट्टजातेकत्तमहुरूपत्वेनाभिव्यक्तः पूर्वापेतयास्फुटः वर्णादिविभा
गांशस्यसद्भावामाधुर्यमपिसंभवेदितिलोकस्याप्यत्रासक्तिः मध्यायाश्चाविभागांशसद्भावइतिविवक्षिताअवि
भागोबरमयीयत्रस्यात्तत्सुरंजकं नत्रकिमियमपिवपंतीवदाषान्तिंजनयेदित्याशंक्याह यत्रक्वचिदविभा
गोवरमयीअर्थात्तत्वाक्यात्तत्रत सुष्ठुरंजकमासशक्तिजननयोग्यमित्यर्थः तेनात्रायासज्ञातन्मयीभा
वोभवेदितिभावः अनेनस्यायपिवैखर्यांतोभेदउक्तः नस्वविभागएवसक्तौनिमित्तमित्यत्रकिंप्रमाणमित्या
शंक्याह अविभागोहिनिर्दिष्टसैहस्पतोतालपावतः किलाभक्तधनैतस्मिन्वाद्येपरिवृत्यते अविभागएव ९५

हिनिर्दिष्टत्रिनिमित्तं तद्रूपत्वं साक्षात्क्रियतामित्यर्थः न त्वत्र दृष्टमदृष्टं भवतीति भावः किलेति हेतौ यतः तालानां वैखु
टानां पादेशानमास्थिता व्यक्तध्वन्यात्मनि तस्मिन्नविभागरूपे वादनेर्थात्सर्वलोकः परितप्यते निर्दिष्टमिति भजतेऽ
मर्थः तेनाव्यवस्थानुभवप्रवृत्तप्रमाणमिति तात्पर्यं एवं मध्यमायाः स्थूलं रूपमभिधाय वैखर्याश्चाभिधत्ते या
त्स्फुटानां वर्णानां उत्पत्तौ कारणं भवेत् सा स्थूला वैखरी यस्याः कार्यं वाक्यादि भूयसां स्फुटानामिति पदस्य
रवैलक्षण्यव्याख्याने शास्त्राकारपमानामत एव पारुष्यादन्त्रैलोकस्य शक्तिः एवं स्थूलभेदत्रयमभिधाय सू
क्ष्ममप्याह अस्मिन्स्थूलत्रयेऽप्ययथायथं तु संधानमादिवत् पृथक्पृथक्त्रितयं सूक्ष्ममित्यभिधाद्यते अस्मिन्
समनंतरोक्ते स्थूले भेदत्रये ...... जिगामाद्यात्मिकानुरूपमत्र संधानं तदेव पृथक्पश्यंतीमध्यमावैखरी
गीतिसूक्ष्मं भेदत्रयमुच्यते एतदेव क्रमेणोदाहरति घटं जंकरोमि मधुरं वादयामि कं वेवचः तेन जिगाना
विवादयिषाविवक्षात्मिकानुसंधानत्रयरूपमेतत्सूक्ष्मभेदत्रयमिति तात्पर्यार्थः किंचात्र प्रमाणमित्या
शंक्याह पृथगेवानुसंधानत्रयं संवेद्यते किल संवेद्यते इति स्वानुभवसिद्धमेतदित्यर्थः एवं सूक्ष्मभेद
त्रयमुक्त्वा परमप्याह एतस्यापि त्रयस्याद्यं यद्रूपमविभागवत् तत्परं त्रितयं तत्र शिवः परचिदात्मकः एत
स्य जिगानाद्यात्मनः अनुसंधानत्रयस्यापि यदनुपाधिमत् जिगानाद्युपरंजकरहितं मायेत्ररूपमिच्छाया
अपि पूर्वकोटिभूतं संवित्तत्त्वं तदेव परं भेदत्रयं न त्वनुपाधिमत्त्वात्र संवित्तत्त्वभेदस्यावकाशोऽपि न संभवेत्
तत्कथमत्र चिद्रूपत्वमुक्तमित्याशंक्याह शिवः परचिदात्मक इति परचिन्मात्ररूपशिवैकात्म्येनात्र पश्यंत्या।

श्री॰
तं॰ लो॰
९६

96

द्विश्वमवभासयतीत्यर्थः यदुक्तं स्वामिनश्चात्मसंस्थस्य भावजातस्य भासने अस्त्येव न विना तस्मादिच्छामर्शः प्रव
र्तते इति तत्र परस्य निरंशस्य प्रकाशस्य प्रकाश्यस्य विभागेन प्रकाशनं एवं नोपपद्यते तत्रापि त्रैरूप्ये किंनिमि
त्तमित्याशंक्याह अनुत्तरापेक्षैव परापरतया स्थिता तन्मेषशक्तितां नाख्यात परेति निरूप्यते ऋक्त्रयम
यं च भैरवात्मनः परस्य तत्त्वस्य शक्तिरूपतया पूर्वं निर्णीतं अतः षण्णां त्रिके सारे चिदिच्छोन्मेषणात्मके तदे
वत्रितयं शाक्तं भैरवस्य परं महः इति इदानीं विभागावसानमेव प्रपंचयति तदाभ्रूपा भुवनस्तासामुक्ताः षट्
संविभोमलः तासां मितितिसृणां शक्तीनां उद्बं रूपमाश्रित्य षट् इत्नतांतः संविदः पूर्वमुक्ताः तास्त्वब
वेपि स्वस्वरूपप्रशयवादमला अत एव च परस्परं संघट्टनेन संविदंतरावभासनेपि योग्यः तदुक्तं स्वराणां
षट्कमेवेह मूलं स्याद्वर्णसंततौ षड्देवतात्मा ···· एवमेषामास्वर्यरश्मय इति अत आह आसामेक्स
मावेशात् क्रियाशक्तितयोदितात् संविदो द्वादश प्रोक्ता यासु सर्वं समाप्यते तासामेव षण्णां संविदां क्रिया
शक्तितयोदितेन परस्परसंघट्टनेन द्वादश संविदः प्रोक्ताः षण्ढवर्जं संघट्टतरादिरूपापन्नाद्वारेण द्वादश
कात्मनावभासितत्वदित्यर्थः एतास्वेव संवित्स्विति वक्ष्यमाणनीत्या प्रमेयादिक्रमेण परमार्थेन तमवस्थि
तत्वाद् नेति विकल्पस्याभावात्सर्वस्य परिसमाप्तिः तदाह एतावद्देवदेवस्य सर्वं तच्छक्तिचक्रकं एतावता
देवदेवः पूर्णशक्तिः स भैरवः एता एव द्वादशापि संविदः क्रमदर्शनादावन्वर्थेनाप्यभिधानेन दर्शिता इ
ति दर्शयितुमाह परामर्शात्मकत्वेन विसर्गाक्षेपयोगतः इयत्ताकलनाद्वा ताः प्रोक्ताः कालिकाः कवि ९६

त् कलशब्दः कल किल बिल क्षेपे कल संख्याने कल शब्दे इति धात्वर्थानुगमात् क्रमेण कलयन्ति परामृशं।
ति क्षिपन्ति विसृजन्ति हरन्ति च वा एवं यन्ति जानन्ति चेति कालयः ता एव कालिकाः न केवलमेताः क्रमदर्शना।
दावेवोक्ता यावदस्त्रयसहोदरेष्वागमेष्वपीत्याह श्रीसारशास्त्रे या प्रोक्ता मध्यप्रकाशनरूपा परा सृजत्यैन्द्रे
रवात्माख्यायोगिनीद्वादशात्मकं सारशास्त्र इति श्रीत्रिकसारे यदुक्तं परां विकासं मध्ये शावेऽन्ते देहसंवेद
दो चतुर्भुजो चतुर्वक्त्रो योगिनीद्वादशात्मतामिति भैरवात्माख्यामिति विश्वसंहारान्तर्बहीरूपतया पालनप्र
रणात्मका स्वरे स्वन्वर्थानुसरणात् सूर्याणां सम्मता ख्यात्यवभासते इत्यर्थः कालिकानां चयो योगिनीत्य।
नेन नाममात्रेणैव भेदो न वस्तुनीति सूचितं तत्तद्वस्तुपरामर्शरूपत्वमप्यासां संविदां श्रीत्रिकसारेऽप्य
वभैरवेणाभिहितं तत्र हि अथातः संप्रवक्ष्यामि वामिव्याधिष्ठानमनुत्तमं इति वाच एवं प्रायान्यमुपक्रम्य तद्बीजेन
विभिन्ने द्वे पुरे द्वादशाभिः क्रमात् तत्रैव तत्र तथादेविक्षस्याप्युक्तं एतत्स्वशास्त्रे पायात्रिक एव वितत्य विचार
यिष्यते इति नेहायस्तं आसां च यथोक्तं मुख्यत्वेन तदेव प्रपंचयति ताम्यामेव च तत्तः षष्टिपर्यन्तेश शक्तिचक्रकम्
एकारतामसमारभ्य सहस्रारं प्रवर्तते तत्संवत्क्रमभेदेन नामानि बहुधा यासामे तपसाक्ष्यनयाद्वैतव्यामिश्रा
कारयोगात्तः श्रीमत्रैशिरसे तत्स्वकथितं विस्तराद्धि इत्युक्तो लिखितं व्यासभयात् आज्ञपयोगात्तः आगम
इति सामान्येनोक्तं श्रीमत्रैशिरस इति नेन विशेषो दर्शितः उक्तं तत्रैव प्रथमपटलात् देवस्तु सतत्वमिति भा
वः ननु यद्येवं तत् घोरा याः स्तुष्टादिक्रमेष्वेव स्थिताः वाचामयः किमेतामेव स्फारो नैवेत्याशंक्याह ता

स्वी॰ तं॰ लो॰ ५०

97

एवंनिर्मलाःशुद्धाअघोराःपरिकीर्तिताः घोरघोरतराण्यंतमेदंतेनतदात्मकः सृष्टौस्थितौचसंहारेतदुपाधित्रयात्म
ये तासामेवस्थितंरूपंवक्ष्याप्रविभज्यते प्रक्षीणमलत्वेषुविज्ञानकलिकायाश्चयुक्तं निर्मलाःशुद्धाइतितस्यसृष्ट्या
यात्मनाउपाधित्रयस्यात्मयोनात्मा यथैवाघोराद्दशानामपिसंविदात्मनाव्युत्क्रमरूपंप्रविभक्तंतथैवसृष्टा
दिक्रमेणापितिसमस्थितत्वमभिधातंतदुपाधित्रयात्मयश्चैतदुक्तं ननुनाव्युत्क्रमेयोयःसृष्ट्याद्यात्मनउपाधि
त्रयस्यात्मयउक्तः सकिंप्रागभावरूपःप्रध्वंसाभावरूपोवेत्याशंक्याह उपाधयनीतंयदूपंतद्द्विधापुरवोल्लासःप्र
उल्लासाउपाधीनांयद्वाप्रशमयोगतः प्रउल्लासादितिप्रागभावरूपात् प्राकृतोहिनिस्तरंगजलधिप्रख्य
परंतत्त्वंयतःस्वस्वातंत्र्यावाप्तेकाग्रतायामुपाधीनांउल्लासःस्यात् प्रशमयोगात्तःप्रध्वंसाभावरूपात् प्रथमोहि
येत्याह प्रशमश्चद्विधाशांत्याहठपाकक्रमेणच प्रलेपासवस्तादेनसततंज्वलनात्मना शांत्येति शांतेनमधु
रपाकक्रमेणगुर्वाराधनपूर्वसमयादिदीक्षासाधनेनतन्त्रनित्यनैमित्तिकाद्यनुष्ठानतयानदेहांतंसृष्टा
द्युपाधीनामत्ययोभवेदित्यर्थः शांतिःपुनःस्वाभसिकप्रवसृष्ट्याद्युपाधीनांप्रशमोनवाच्यः तथात्वेहिशा
स्त्रायदेशादेरानर्थक्यंस्यात् स्वरसतप्रवृत्तपाधीनांकदाचिदप्यस्यप्रशमस्याभावात् तथालमत्वर्थेसर्वात्मेन
यःसृष्ट्यादीनांग्रामःस्वात्मसत्कारस्तत्ररसोऽदभ्रतातत्त्वेनालेग्रामभैरवादाव्याप्यस्यातएवसततमविच्छि
नतयाज्वलन्यथायथैदाह्यनिष्ठतयादीप्यमानप्राकाश्यंरूपंयस्यैवंविधेनहठेनक्रमव्यतिक्रमरूपेणस
द्गुरुउपदेशात्मनाबलात्कारेणयःपाकःचिदग्निसत्कारःतस्यक्रमःपरिपाटीतेनसृष्ट्याद्युपाधीनामत्ययोभ ५०

भवेदित्यर्थः। इहाखिलसर्वेषामेव तृष्णाद्युपाधित्रयमध्य एव सममिलषणीय इति तत्कार्यन्तमः कथमेभ्य उपायविशे।
षेभ्यो व्याघ्रसंख्यातव्यः सत्वत्रिधेत्यत्राह नत्वेषां नामतामुल्लास एवोपायीनामतः सहकारीयात्मनः सम्प्रहासितानामे
वैषामत्यर्थस्येष्टः प्राक्तमस्योपायविशेषो यथापि शनैः शनैर्दर्हान्तवे तदत्यन्तममलत्यापि समेदशक्तियाता
धिकारेण तृतीयस्य हठपाकप्रशमनस्यैवोपायविशेषस्योपदेशो युक्तः येन झटिति बोधोपाधिविगलनं भवेत्। त।
दाह हठपाकप्रशमनं यत्तृतीयं तथैवच उपदेशाय प्रयुज्यते भेदेन्धनविदाहकम्। युज्यते त्वहेतवः भेदेन्धनविदा
हकं इति अस्यैवदिमहमेव भेदविलापनो सामर्थ्यमिति भावः अत आह निजबोधजठरज्ञात भुजिभावाः सर्वे
समर्पिता हठतः विजहति भेदविभागं निजशक्त्या ते समिंधानाः सर्व एव हि तृष्णादयो भावा बोधाग्नौ हठे
न समर्पिता भेदविभागो विजहति बोधैकरूपतया परिस्फुरंतीत्यर्थः नन्वत्र दिनाम सर्वे भावास्तद्रूपतया।
बोधादतिरिक्तास्तत्किमिति तदेकरूपतया परिस्फुरंतीत्याशंक्याह निजशक्त्या ते समिंधाना इति तेपि बो।
धरूपतया निजशक्त्यातमेव बोधमदीपयंतो भासंते इत्यर्थः अतो बोधरूपत्वे हि तेषामनुध्यमानत्वमेव भ।
वेदिति भावः नन्वेवं किंस्यादित्याशंक्याह हठपाकेन भावानां रूपे भिन्ने विलापिते अशनं तत्त्वमृतसाद्भूते वि।
श्वं संवित्तिदेवताः चिदग्नेर्बोधरूपं सर्वं हठपाकक्रमेण तृष्णादीनां भावानां भेदस्य विलापनादमृतसाद्भूतं
बोधैकरूपतामापन्नं सद्विश्वं संवित्तिदेवताः कवलयन्ति बोधैकरूपतया परामृशंतीत्यर्थः अथ चलो
किको भोक्तृभोग्यव्यवहारो यागादिस्नलक्षिति यहैनेव प्रकृतस्यार्थस्याक्रांतेः ततोपि किमित्याह तास्वत्माः

श्री॰
तं॰लो॰
९८

98

स्वात्मनः पूर्णहृदयैकात्मशायितं चिद्व्योमभैरवं देवमभेदेनाधिशेरते तासु स्वसंवित्तिदेवतास्वात्मनः पञ्चोथरूप
तासाधनेनानन्यापेक्षाः सद्योहृदयैकशायितं सारभूतपरामर्शैकं विश्रांतेमतएव पूर्णमनाकांक्षमतएव
चदेवं येतत्स्वैकसततं चिद्व्योमभैरवं परप्रकाशात्मपरं तत्स्वस्वात्मनः स्वस्वरूपस्याभेदेनाधिशेरते तदेक
रूपतयापरिस्फुरंतीत्यर्थः अथचात्र पूर्ववल्लौकिकोनायकोव्यवहार आहितः नन्वासां चिदात्मनिपरस्मि
न्रूपे विश्रांतत्वात्तद्व्यतिरिक्तस्यान्यस्याभावाद्द्वादशविधंरूपं कुतस्त्यमित्याशंक्याह एवं ह्येतत्क्रियावेशान्ना
मेयाश्रवकृद्धतः आसां बहुविधंरूपमभेदेप्यवभासते कृत्यंरूपायालोचनात्माहृत्तिविलापनादिरूपा अ
भेदेपि बहुविधमवभासतेइत्यनेन कल्पितकावमुक्तं ननु यदि कृत्यादिभेदादासांबहुविधत्वं तद्रूपाया
लोचनात्मकृत्यमपि द्वादशविधमेव तद्व्यतिरिक्तस्य कृत्यांतरस्याभावादित्यासां द्वादशविधादेव रूपान्न्यू
नमधिकं वा रूपं नस्यादित्याशयाप्येवं वृत्तः षष्टिपर्यंतं शक्तिचक्रकमितिकथमुक्तमित्याशंक्याह आसामे
व देवीनां भावापोद्धापयोगात् एकद्वित्रिचतुःपंचषट्सप्ताष्टनवोत्तमैः रुद्रार्ककान्यकलासीनादिप्रभृति
भेदविस्तरः आवापः संक्षेपः तद्धापः विकासः आसामेव हि स्वस्वातंत्र्यात् कमलवदनवरतं संकोचविका
सस्वभाववृत्तिभावः तत्रैकैव दशाग्र्यं त्रयोदशकलाषोडशासीनाअष्टादशास्तोहित्याः तदेतत्स्वसंकाच
उपसंहारागतमुपसंहरति अलमन्येन बहुनाप्रकृते तथ नियुज्यते अशेषस्ववीतवेदेणशोभवोपायप्रतिपा
दनेनतस्य हि मुख्यतया विश्वचिन्मतिविंबवादिनात्रिधारूपेति निरूपितंयेनतदुपासनानांकटितिपवावि ९८

तिवाहंक्रियाकार्यत्वमाकर्मेंद्रियंतन्नत् विसृजामीतिविसर्गस्यानेदफलत्वात् ननुबुद्धींद्रियेष्वप्यहंतानुवे·
धोस्तीतिकस्तेभ्यएषांविशेषइत्याशंक्याह कार्यत्वमेति यथावाहंक्रियाकार्यत्वेपिसामानाधिकरण्येननिर्देशो
यमाशयोयदधिष्ठानमात्रेणेंद्रियमित्यतआह नैवछिन्नकरस्यास्तिहस्तःकर्मेंद्रियात्मकः तेनेतिकार्य
त्वमाहंक्रियामयत्वेनदेहेनेत्यर्थः अहंक्रियावत्सर्वशरीराधिष्ठानेतिनात्यपितथेतिसिद्धं यद्दस्तीति तस्मा
कर्मेंद्रियाण्याहुस्तत्रमाश्रयाणिचमुख्यतः तत्स्थानेहस्तिन्नेमीतिकर्मेंद्रियात्मकोहस्तइतिप्रत्यक्षाधिष्ठाना
तिरिक्तवृत्तिःक··· शक्याधिष्ठानरूपः ननुयद्येवंतत्कथंपंचांगुलावेवपाणींद्रियतयाव्यवहारइत्याशं·
क्य तस्यप्रधानाधिष्ठानेयत्पंचांगुलिःकरः प्रधानेत्यनेनाप्रधानमप्यधिष्ठानांतरमस्यास्तीत्यावेदितं
अतएवछिन्नकरादेर्ग्रीवादिनाप्यादानंस्यात् नचतिर्यगादीनांमुखेनाप्यादानेसंभवेत् किंतुनतत्पाणी·
द्रियकरणकआत्मनोहिभोगायतनंशरीरं तैस्तैःस्वावयवैर्वर्तनकर्महलोपभोगंसंपादयतीत्याशंक्याह सु·
विनापियदादानंतत्रयत्करणंस्थितं सपाणिरेवकरणंविनाकिंसंभवेत्क्रिया ततोत्यादानक्रियायाःसि·
द्धमिति ननुजंतुमुखादि अत्रद्वितीयाकृत्या प्रकृतार्थनिवेशिकरणत्वंवाच्यं प्रकृतार्थश्चमुखेनवत्त·
स्यकरणतायुज्यतेभौतिकतयाकर्त्रंशास्पर्शमूलत्वात् नचकर्तृभेदेकरणंभवतीति समनंतरमेवा
यपादितं तेनतल्लक्षितानाम् तदधिष्ठानमेवकर्त्रंशस्पर्शिकिंचिदभ्युपेयंचतुर्थीयार्थःकरणत्वपर्यव
सेयत् तस्मपाणींद्रियमित्युक्तं सपाणिरेवेति ततस्त्वधिष्ठानमात्रपाणिनायमभिप्रायमीषद्व्यवहारादादिना

श्री·
तै·लो·
५५
99

दृष्टेलक्ष्मणोक्षिणाशिष्वितिश्राद्धप्रलपितमेवपरैः नन्वदृष्टंसुखादिलक्षणमदृष्टेनकारणंकल्प्यं लक्षणकल्पविशेषेच
लक्षणःलक्षणपरिग्रहः इतिन्यायेनलक्षणपरिग्रहएवनाय्यइति किमेतदुक्तं इत्याशंक्योक्तं करणंविना किंसंभवे
त्क्रियेति सुखादिष्वव्ययवत्तयालक्षणं नकरणतयानद्यप्यतथाभावोप्युत्पत्तेस्तदुक्तं अतस्मान्नदेवकरणत
याकल्प्यं यदकृतकारिका क्रियानसंभवेदित्याह तथाभावेतदुक्तहेतोरपिकिंस्यात्तथापत्ने तत्साध्याहेतौ न
बुद्धिःकरणापेक्षत्वादानाद्यपिकरणापेक्षमिति किमिदंचाश्रीनपंचाशदिवसाध्यतेइत्याशंक्याह दर्श
नेकरणापेक्षक्रियावदितिचोच्यते परैर्गमोत्क्रमणेनेष्यतेचेतिविस्मयः परैरिति नैयायिकादिभिः यदाऽ
र्गधाद्युपलब्धिक्रियाकरणपूर्विका क्रियात्वाच्छिदिक्रियावत् इति गमादिरिति पादेंद्रियहन्त्रात्मिकायांग
मनक्रियायामित्यर्थः एतस्मात्दानादेरप्युपलक्षणं विस्मय इति एवंहिक्रियात्वस्यहेतोरनैकांतिकत्वेस्या
यदपिकरणपूर्विकापिगामिक्रियाभवेदिति अतश्चदर्शनक्रियायामपिकरणपूर्वकत्वेनसिद्धादित्याश
र्येमिदंनैयायिकस्य यदितःसंधीयमानमितश्चत्रुटतीति इदंचास्यमहाश्चर्यं यदेतद्दर्शनेगमनादिकमेव
पंचधाकर्मज्ञानादेरेवचात्मनोनवधाविशेषगुणः तत्रश्चक्रियायामपिगमेनकरणपूर्वकत्वे गु
णात्मनोज्ञानस्यचकरणपूर्वकत्वमित्यपूर्वमभिधानमिति तदाह गमनोत्क्षेपणादीनिमध्येकर्मोप
लंभने पुनर्गुणक्रियात्वेसर्वेवैयाकरणदर्शने उपलंभनमितिदर्शनात्मज्ञाने यदुक्तं उत्क्षेपणापक्षेपणा
ऽकुंचनप्रसारणगमनानिपंचैवकर्माणीति बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावनात्मानोविशेष

गुणाश्चेति च नन्वज्ञानान्नेत्यतोऽर्थः क्रियैव ज्ञानं न गुण इत्याह क्रियान्वेषेत्यादि वैयाकरणैरेवमाचक्षाणैर्न ज्ञा-
यते यस्य क्रियावचनो धातुरिति सामयिको नियमः नैयायिकादेः पुनर्ज्ञानस्य गुणरूपत्वमथ पाठकक्रिया-
मेवमभिधानं संगच्छतां अतश्चैतदस्य स्ववचनविरुद्धमेव यद्गुणत्वेऽपि ज्ञानस्य क्रियात्वात्कारणपूर्वकत्व-
मभ्युपेयते न क्रियात्वेऽपि गमनादाविति तदाह क्रियाकरणपूर्वेति यथा व्याकरणपूर्वकं ज्ञाने नादानमि-
त्येतत्स्फुटमौर्व्यविजृम्भितं श्रोत्रविजृम्भितमिति पूर्वापरापरामर्शात्मायमोहैश्च इत्यर्थः नन्वनवद्यं गमनादा-
वपूर्वकरणपूर्वकत्वमुपगच्छामः किं तु नियतपादेन्द्रियादिकरणपूर्वकत्वं नेच्छामः यत्पूर्वं तच्च येऽपि जात्वा-
दिना वाञ्छन्ति उदराश्मरोगाणापीति तदाह तस्मात्कर्मेन्द्रियाण्यपास्तत्वद्वा ष्ठीरिति स्तुत्यन्तः तस्यानेहत्तिमेत्ती-
ति मातंगयोगरोगमम तस्माद्यथोक्तपञ्चापादादेरधिष्ठानमात्रस्य पाय्वादीन्द्रियत्वाभावादेतोऽस्त्वगिन्द्रियवत्रितिवल
शरीरव्यापकानि कर्मेन्द्रियाण्यहैकादिकेन्द्रियवादिनः समाचक्षुः किं तु तस्मिन्पादादेरधिष्ठानात्मनिष्ठा-
नेस्तुत्यतेऽतूत्तिमेत्ति येन सर्वेषां तत्र वेन्द्रियत्वाभिमानः वस्तुतः पुनः सकलमेवेषां शरीरमधिष्ठेयं अतएवैषां
यत्र क्वचन कार्यदर्शनमविरुद्धं न चैतदस्माभिः स्वोपज्ञमित्युक्तं मातंगयोगरवोऽस्मेति मातंगशास्त्रव्याख्या-
तारः श्रीमदनिरुद्धप्रभृतय इत्यर्थः नन्वभवत्येवं यक्तत्वादिकाः क्रियाः पादादिकरणपूर्वकत्वे विनापि न सिद्ध्य-
तीति पञ्चैव कर्मेन्द्रियाणीति न युक्तो नायं नियमो यदन्यान्यपि ज्ञानान्यापतन्ति निगरणादीनां कर्मान्तराणामपि
भावात् यदाहुः कण्ठेन निगरणेन स्तनेन कलशालिंगनादिना वक्षः भारवहनेनांसद्वयमिन्द्रियमुच्यते न कथं

श्री॰
तं॰लो॰
१००

100

मिति तत्कर्त्रादेरपि निरवग्रहणादिक्रियान्यथानुपपत्त्या कर्मेन्द्रियवर्गं वाच्यमित्यपरिनिष्ठितानि कर्मेन्द्रियाणि संतिभूयो
ऽपि तत्कृते करणान्यपि वाच्यानि न चाचारेषु निष्ठितिः ननु किमिह तेनोक्तेन फलं यदन्यैरेवं तन्नविहितमित्या
ह नन्वेवं तत्र वेदपालाद्यैर्निराकारि न कर्मणां यत्साधनं तदात्तं स्यात्किं तत्कस्यापि कर्मणः खेटपालाद्यैरिति स
द्योज्योतिःप्रभृतिभिरित्यर्थः यदाहुः आनंदादिभिरेभिस्तत्कर्मभिः परिभाषितैः कर्मेन्द्रियाण्यनेनैषामानंत्यं
कर्मणां वशादिति एतदेवाह वस्तुरूपं निरूपयितुमुच्यते यत्कर्मसाधनं तत्कर्मेन्द्रियमिति अपि तु यान्येषामानं
दादीनां कर्मणां साधनानि तानि कर्मेन्द्रियाणीति न चैतदस्माकमावलकं साक्षात्समाधानमित्याह एतत्रा
स्मत्कृतप्रश्नस्य संतापशान्तये न त्वस्वच्छमतप्रायैर्जलैस्तृप्यंति वर्हिणः एतदस्माकं प्रकृतप्रश्नस्य सा
संतापं शमयितुं नालमित्यर्थः एवं हि पराभिमतानि कर्मेन्द्रियाणि करणान्तराणि च मंतीस्पर्यंतं भवन्तीति
ननु यद्येवं तर्हि किमत्र प्रतिसमाधानं यद्वा हृशामावर्जकं स्यादित्याह उच्यते श्रीमदादिष्टं शंभुनाथमुखान्मम
स्वच्छसंवेदनोदारविकल्पप्रबलीकृतं स्वच्छेत्यादिना विशेषणद्वारेण स्वसंवेदनसिद्धत्वलक्षणो हेतुः तदा
ह इह कर्मानुसंधानबलादेकं विभज्यते तत्रानुसंधिः पंचात्मा पंचकर्मेन्द्रियाण्यतः तत्रेति कर्मभेदेऽपि मितानु
संधानुभेदमतीत्यर्थः पंचात्मेति पंचप्रकारः अत एवानुसंधानस्य पंचप्रकारत्वात् तत्रानुसंधानभेदकृतं क
र्मभेदं तावदाह त्यागादानसंपन्नैद्वयाय द्वितयं विना स्वरूपविश्रान्तिकृते सत्यर्था कर्मयाऽद्धिः पायुपा
ण्यंघ्रिजननं करणं तस्य तद्विधं अंतःप्राणाश्रयं यत्तु कर्मात्र करणं हि वाक् इहावल्ल सर्वस्यैव हेयहानाया

१॥

दानाय तदुभयरूपा यतदुभयरूपतयापरिहारेण स्वरूपविश्रांतये वा तत्संपिण्डतर्थाभियते इति तन्निमित्तं कर्मा
पित्तथा भवेत् यद्यस्मादेवं विधं कर्म तत्तस्माद्वहिः कर्मणा पायूपादपाणिप्रवर्तनसंयोगे चतुर्विधमेव करणं भवती
ति संबंधः यद्यपि सर्वक्रियाणां संयोगविभागावयवत्वमस्ति तथापि विशेषतो गतिक्रियायां ग्रामसंप्राप्त्यादिलक्ष
णैकफलोद्देशेन प्रवृत्तायां तस्यां तत्तद्देशत्यागपुरःसरीकारेण देशांतरादानमेव रूपमिति हानादानात्म
कैककर्मविषयत्वेपींद्रियस्याभिधानाद्द्वयायेमुक्तं स्वरूपविश्रांतिश्चात्र निष्ठात्मपरपर्यायानंदानभवमात्ररू
पतोच्यते तत्र हि कथं विआरोपादानपूर्वकत्वेपीदं हेयमिदमुपादेयमिति हानाभः प्रकाशयेत् प्राणश्चायमि
ति वाचो हि प्राण एवाधिष्ठानमिति तमेवाधिकृत्येयं वचनक्रियायां साधकतमताभिधानात् त्यागादिवत्
र्विधमपि कर्म लब्धसत्ताकस्य भवेत् सिद्धमेव हि वस्तु त्यज्यते चोपादीयते च विश्रांतिधामतयावमीयते
वचनात्मकं पुनः कर्म शब्दजननमेवाभिधीयते इत्यस्य पूर्वेभ्यो विशेषः अत एव तत्र शब्दो व्यतिरेके न तु प्रा
ण एव विचित्रस्थानकरणसंयोगविभागाभ्यां विचित्रवर्णात्मकं शब्दं जनयेदिति किं वागिंद्रियेणास्यात् यदा
वायुर्नाभेरुत्थितः उरसि विस्तीर्णः कंठे विवर्तते मूर्धानमाहत्य परावृत्तो वक्त्रे चरन् विविधाञ्छब्दानभिव्यन
क्तीति नैतत् एवं हि विचित्रवर्णात्मकः शब्दः सर्वकालमुच्चरन्नेव भवेत् न हि सकोपि कालक्षणोस्ति यत्र
प्राणस्तत्तद्विचित्रस्थानकरणसंयोगविभागाभावेन प्रवर्तेत तस्मात्तदतिरिक्तेन वागिंद्रियेणभाव्यं यदः
धिष्ठानात्प्राणाः शब्दजन्मनि प्रभवेदिति तथा चनेति ननु बुद्धींद्रियाणामालोचनं प्रति विस्रंकेकर्मेंद्रियाणां

श्री·
त·लो·
·१

काहृतिरित्याशंक्याह उक्तः समासतस्तेषां विशेषः कार्यप्रवृत्तिरूपः विशेषस्तिहस्तादिरूपत्वात् समासतइति नि·
खिलकर्मान्तरस्वीकारात् नचैतदतिरिक्तं कर्मान्तरं किंचित्संभवेत् इति भावः अत एव कर्मान्तराभावात्करण
नरमपि न प्रकल्प्यमतावतैव तत्स्वीकारसिद्धेः तदाह नचैतद्यतिरिक्तं हि न कर्मकापिदृश्यते तत्कस्यार्थे
प्रकल्प्येयमिन्द्रियाणां संनिपातिः कस्यार्थे इति किमर्थं इत्यर्थः ननु एवं पंचकर्मेन्द्रियाणि चैवैषां नियतानाह
नायाहृत्वय इत्युक्तं तदेषां पाणीनां विहरणमपि पादेन चादानमपि तथान्यो न्यस्य वृत्तिमात्रकार्यं कृतस्या·
मित्याशंक्याह एतत्कर्तव्यं च तेनत्इसंकार्येण कृवर्त्तते अस्तिभिणमहस्तस्यात्र उच्यते संकरो जडः तदेतद्विहरा
नादानादि असंकर्येणेति नहि विहरणं पाणिः करोति आदानं वा पादः किंत्वेकस्मिन्नेवाधिष्ठाने पादः पा
णिश्च विहरणं चादानं च यथाक्रमं कुरुतः सर्वशरीरव्यापकदेशपि चांगुलादेश्च शरीरावयवस्य सात्वाधि
ष्ठानत्वात् सहृदृशानेकाधिष्ठानगतेनेत्यर्थः जात इत्यधिष्ठानाधिष्ठे च किमभासमज्ञानानां इत्यर्थः एवं
हि चक्षुः श्रवसामेकस्मिन्नेव गोलके दर्शनश्रवणशक्तिसंभवाहृतिसांकर्येण बुद्धीन्द्रियाणामपि भावो
भवेत् एवमहिपादादिमते प्रतिपक्षमतमेवोपसंहरति उक्तं इन्द्रियवर्गोयमहंकारात्सात्त्विकराजसात् अथ
मितिक्रान्तत्वात् कर्मेन्द्रियरूपः एवमहंकारस्य सात्त्विकराजसतामसत्वं प्रकृतिस्कंदतामभिधाय तामसत
याप्याह तमः प्रधानाहंकारात्कार्यात् भूतादिनाम्नस्तन्मात्रपंचकं भूतकारणं भोक्तृशक्ति
ह्लादनात्मनः इति भागेनांशत्वेनोद्भूततया प्राधान्यात् अस्यैव भूतादिनामतन्मात्रकारणत्वात्कारणतो

निमित्तमित्युक्ते भूतकारणमिति उक्तं च शब्दः स्पर्शश्च रूपं च रसो गंधश्च पंचमः गुणा विशिष्टास्तन्मात्रास्तन्मा
त्रपदयोजिताः प्रकाशकर्मेन्द्रियवैलक्षण्यात्तमोभवाः प्रकाशात्मकाश्च भूतादिरहंकारो यत्तामसः इति न
नु कथमेतदुक्तं यद्राजसादहंकारात्कर्मेन्द्रियवर्गो जात इति एवं हि संख्याः प्रतिपन्ना वैनोयत्सात्त्विकादहं
कारान्मनोबुद्धिकर्मेन्द्रियवर्गः प्रवृत्तः तमसात्तन्मात्रवर्गो राजसात्तु न कमप्यपीति यदाहुः सात्त्विक
एकादशकः प्रवर्तते वैकृतादहंकारात् भूतादेस्तन्मात्रः स तामसस्तैजसादुभयमिति तदाह मनोबुद्ध्य
न्तकर्मास्त्ववर्गास्तन्मात्रवर्गकः इत्यत्र राजसाहंकृद्योगः संश्लेषको द्वये प्रत्यहये इति इंद्रियैकादशके तन्मा
त्रपंचके च संश्लेषक इति कार्यजनने न्यात्माद्यात्मसंधानाधायकत्वात् सात्त्विकोऽप्यहंकार इंद्रियभावेन प्र
वर्तमानो निष्क्रियत्वाद्राजसं प्रवर्तकमाकांक्षति तामसोऽपि तन्मात्रभावेन प्रवर्तमान इति ॥ ननूक्तम
नैमेडांतिकेन मतेनोपन्यस्तेन सांख्यमतेन वा इह खलु सर्वं शास्त्रमधिकृत्य सात्त्विकस्य कार्यकार
णभावस्य निरूपणं प्रक्रांतं न तच्च तत्त्रियात्तैजसात्तस्मात् मनो दशमं जायत वैकारिकास्तेन्द्रियाणि त
न्मात्राणि तृतीयकादित्युक्ते एवमाशंकामभीकृत्य तत्रैव व्याख्याभेदं तावद्दर्शयति अन्ये त्वाहुर्मनो ज्ञा
नेराजसाहंकृतेर्यतः समस्तेंद्रियसंचारश्चलत्वं लघुवेगवत् अन्ये तु सात्त्विकात्स्यात्ते बुद्धिकर्मेंद्रियाणि त
राजसाद्वाहंकारात्साभागास्पर्शी निमत्त्वे ते राजसाहंकृतेरिति तैजसाद्याभिहितायाः बाह्येंद्रियाणि
वमनोधिष्ठितान्येव स्वविषयेषु प्रवर्तिततोऽन्तरत्नेइत्युक्ते लघुकृत्वा समस्तेंद्रियाधिष्ठितत्वादिहादेशा

श्री॰
तं॰ लो॰
१२

मित्युक्तं यद्यपि प्रायेणान्यैर्गुणपञ्चानामुत्पत्तिर्मनसो लिंगमित्युक्तं ···· तत्र स्वगंधिष्टीतलो दीर्घो मशत्रुनशुष्का
शष्कुली कपिलब्राह्मणः संनियुगतसंच तुड्डयश्यादिभिरपायुगपज्ज्ञानोत्पादेऽपि हृश्यते शल्याशंक्योक्तं वेगवदिति
आशुसंचारीत्यर्थः तेनोत्पलदलशतसूचीव्यतिभेदन्यायेनाशुस्थितोऽपि क्रमो न विभाव्यते भावः एवं चास्यैकि
यावन्नाद्रेको गुणान्वयश्लतियुक्तत्वमुक्तं राजसान्मनो जातमिति एवं परिशेष्याद्वैकारिकशब्दाभिहतत्वात् तेजा
सो द्विप्रकाशरूपत्वात्तथात्वमित्येवमुक्तं राजसादिति वैकारिकहृतशब्दाभिहतत्वात् विशिष्टक्रियाश्रयात्वा
त्सैवमभिधाने अतएव तत्त्वे संपत्त्वाद्भाहकर्माण्यस्पर्शीनीत्युक्तं सैंधांतिकास्तु नैतेऽनुमन्यंते इत्याह केचित्पा
लास्त्वमन्यंते कर्मेंद्रियगणः स्फुटं राजसाहंकृतेर्जातो राजसाकर्मतायतः राजसाहंकृतेरिति तत्पुनः सात्त्विका
हंकृतेः कारणानुविधायित्वं हि नाम तत्कार्यत्वे हि नियामकं बुद्धींद्रियवर्गस्य प्रकाशः कर्मेंद्रियवर्गस्य कर्मेहा
दिति तथाऽनुत्पादेवाहंकारादनयोरुद्भवोऽन्याय्यः यदुक्तं समनोबुद्धिदेवानां गणो यस्मात्प्रकाशकः तस्मा
त्सात्त्विकाज्जातः स्यादनुत्पादहंकृतात् इति राजसस्तेजसस्तेजसाद्वर्गः कर्माज्ञाणां तु कर्मकृत् जातः कार्यस्य
येनेहकारणानुविधायितेति च अन्यथा पुनरेषां संभवेत्क्रमे सर्वविकारेषु कारणाव्यवस्थाप्रसज्येत एवंहितन्
मात्रवर्गस्यापि तस्मादेव कर्मान संभवेत्तामसाद्वाहंकाराद्वर्गद्वयस्यापीति यदाहुः विनिवारयितुं शक्यानां
व्यवस्थाविकारयोः सात्त्विकात्संभवेत्क्रमे सात्त्वराजसवर्गयोरिति तन्वास्तामेतत् न वयमत्र विप्रतिपद्यामहे
चित्रो हि कार्यकारणभावस्तदुपपादितं श्रीपूर्वशास्त्रे पुनः किं न्यायमिति चिंतनीयं तदधिकारेणैव हि तात्त्व

कः कार्यकारणभावो निरूपयितुमुपक्रान्तः अत आह श्रीपूर्वशास्त्रे तु मनो राजसात्सात्विकात्पुनः इन्द्रियाणि समस्तानि
युक्तं चैतद्विभागिनः श्रीपूर्वशास्त्रे तु पुनरेतद्देवयुक्तमस्माकं विभाति यन्मनो राजसादहंकाराज्जातं बुद्धिकर्मेन्द्रियाणि
तु सात्विकादिति वा व्याख्येनभिन्नक्रमः युक्तत्वमेवास्योपदर्शयति तथा हि बाह्यवृत्तीनां महताणां वस्त्वाभासने आलो-
चने शक्तिर्वै तद्योजने मनसः पुनः बाह्यवृत्तीनामाहरणामिति बाह्यानां चक्षुरादीनां दशानामिन्द्रियाणामित्यर्थः
एषां चाविकल्पनिजवृत्तिभासनात्मन्यालोचनमात्र एव सामर्थ्यमित्युक्तं वृत्तिभासने आलोचने शक्तिरिति वस्त्वा-
ति पाठे तु तदर्थग्रामात्मनीत्यर्थः इयांस्तु विशेषो यद्बुद्धीन्द्रियेष्वालोचनानुपाती वचनादिरूपः क्रियांशः परिस्फुरति
समस्त एव बुद्ध्यादिप्रमातृविश्रान्तिमन्तो भेदाभेदमयसंबंधमूलोन्तर्योजनात्मा मनसो व्यापारः क्रिया हि बहि-
र्बहूनां क्रमिकाणां क्षणानामेतः प्रमातृमयतयैकतानाम न चाविकल्पदशायामेवं भावो भवेदेकैकस्मिन्ना-
भासे तेनानुभवस्य वृत्तेः तेन वयमहमित्यादौ संभवतः प्रमातुः प्रथमविकल्पतया वचनादिविषयस्य शब्दादेः कथं
ग्रासस्पर्शाविरोहरणकार्यो ग्रासस्पर्शेन्द्रियादीषत्परिस्फुरणं नाम कर्मेन्द्रियाणां व्याप्तिर्येनास्य मूकादिवैलक्षण्ये
स्यात् वचनादिक्रियात्तु वैकल्पिकतया मयाप्रमातुर्मानसमेव व्यापारः नन्वत्र किं प्रमाणमित्याशंक्याह उक्तं च
गुरुणा कर्यात्मनो न व्यवसाययेत् तद्ध्यालंबनामात्रव्यापारात्मा क्रिया इति गुरुणेति श्रीप्रत्यभिज्ञाकृता
यदुक्तं तत्र तद्ध्यालंबनाप्यतामनो न व्यवसाययेत् करोति मात्रव्यापारमयीः कर्मादिकल्पना इति मन एव हि
कल्पनानेन्तरं चक्षुरादिव्यवमितमप्यर्थमनुव्यवस्यन्निश्चयदशामधिशाययन्तदेकानेकरूपं द्वयमवलंबमाना

ते·लो· ·२

पतः क्रियाद्विकल्पनाः क्रमेण पत्नावमेवचमायाप्रमातः प्रमातृत्वमित्युक्तं मातृव्यापारत्वाइति निर्विकल्पदशायां
हि मायमेसरोभावः पश्चात्पीतादिनीत्यातत्तदर्थजातमभेदेनैवपरिस्फुरेदितिकथं भेदाभेदमयलोकयात्रानिर्व
हेत् तन्मात्राणि पुनरजभृतादेस्तामसादेवाहंकारादित्याह तन्मात्रत्वगुणे धीतत्प्रधानायाग्रहंकृतेः नन्वत्रावैक
मेंद्रियवत्तन्मात्रोपिवर्गः सात्त्विकादेवाहंकारात्कथंनोदियादित्याशंक्याह अत्राविवादः सर्वस्यग्राह्योपक्रमण
वहिनयत्रकश्चिद्विप्रतिपद्यते यद्वरणात्मनोग्राह्यस्योपक्रमइति अतएवायंप्रकाश्येन तत्प्रकाशकः तदस्य
सात्त्विकादहंकारात्कथमुत्पत्तिः स्यात् तदुक्तं मात्रावर्गोप्यहंकाराद्ग्राह्यविलक्षणः प्रकाशस्तामसस्तस्माज्जातो
भूतादिसंज्ञितादिति तन्मात्रवर्गमेवविभज्यदर्शयति शृथिवासैमभान्यादिविचित्रंगेयमंडले यत्सामान्यंहिरा
थमंगेयतन्मात्रनामतत् अन्यदसौरसमम् आदिशब्दः प्रकारे तीव्रमंदादेस्तन्नयुक्तत्याद्रुतद्रुतत्वादिसंबंधिनश्च
गेयस्यग्रहणं तदुक्तं भूपालीतायोञ्जुगत्वमजपञ्चानमदिरागेयसंयुतेति विचित्राइति विशेषणत्वनीत्यर्थः सा
मान्यमित्यविशेषः अविशेषनिर्दिष्टैरेवहि विशेषैर्भाव्यमितिभावः अतएवचविशेषाद्भिन्नविशेषतयास्यगेयादे
वकेवलस्तन्मात्रत्वमुक्तं तच्चसामान्यरूपत्वादेवाशेषविश्वार्थयाद्यापीत्याह व्यापकं ततएवोक्तं महत्त्वान्नतध्रु
वं स्वकारणेतिरोभूतिः ध्वंसोयत्तेनत्वाध्रुवं नचैतद्देशानवच्छिन्नत्वात्कालेनाप्यनवच्छिन्नमित्युक्तं महत्त्वान्नतध्रु
वमिति ह्यनेकेहिनजातुनित्यं भवेदितिभावः यद्यप्येतेविनाशादर्शनाभावान्नैतद्धिनश्वरमित्युक्तं नाध्रुवमि
ति यस्मात्स्वस्मिन्नेतेस्वस्मिन्नेवकारणेप्रलीनत्वेनाप्यनाशः यदंतर्विपरिवर्तिनएवार्थस्यबहिरवभासोनामकार्यं

तेषु नस्तेष्वेव विश्रान्तिर्नाशः इति तेनैतत्कूटस्थनित्यं अपि तु परिणामीति सिद्धं एतदेवान्यत्राप्यतिदिशति एवं रसा
दिशब्दोऽत तन्मात्रेष्वपि योजना नतु किमेभिः परोक्षो विशेषैर्विशेषाणामेव प्रत्यक्षाग्रमुपगम्यन्तां यद्वशादियं सकले
कलोककयात्रासिद्धेत्याशंक्याह विशेषाणामित्यतो वशेषे शास्त्रीया विशेषाणामेव स्यमिति कार्यापेक्षयादिकार
णेनभावमिति भावः एवमिति प्रकृतिरूपतां निरूपयति तत्रेति तेषु शब्दतन्मात्रे चित्राकाराः कृतीर्दधत् नभः शब्दा
वकाशात्मा वा व्याप्याससहो यतः तदेतत्स्पर्शतन्मात्रयोगात्सहितो भमागते वायुतामेतीति तेनात्र शब्दस्पर्शाभ्य
मना तदभिन्नमिति कार्यजननोन्मुखमित्यर्थः चित्राकारविशेषरूपाः कृतीर्दधदित्यनेनास्य शब्दैकगुणत्वमु
क्तं नतु शब्द एव कथं नभो भवेदित्याशंक्योक्तं शब्द इत्यादि यतः शब्दावकाशात्मा अवकाशात्मत्वान्नभसो गुण
कारणमित्यर्थः अवकाशात्मत्वेप्यसहे तर्वा व्याप्यासमहः इति तेन यथा शब्दः स्वात्मनि वा व्यस्य महत्वादव
काशतां ददाति तथा तत्कार्यमाकाशोऽपि सर्वस्येति तदिति शब्दतन्मात्रे तेनेति शब्दस्पर्शतन्मात्रकारणत्वेन
हेतुना शब्दस्पर्शाभ्यामनेनेति शब्दस्पर्शाभयगुणत्वमित्यर्थः नन्वस्येराकाशैकगुणः शब्द इत्युक्तं यदाहुः तत्रा
काशस्य गुणाः शब्दसंख्यापरिमाणपृथक्त्वसंयोगविभागा इति तत्कथमिह वायोरपि तद्गुणत्वमुच्यत इत्याशं
क्याह अन्येत्वाहुः ध्वनिः स्वैकगुणस्तदपि युज्यते यतो वायुर्निजं रूपं लभते न विनास्वरात् उक्तोत्तरभूतेषु पूर्व
पूर्वस्थितिर्यतः तत एवमक्षोत्तरवियोगो मिथः स्मृतः तदिति शब्दस्याकाशगुणत्वे यतो वायुरेवं विना नि
जं रूपमेव न लभते तत्सहचरितस्वभाव एवेत्यर्थः यद्वत्तरोत्तरस्मिन्वाय्वादौ भूतेषु पूर्वपूर्वस्याकाशादेः स्थितिरिता

श्री
तं.लो.
५

काशस्य वायोश्च परस्परमवियोगः स्फुट इति तदुक्तं अत एव स्पर्शोऽपि वायुस्तथा चोत्तरोत्तरस्य पूर्वं पूर्वं कारणमाहुरिति य
तश्च तत्सहचरितस्याकाशस्यैव वायोः स्वात्मतया गुणो वायोस्तु तन्मात्रं स्पर्श एव भवतीति शब्दस्पर्शौ तद्रूपेण समं प्रतो
भमाणौ तेजस्तत्त्वे त्रिभिर्धर्मैः शब्दः पूर्ववदेव तत्र तैस्त्रिभिः सरसैरापः सगन्धैर्भूरिति क्रमः त्रिभिर्धर्मैः रूपलक्षितं पू
र्ववदित्युत्तरोत्तरस्मिन्भूते पूर्वस्य पूर्वस्य व्यक्तानां यथा वायावनुप्रवर्तितः शब्दो गुणस्तथा तेजस्यपि शब्दस्पर्शावनुप्रव
र्तितौ रूपं तु मुख्य इत्यर्थः सगन्धैरिति ..... तैश्चतुर्भिः तदुक्तं स्तिमिताच्छब्दतन्मात्रात्तमथ्यासावकाशदानात् आका
शं ज्ञातमेकेन गुणेनैवोपलक्षितं शब्दस्पर्शगुणानां तत्स्तिमितानां समीरणः गुणेर्द्वाभ्यां तत एवास्य हृशेपतेवीरवंदिते
शब्दस्पर्शालोकगुणैः स्तिमितैरनलोद्भवः त्रिगुणत्वमतस्तस्य प्रशंसन्ति त्रयीविदः शब्दस्पर्शरूपरसैः स्तिमितैर्वारि
संभवः चतस्रः शक्तयस्तेन वारिणो वरवर्णिनि शब्दादिभिः पंचभिश्च स्तिमितैर्भूसमुद्भवः तेन सर्वगुणा भूमिः सर्व
देव विभाव्यते इति ननु गंधादिगुणग्राम एव भूम्यादावुपलभ्यते न तु तदतिरिक्तं किंचिदित्यादि तथात्वे वा गु
णगुणिनोः किंचिज्ज्ञाते यमभ्युपगंतव्यमित्याशंक्याह तत्र प्रत्यक्षतः सिद्धा धरादिगुणसंचयः गुणसंचय इति गं
धादिगुणव्राताभिन्नत्वात्तद्रूप इत्यर्थः तदुक्तं इयं यथोक्ता गंधादिव्राताद्भिन्ना धरादयः प्रत्यक्षसिद्धा लोके स्युरिति
न हि धरादीनां तदतिरेकेणोपलंभ एव भवेदिति भावः तदाह नहि गंधादिधर्मौघव्यतिरिक्ता विभाति भूः गंधा
दीनामन्यतमस्य ग्रहे हि धरादिबुद्धिर्जायते नान्यथेति गंधादिभ्यो धरादीनामव्यतिरिक्तत्वं यस्मिन्नपहृते हि
हृस्तेन तत्तेजलादिवद्भूः तदुक्तं नापहृतैस्तु गंधाद्यैर्जातु वेज्जायते मतिः धरित्र्यादिजलादीनामग्रहेऽपि प्रजा

यते गंधादिसन्ततोनाम्यालज्ञानिभिः पृथक्भूरिति नन्वगंधादयश्चेद्गुणतद्ग्राह्यग्राहकरूपत्वान्नैषांक्रमेणोपलंभो।
भवेदित्याशंक्याह यथागुणगुणिनोर्भेदवादिनामेकमप्यदः चित्रंरूपंपटेभातिक्रमाद्धर्मास्तथापिवि ड्रावल
कणादादिगुणगुणिनोर्भेदेपि यथैकमपिस्थूलंहरितनीलादिमयतायाचित्रमिदंरूपंरूपाख्योगुणो यथाय।
थमुद्देशमात्रेणगुणिनिपटेक्रमेणोपलभ्यते तथापरादेरेकत्वाद्यापिगंधादयोधर्माघ्राणादावस्थादिभिःक्र
मेणोपलभ्यंते इतिनकश्चिद्दोषः तदुक्तं चित्रस्वभावकाःप्रोक्ताःगुणाःभिन्नापरादयः क्रमसंख्याययाचित्रंपटेरू
पंतवेष्टितइति ननुविषममेतद्दृष्टान्तेपटादौविचित्रस्यापिरूपस्ययुगपदुपलंभादित्याशंक्याह यथाचविस्तृते
वस्तुयुगपज्ज्ञातिचित्रिता तत्प्रतीतविरुद्धमिति अनुभवबाधितमित्यर्थः एतदेवोपपादयति पटेहिध्वनिरितिसैव।
भातिबाधितमेवयात् अतस्याप्रयत्नग्राह्यस्यनोपलंभइतिभावः ननुपटेहिध्वनिरितिपटेहिहेतुतादृष्टयासिद्धो
यमवभासइत्याशंक्याह नचहेतुत्वमात्रेणतद्दानसंवेदनात् नह्यत्रपटेहिस्वतिध्वनिरित्येतावतीयंप्रतिपत्ति
मपित्वपिपटेहिदेशेयंध्वनिरिति अतश्चासिद्धोयंहेतुरितिभावः ननुकथंनिष्क्रियतयापटहदेशमपास्यवक्तुः
श्रोत्रस्यतद्देशस्यशब्दोपलंभनिमित्तत्वंभवेदित्याशंक्याह श्रोत्रंचास्तमूर्तेहेतुकारणंतत्रतत्रतत्र हतिभागी।
तितद्देशेशब्दंवलक्षणामलंतथा तदित्रहेतुकारणत्वाद्धेतोः अदृष्टकृतेनापिरजोरूपत्वात् क्रियावत्त्वमिति तत्कार्यश्रो
त्रमपिक्रियावदित्युक्तं नत्रहतिभागीति तत्रतत्रविषयदेशव्यापारभाक् क्रियावदित्यर्थः अतश्रोत्रंपटहदेश
मपिशब्दंतथा तत्कर्मैनैवालंपर्यंते नत्वेणारदन्नीयात् ड्रावलकणादापक्षमूर्धद्विचीमंतातक्रमेणकर्णशा

श्री॰ त॰लो॰ ५

स्फुलवच्छिन्नं श्रोत्रतया संमतं नभोदेशं संप्राप्य संयोगविभागप्रभवप्रथमशब्दप्रभवजः शब्दः स्वविषयं ज्ञानं जनयेदि-
ति एतदेव प्रतिदेशमनुवदति यत्वाह श्रोत्रमाकाशं कर्णसंयोगाभेदिते शब्दजः शब्दश्रावणात्म शब्दबुद्धिप्रसूयते
तस्य मे देपि स्वजे ध्वनावा कर्णकोस्मिन्ति अयुक्तमतिरेषिति इदं संवेदनं कथं अतस्तस्याप्ययादन्यत्रास्योपलंभ इति नायम
सिद्धो हेतुरित्याशयः तस्यैवमभिधानात् कर्णादिस्यमंद इत्यत्रप्रायत्वात् अपितु स्थानाकर्णनयोरपूर्वे सूचितं अमुत्र
त्रिमुक्तजदेशे यदि नाम हि श्रोत्रतया संमते नभोदेशं प्रायः सर्वत्र प्रायः शब्दसहजः शब्दः प्रतीयते न दिह श्रोत्रे
शब्द इति प्रतिपत्तिः स्यात् न तु दूरतया मुक्तजदेशादि विति ततश्च श्रवणाकाशसमवेत शब्दोपलंभपक्षः स्वान-
भवेनैव प्रतिक्षिप्त इति भावः अत्रैव हेतुमाह न हि शब्दजशब्दस्य दूरादूरत्वं वादितः श्रोत्राकाशगतस्यास्ति दूरा-
स्वभावता न हि दूरादूरादूरा शब्दाकदितस्य शब्दस्य श्रोत्राकाशदेशसमवायाविशेषात् कारकैर्वैदूर्यावदूर्यो ।
भ्यां स्वात्मनि कश्चिदतिशयः न तु माभूत् क्षोत्रदूरतया शब्दजः शब्दो दूरप्रतीति विषयः प्रथम एव तु श्रोत्रपर्य-
तप्रसरणशीलो दूरदेशस्य यातयास्यादित्याशंक्याह न चासौ प्रथमः शब्दस्तावद्व्यापीति प्रयुज्यते तत्रैवं महा
तीव्रात्मा श्रूयमाणत्वेनेन तु कथं श्रूयेत मंदः स न हि धर्मान्तराश्रयः प्रथमः शब्द इति दूरदेशस्य मुक्तजात्
तुः एवं हि प्रथमोयं मुक्तजादिशब्दस्तद्देशसन्निकृष्टैः श्रोतृभिस्तीव्रतया श्रूयमाणः कथमपरैर्दूरदेशस्थैन
श्रोत्रा मंदतया श्रूयते न हि स तीव्र एव शब्दो मंदः स्यात् धर्मान्तरस्याप्यभावः स्यादेकस्य विरुद्धधर्मायोगा-
त् अतश्च स्वाश्रयमुक्तजादेवास्योपलब्धिरित्यसिद्ध एवायं हेतुः न तु कारणदेः शब्दस्यैवं वदतां सर्वापाकार्य

हेतुद्वयमुपन्यस्तं तत्र प्रथमेतदेकेनैव हेतुना परार्थत्वेन परार्थत्वं तस्मादव्यक्तस्य हेतुद्वयस्याविवेकं प्रत्येव भावादित्याशं
क्याह एतस्मान्यैरप्याकारिवदृश्येतिदृष्टयाह पुनः नायस्कान्तपतितत्वायात दानेकोहितपदितः अन्यैरितिज्येपाक्तकाका
रादिभिः तेनैवमाह यत्पैः संयोगास्पर्शवद्गुणत्वेन कारणगुणपूर्वकेनैव प्रसाधादि अन्यथाहि कार्यद्रव्य
गुणसंयोगाज्जन्य एव संयोगः स्यात् कारणसंयोगपूर्वकत्वादेव कार्यसंयोगस्य न तत्रान्यतरोभयकर्मजः संयोगः
स्याण्णुमेण नयोः शेषेनोवा न स्यात् न च संयोगो यावद्द्रव्यं भवति मनेवद्द्रव्ये विभागोपपत्तौ निवृत्तेः अत स्व द्वयोर
पिहेतोः संयोगेनानैकान्तिकत्वं प्रसृत संयोगमेव दृष्टान्तीकृत्य कारणगुणपूर्वकत्व यावद्द्रव्यभाविनाभावं स्प
र्शवद्गुणत्वमायतनेसायतनविपर्ययसाधनादिरुद्धं पिण्डियाकपक्षेच घटपाकजरूपादिभिः स्फुटमनैका
न्तिकत्वम् अकारणगुणपूर्वकत्वे चपदं प्रत्यसिद्धं च शब्दगुणादेवोपादानात् शब्दगुणस्य कार्यसोत्पादोप
गमात् अथ यावद्द्रव्यमपि तथा यावद्द्रव्यमेव शङ्खादौ शब्दस्याभावात् कथं न श्रूयत इति चेत् अनभिव्यक्तत्वादि
ति ब्रूमः यदनभिव्यक्तशब्दकादभिव्यक्तः शब्दः परिणामोन्यथैवेति तस्मात्स्पर्शास्पर्शवतोरुभयोरपि धर्मः श
ब्द इति दृष्टयेति तत एवावधार्यमितिभावः एवं शिवादेर्थ तेनस्य तत्त्वजातस्य क्रमेण निरूप्य व्याप्यव्यापकभावं द
र्शयति अमीषां तत्र धरादीनां यावांस्तत्त्वगुणः पुरा गुणाधिकतया तिष्ठन् व्याप्तता वाच्य काशते ध्रुवेति योय
स्य पूर्वभावीत्यर्थः इह खलु तत्त्वानां षट्त्रिंशेपि स्वाव्ययाख्या नरपतिशिवात्ममेनज्ञेविधये तेषां प्रकाशम
य चिद्धर्मत्वाख्यो गुणो यथायथमधिकं तया स्फुटीभवन्विशिष्यत इति योयत्तो विशिष्टगुणः स तस्य व्यापको

श्री
तं. लो.
६

यथा शक्तेः शिवः शिवशक्तीत्यनयोरिति यदभिप्रायेणैव मायासदेशापर्यंतमात्मविद्याशिवाख्यं तत्त्वत्रयं य
था पूर्वं चिन्मयत्वप्रकाशाभासितामाया न्यैरुक्तं एवं च यथयथि नरात्मके मधादौ तत्त्वजाते चिद्धर्मात्मनो गुणस्या।
विशिष्टमेव तत्त्वं तथाप्येषामवरोहक्रमेणाविद्यतायां यथा यथैषां व्याप्ति शयात्म गुणेनारोहक्रमेण तार
तम्याद्विशेषः स्युक्तं गुणाधिकतयातिष्ठन्याद्यान् पूर्वभावीत्तत्त्व गुणास्तावानमीषां धरादीनां तत्त्वानां व्यापको
यथा धराया जलं तस्यापि तेज इत्यादि नन्वग्निधूमवत्कारणं कार्याव्यभिचार्यतया तद्व्यापकं कार्यं च तदव्य
भिचारितया व्याप्यं अथवातिरस्कारिणी तिरोहितत्वात् वस्तुत्वं व्याप्यं स्थूलं व्यापकमिति किमत्र गुणाधिक्य
कथनेनेत्याशंक्याह व्याप्यव्यापकतां येषां तत्त्वानां दर्शिता किल सा गुणाधिक्यतः सिद्धा न हेतुत्वान्न लाघवा
त् किलेत्यागमे एतदेव हेतुत्वस्य लाघवस्य व्यभिचारं दर्शयन्नुपपादयति अहेतुनापि रागो हि व्याप्नोवि
द्यादिनास्फुटे अहेतुनेति विद्यारागयोरव्यक्तरागद्वेषाः कालसमुत्पाद्यत्वात्तथैव योगिनां धर्मसामस्त्ये
नावभाति भूः धर्मसामस्त्येनेति धर्मादीनां हिरण्यादीनां सामस्त्येन सहभावेन योगपद्येनेति यावत् एतस्य
न्नुपायश्चित्ररूपावभासो विस्मृतत्वेनिमित्तं इह तत्त्वधर्मसामस्त्यधरादिसिद्धानां योगिनां योगजन्मातिशयाभूत्स
हाकरणत्वे इति एवं योगिनां पट्टकरणत्वमयोगिनां च तदभावः सूपायभेदादेव धरादेर्गन्धादीनां क्रमे।
णोपलंभ इति नेदं चोद्यं यद्धरादीनामेकरूपत्वाद्गन्धादीनां कथं क्रमेणोपलंभ इति तदाह गंधादिशब्दपर्यंत।
वित्तस्य धरातत्त्व। उपायभेदाज्ज्ञानेषां क्रमाक्रमविभागतः ननु यदि धरादेर्गन्धादेश्च रूपेण कश्चिद्भेदः संभवति

ननु कथमुपायभेदेन ज्ञानं यदि बुद्धिभिदा ज्ञातं इत्यादिनी या गंधवती येत्येतेन विशेषणविशेष्यतया बुद्धिभेदो भ
वेदित्याशंक्याह नत्वेवं क्रमव्यक्तिरूपेणेथीभेद उच्यते षष्ठीप्रयोगो यो भेदाद्भेदकत्वात् तथा तत्र इति यत
उपायभेदेन क्रमावभासः षष्ठीप्रयोगो वा इति यागायागंध इति भेद्यभेदकतेति विशेषणविशेष्यभाव इत्य
र्थः तद्यथा गंधवती धरा इत्यादि तदुक्तं विशेषणविशेष्यत्व व्यपदेशः स्यादीभिदां लक्षणं प्रवनोहेतो गो
चरत्वं ब्रजत्वमीति प्रकृतमेवोपसंहरति तेन धर्मातिरिक्तो धर्मीनाम न कश्चन तेनेति क्रमग्रहणस्या
न्यथासिद्धत्वेन हेतुना नेदं गंधादिधर्मोघाव्यतिरिक्ताः परादय इत्युक्ते ते च के कति च कियंतः कीदृशाः पुनरि
त्याशंक्याह तत्रानेकप्रकाराः स्पर्शगंधरूपरसाः स्थितौ संस्पर्शाः पाकजोऽनुष्णाशीतः शब्दो विचित्रकाः शैत्यं
माधुर्यशीतत्वे क्षिप्राशाद्याप्यवारिणि शुक्लभास्वरतोऽलं त्वं क्षिप्ताः शब्दाद्यपावके अपाकजश्च शीतोऽस्यो ध्व
निश्च तत्र पावके वर्णात्मको ध्वनिशब्द प्रतिविंबा यथां चे अनेकप्रकारा इति तत्र गंधो हि द्विविधः सुरभिरसु
रभिश्च रूपमनेकप्रकारं शुक्लपीतादि षड्विधो मधुरादिः पाकज इति देशकालादिद्रव्यांतरसंयोगात्प्रभवना
त तदुक्तं स्पर्शोस्यानुष्णाशीतत्वे सति पाकज इति विचित्रक इति खटखटादिरूपत्वात् शैत्याद्यादिपयं रू
परसस्पर्शो विषयं यदुक्तं शुक्लशीतमधुरा एव रूपरसस्पर्शा इति चित्रा इति कलकलादिरूपत्वात् एवमुत्तर
त्राणि यावत्पयथागच टचटादि रूपतया वैचित्र्यं ज्ञेयं शुक्लभास्वरेतीति रूपे तदुक्तं तत्र शुक्लं भास्वरं च रूपमुष्ण
एव स्पर्श इति अपाकज इति तदुक्तं स्पर्शोस्यानुष्णाशीतत्वे सति अपाकज इति वर्णात्मक इति वाचकशब्द

मयऽस्यार्थः प्रतिबिंबानीति तदुक्तं प्रतिशब्दकसंघातो नभस्येवोदितो ध्रुवैरिति नन्वनेरस्पर्शवदाकाशैकगुणत्वे श
ब्दस्य निर्णयायि यदाहुः शब्दः प्रयत्नानन्तरं समस्तकार्यपूर्वकत्वादयवद्द्रव्यभावित्वाश्रयादस्तत्रोपलब्धेश्च नस्पर्शवद्वि
शेषगुण इति तत्कथमिह स्पर्शवतोऽनित्यादीनामपि गुणः शब्द इत्युच्यते इत्याशंक्याह यत्तु न स्पर्शवद्धर्मः शब्द इ।
त्यादि भाष्यते कारणादेस्तत्र प्रतीतिविरुद्धं केनरदप्यतो सकलतः सहैव समुत्पत्तेः नन्वकारणव्यापकं चेति
विप्रतिषिद्धमेतदित्याशंक्याह तद्विना न भवेद्यत्तद्व्याप्यमित्युच्यते यतः नलाघवं च नामास्ति किंचिदस्यवदर्श
ते गुणाधिक्याद्दतो ज्ञेया व्याप्यव्यापकतास्फुटा नभवेदित्याभासतो नयायादित्यर्थः नह्याभासवादे किञ्चि
भासेभ्यः किंचिद्भावानामन्यावेदकं प्रमाणं संभवेदित्यभिभावः अतश्चेह यदनुग्रहं विना यन्नभासते तन्तद्व्याप्यमित्यु।
क्तमितरच्च तद्व्यापकमिति अत्रत्वदर्शनादिति संविदद्वैतमात्रसतत्त्वे विकल्पशास्त्रेऽत्यर्थः नहि परां संविदमधिकृत्य स
स्थूलं सूक्ष्मं वा किंचिदस्तीत्यभिप्रायः अत इति हेतुत्वस्य लाघवस्य च व्यापकतायां निमित्तत्वादुपपत्तेः ननु।
श्रीपूर्वशास्त्रे गुणाधिक्याद्यूर्ध्वाधरभावमात्रमेवोक्तं न व्याप्यव्यापकत्वमिति किमेतदुच्यते इत्याशंक्याह
यो हि यस्माद्गुणोत्कृष्टः स तस्मादूर्ध्व उच्यते ऊर्ध्वताभ्यामतश्च श्रीमन्मालिनीविजये स्फुटा नह्येवमादावूर्ध्वत्वे
देशकृतं कालकृतं वा विवक्षितं किंतु किंचिद्धर्मैकत्वं तारतम्यात् गुणोत्कर्षः तदेव च व्यापकत्वमित्युक्तं ऊर्ध्व।
ताव्याप्ततेति एवमियता पर्यवसितमित्याह अतः शिवतामभृति प्रकाशतास्वरूपमादाय निजात्मनि ध्रुवं
समस्ततत्त्वावलिधर्मसंचये विभाति भूम्यास्तनयाश्रितेवले अतो गुणप्रकर्षप्रयुक्ता व्याप्यव्यापकभावादे।

नोः शिवान्तमध्य इति स्वात्मेति चिद्धर्मात्मगुणप्रकर्षमासाद्य समस्तानां तत्त्वानां संवेदयितृभिः संग्रहपर्यायैर्धर्माणां मो
न्नयैर्निश्चितमेव पूर्णेन रूपेण वा तत्त्व याम्यन्ते भूमीति समस्ततत्त्वव्याप्येत्यर्थः एतदेवान्यत्रापि निर्दिशति एवं ज
लादेरपि शक्तितत्त्वपर्यन्तं यावत्तावत् प्रवृत्तिर्न्ता दृक्ता नाहमिति पूर्वापरैस्तत्त्वैर्व्याप्यमिति भावः ननु व्याप्यव्याप
कभावप्येषां को विशेषः इत्याशंक्याह किं तु तत्त्वं शक्तितत्त्वेन तत्त्वं पूर्वं तत्तद् तयेति भेदः उक्तमिति यावत् धरादि पू
र्वमिति जलादि तद्धर्मतयेति सधर्मो यस्येति शक्तिमद्रूपतयेत्यर्थः तेन धरातत्त्वं शक्तिरूपं जलतत्त्वं तु श
क्तिमद्रूपं सधरं च जलतत्त्वं शक्तिस्तेजस्तत्त्वं तु शक्तिमत् यावच्छक्तितत्त्वं शक्तिः शिवस्तु शक्तिमानेव पंचत्रिंशत्त
त्वी शिवनाथस्यैव शक्तिरुक्तेयमित्याद्यन्यैरुक्तं एतच्चान्यत्रैवैतेनैवोक्तमिति तत एवावधार्यमित्याह अत्र
न्तरप्रक्रियायां वैतत्यतः प्रदर्शितमिति एतत्तस्मात्ततः यथेप्सितं विस्तरार्थी विवेचकः अन्तरप्रक्रियायामिति श्री
परात्रिंशिकाविवरणादावित्यर्थः एतदेव श्लोकस्य प्रधानार्थेनोपसंहरति इति तत्त्वप्रकाशस्य कृतं समस्य
क्प्रकाशनं सम्यगिति अनेनात्र भोगकारिकादिभ्यो वैलक्षण्यं कटाक्षितमिति शिवं शंकरनन्दनसद्योज्यो
तिर्देवकरणभवादिमतं प्रत्याख्यास्यान्नवमे या व्याख्यावाह्निके जयरथाह्वयः ॥ इति श्रीतन्त्रालोकविवेके
तत्त्वप्रकाशनं नाम नवमाह्निकम् ॥ ॥ ॐ तत्तत्तत्त्वविभेदेन समुद्घातो योऽति निषिवत्नशीलकरः जय
ति परं जयमूर्तिः संसारपराजयस्फूर्तिः इदानीमेषामेव तत्त्वानां द्वितीयार्धेन पांचदश्यादिभेदमभिधातुं प्र
तिजानीते उच्यते तिकशास्त्रैकरहस्यं तत्त्वभेदनं तदेवाह तेषामेषां तत्त्वानां स्ववर्गेषु अनुगामिनां भेदान्तर

श्री॰
तं॰लो॰
॰८

8

मपि प्रोक्तं शास्त्रे श्रीत्रिकाभिधे भेदोऽत्र समपि पंचदशधादिलक्षणमपीति पूर्वापेक्षया श्रीत्रिकाभिधे शास्त्रे इति श्री
मालिनीविजयोत्तरे तदुक्तं तत्र अथैषामेव तत्त्वानां धरादीनामनुक्रमात् प्रपंचः कथ्यते लेशादित्यादि शिवः सा
क्षादभिधीयते इत्यंतम् तदेवाह शक्तिमच्छक्तिभेदेन धरायंमूलपश्चिमे भिद्यते पंचदशधा स्वरूपेण महानरात्
कलांतं भेदयुग्धीनं तदूर्ध्वमलयाकलः तद्वन्मायाच नवधा ज्ञाकलास्सप्तधा पुनः मंत्रास्तदेशाः पंचध्येमंत्रे
शाः तत्र यत्त्रिधा शिवो न भिद्यते स्वैकप्रकाशत्वान्न चिन्मयः शक्तिमच्छक्तिमद्भेदेनेति शक्तिमतां शक्तीनां च व
समाणस्वरूपाणां शिवादीनामिच्छादीनां च भेदेन प्रत्येकं सप्तधा वैचित्र्यदशात्मना प्रकारेणेत्यर्थः मूलप
मिति प्रधानांतं तत्त्वचतुर्विंशकमित्यर्थः स्वरूपेणेति स्वं रूपं मातृमानाद्यत्र परतरं वक्ष्यमाणपतया परिदृश्यमा
नजडस्वभावे यथा पृथिव्यां गंधादिगुणोत्कटे घटे सति तत्स्वरूपं भूमेर्यत्स्थगजडमवस्थितं मातृमानादु
पधिभिः संजातेऽपराकमिति श्रा नरादिति पुंस्तत्त्वादारभ्य कलांतं तत्त्वषट्कमित्यर्थः भेदयुग्धीनमिति ।
भेदयुग्मरहितं त्रयोदशधामिति यावत् इह यद्यपि सर्वं सर्वात्मकमिति सर्वत्र पंचदशात्मकत्वमेव न्याय्यं तथा
प्यधराधस्तत्त्वे क्रोडीकारेण प्रतितत्त्वं प्राक्प्रपंचितरूपेण परसंवित्तमुल्लसेत् येनोत्तरोत्तरत्र पूर्वपूर्वस्थितिरव्य
भिचारेण भवेत् अन्यथा हि यत्र यत्र हि विश्रांतेत्तत्तन्मयः इत्याद्युक्तयुक्त्या धरादेरतत्त्वता तस्य संत्वैकवस्था
देत् तत्तदुत्तरं पुनस्तत्त्वजातं पूर्वपूर्वस्मिन् रूपे विलीनं सत् क्रमेण संविदेव विश्राम्येद्यथा यथं तस्यापवेदकात्
अत एव संविद्विश्रांततत्त्वानां तत्स्थरभागं दात्मलमिति तदीयं भेदद्वयं न्यूनतामियाद्येनात्र सप्तशक्तिकस्य पल

षाकलादेः षट्कस्य प्रमातृत्वात्सकलस्य च सशक्तिकस्य स्वरूपीभूतत्वाद्द्वयोर्दशविधत्वमेव स्यात् यदुक्तं विज्ञा
त्मके हि विश्वस्मिन्यासं विदवलोकयेत् नीजवीर्यमहास्फारसमवष्टंभयोगतः विशिष्टकार्यसंपन्नैः प्राक्तत्रोदे
हिसाहङ्कारात् अथ राथस्तत्तेषु स्थिता पूर्वस्थितिर्यतः अन्यथास्थितिरेवैषां न भवेत्सर्वहानितः एवंस्वरूपत्वय
दं विलीनं तत्त्वजालकं भोगायनालमित्येवं नूनं त्वं तत्र भेदवमिति सशक्तिकत्वसकलः स्वरूपीभूतः सन् स्वरू
पमेव न तत्राभियात् भेदो हि प्रतियोगिनमपेक्षत्यपर त्वभेदमेकलनां विदध्याद्यथेदमयमिदं मानमयं माते
तिमेयस्य प्रत्तमेयतास्वात्मनि न कश्चिद्भेदः एवं स्वरूपस्य स्वात्मनि भेदाभावायुक्तमुक्तं क्रमेण भेदक्रास इति
यदुक्तं भेदाहितस्वरूपेभिदं त्वयिनि भेदसंकलनां अन्यत्र प्रतियोगिनि विदधति हि परत्र तेन तदभावात् नि
जवात्तभेदद्वितयीनिराम उक्तः क्रमेणाद्वे परिपूर्णेशिवतत्वे भेदाभावादभेयतानेनेति रुद्रवदिति रुद्रशब्देन
लक्षितामेकादशसंख्यामर्हतीति वर्त्तते प्रलयाकल इत्यर्थात् स्वरूपीभूतः एवमुत्तरत्र विज्ञानाकलादावपि
ज्ञेये अतएवात्र विज्ञानाकलादीनां पंचानामेव प्रमातृत्वं येनैकादशविधत्वं मायेति न तु स्यात् द्वितीयोपवेय
प्रलयाकल उच्यते तेन सोप्येकादशविधएवेत्यर्थः नववेति सशक्तीनां चतुर्णां मंत्रादीनां प्रमातृत्वात् सप्त
येति सशक्तिकस्य मंत्रेश्वरादेस्त्रयस्य प्रमातृत्वात् तदीशाः मंत्रेश्वराः पंच च यद्इति मंत्रमहेश्वरशिवयोरेव सश
क्तिकयोः प्रमातृत्वात् त्रिधेति शिवस्यैव सशक्तिकस्य प्रमातृत्वात् शिवस्य भेदाभावे हेतुः स्वैकप्रकाशत्वं
न चिन्मय इति भेदो हि प्रतियोगव्यपेक्षः न च परं प्रकाशमपेक्ष्यापरः कश्चिदस्ति येन तस्य संभवेदिति समनन्तरमेवो ।

श्री
तं॰लो॰
·५

क्षमित्याप्ताभितत्त उक्तं च शक्तिमच्छक्तिभेदेन धरातत्त्वं विभिद्यते स्वरूपसहितं तच्च विज्ञेयं दशपंचधेति एवंज
लादिमूलांतं तत्त्वजातमिदं महत् पृथग्भेदैरिमैर्भिन्नं विज्ञेयं तत्त्ववेदिभिः अनेनैव विधानेन पुंस्तत्त्वात्सकला
न्तकं त्रयोदशविधं ज्ञेयं रुद्रवत्प्रलयाकलः तत्वन्मयापि विज्ञेया नवधा ज्ञानकेवलः मंत्रसप्तविधास्तद्वत्पं
चमंत्रविनायकाः द्विधा मंत्रेश्वरेशानाः शिवः साक्षान्न भिद्यत इति च ननु के ते शक्तिमच्छक्तिभेदेनास्याः सूचि
ताः शक्तयः शक्तिमंतश्च येन भुवः पंचदशात्मकत्वं स्यादित्याशंक्याह शिवो मंत्रमहेशेशमंत्रा अकलयु
क्कली शक्तिमंतः सप्त तथा शक्तयोस्य त्रयोदश स्वस्वरूपं पंचदशं तद्भूः पंचदशात्मिका ईशा मंत्रेश्वराः
अकलयुग्विज्ञानाकलप्रलयाकलौ कली सकलः शक्तय इत्यर्थाच्छिवादिसंबंधिन्य इच्छाद्याः सप्त तदु
क्तं शिवादिसकलांतांताः शक्तिमंतः प्रकीर्तिताः तच्छक्तयश्च विज्ञेयास्तद्वदेव विचक्षणैरिति स्वस्वरूप
मित्यर्थात्पृथिव्यादेः नन्वस्मद्दर्शने नरशक्तिशिवात्मकमेव विश्वमिति सर्वत्रोद्घोष्यते तत्कथमिह सि
द्धांतादर्शनादिप्रत्युचितं प्रमातृभेदमवलंब्य मयोक्तमित्याशंकां गर्भीकृत्यैतदेवोपपादयति तथाहि
तिस्रो देवस्य शक्तयो या वलिताः पुरा ता एव मातृमानमेयत्रैरूप्येण व्यवस्थिताः त्रैरूप्यमेव वर्णयति परो
ऽशो मातृरूपेऽत्र प्रमाणांशः परापरः मेयोऽपरः शक्तिमांश्च शक्तिः स्वं रूपमित्यदः अद इति वाक्यार्थपरामृ
र्शः तेन मातृरूपः परांशः शक्तिमान् प्रमाणरूपः परापरांशः शक्तिर्मेयरूपोऽपरांशः स्वरूपमिति यत्पुनः
शक्तिमतां शक्तीनां च सप्तविधत्वमुक्तं तत्सर्वं त्रिप्रकारप्रायमित्यनेनालं नरशक्तिशिवात्मकत्वमेव।

स्थितमिति न कश्चिद्दोषः एषां शक्तिमदादीनां मध्यात्स्वरूपं तावत्प्रथमं लक्षयति तत्स्वरूपं भूमेर्यत्स्थगलउम
वस्थितं मान्द्यमानाद्युपाधिभिरभिज्ञातोपरागकं अभिज्ञातोपरागकमिति तदुपरक्तत्वेन हि शक्तिमदादिरूप
त्वमेवस्यादित्याशयः एवमस्यैकत्वेप्यवांतरव्यक्तदेशभिन्नत्वे शक्तिमत्तः शक्तयश्च निमित्तमित्याह सक-
लादिशिवांतैस्तन्मात्राभिर्व्यवधानान्यथा शक्तिमद्भिस्तद्भूतशक्तिभिः समस्तभिद्यदः अनुद्भूतशक्तिभिरित्यने-
नात्र शक्तिमत्तो प्राधान्यं कटाक्षितं उद्रेचितात्मकत्वमनेन तेशक्ती नाम वस्तुतो हि शक्तितद्वतोः परस्प
रमवियोग एव किंतु प्राधान्यमेव प्रयोजकीकृत्य तथाव्यपदेशः यदयं शक्तिमान् इयं शक्तिरिति नतु सक-
लादिप्रमाणसमस्तकं सर्वं च प्रसिद्धमित्यलौकिको दोषः नन्वेतायस्तु न कश्चिदपि परिपठिताः कास्ताः इत्याश-
ङ्क्याह सकलस्य प्रमाणांशो योऽसौ विद्याकलात्मकः सामान्यात्मा स शक्तित्वेनाग्रिमेण तत्तद्भिदः लया
कलस्य मानांशः स एव परमस्फुटः ज्ञानाकलस्य मानं तु गलद्विद्याकलाहृतिः अशुद्धविद्याकलनाध्वंस-
संस्कारसंगता एव भवत्यशुद्धविद्यासंज्ञाणोः करणं भवेत् प्रबुद्धशुद्धविद्यात्मतत्संस्कारेण संगता मानं मं-
त्रेश्वराणां स्यात्तत्संस्कारविवर्जिता मानं मंत्रमहेशानां करणं शक्तिरुच्यते स्वातंत्र्यमात्रसद्भावा या तु शक्ति-
र्माहेश्वरी शिवस्यैव करणं तु या वेत्ति करोति च सामान्यात्मेति विद्याकलाभ्यामेव बुद्धिकर्मेंद्रियलक्ष-
णस्य विशेषात्मनः प्रसरस्य संग्रहात् अत एवोक्तं न तत्तद्भिदश्चेति एवं हि तत्तद्व्यापारभेदादनंताः शक्तयो
भवेयुरिति भावः उक्तं च शाक्ते तेनाशुद्धैव विद्यास्य सामान्यं करणं परा ज्ञानाकलेत्वसामान्यकलाकरणस्तु

10

च्यतेइति सप्येवेति विद्याकलात्मकः परमस्फुटइतीयान्विशेषः नहिप्रसमस्य जगणाय तस्याभिप्रायः गगलन्तुइति
गलेतेपोविनाशोक्तविरत्यर्थः प्रबुधक्कारिति नतमबुद्धा एवंत्वशुद्धविद्याध्वंसंस्कारसंगमेनास्यात्र प्रबुद्धबुद्धेस
शुद्धकलाध्वंससंस्कारस्यापिनपपदवस्यात्मनापिसंस्कारेणाग्रस्याः संगमोभवेत्र यद्वस्ति तत्संस्कारेणसंग्या।
तेति तत्संस्कारविवर्जितेति तेननपपदवस्यात्मनामसंस्कारेणविवर्जिताप्रणष्टसंस्कारेत्यर्थः नहितदा।
नीमशुद्धविद्यादेर्गंधमात्रमपिसंभवेदितिभावः मानमित्यर्थोक्तज्ञाविद्यामाणमेवचकरणमिति शक्तिरिति
चतत्रमयदिश्यते इत्युक्तं करणंशक्तिरुच्यतेइति स्वातंत्र्यमात्रसद्भावेति तडक्तंप्राक् एकएवास्यधर्मोसौसर्व
हेपेणवर्तते तेनस्वातंत्र्यशक्त्यैवयुक्तइत्यंजसोविधिरिति अतएवेश्वरीत्युक्तं तयावेत्तिकरोतिच सर्वशेषः य
त्सकलोप्यशुद्धविद्याकलात्मिकयैवशक्त्यावेत्तिकरोतिचेति एवंसत्यज्ञेयं एवंप्रमेयात्मकलादिशक्तीनां।
स्वरूपमभिधायप्रकृतमेवाह आशिवात्मकलांतयेमातरःसमतोद्विधा व्याप्तेनादिकशक्तिवान्मेदोवेद्यवे
दकः तत्रप्रमातृभेदाद्यदिवेद्यस्यापिभेदोभवेत्तदानेकेषुप्रमातृष्वेकमेवनीलंविदितंतस्मादपितद्भिन्नंभिन्नम्
नचैवमस्ति नहितत्तद्देशकालावस्थाप्रमातृभेदेपिनीलस्यस्वात्मनिकश्चिद्विशेषः संलक्ष्यते इत्याशंकागर्भी
कृत्यतदेवोपपादयति तथाहि वेद्यतानामभावस्यैवनिजंवपुः अनेनचात्रजाड्यादिष्टस्यवस्तुधर्मोख्या।
स्यप्रमेयस्यलक्षणंकृतम् नन्वसिद्धेयंप्रतिज्ञा नहिनीलज्ञानेनीलस्यकश्चिद्विशेषःपितृप्रमातृत्वस्यपूर्वम
ज्ञातेनंतरंज्ञातोत्पन्नः यदपिप्रत्यक्षतांपरोक्षतांपिपरोक्षतां देशकालादिभेदेनविषयःप्रतिपद्यतइत्याद्युक्तावि

षयस्य प्रमाणत्वं परोक्षत्वं वा धर्म उच्यते तदपि प्रमात्रतिशयाभिप्रायमेवेत्याशंक्यैवेदमाचष्टे चैत्रेण वेद्यं वेद्मीति
किमत्र प्रतिभासितो नीलं वेद्मीत्यत्र केवलनीलप्रथायां वेद्यता या विषयधर्मस्तमाविज्ञापि चैत्रेण वेद्यं नीलं वे-
द्मीत्यस्यां प्रथायां किं नीलमात्रं प्रथते किमुत चैत्रवेद्यताविशिष्टं नीलमिति तत्राद्ये नीलं वेद्मि चैत्रवेद्यं नीलं वे-
द्मीत्यनयोः प्रतीत्योरविशेषः स्यात् न चैवमनुभवविरोधात् द्वितीये तु चैत्रवेद्यता नीलस्य किं स्वगता विशेष-
णमुत प्रमातृगता न तावत्प्रमातृगता व्यधिकरणयोर्भिन्नकालत्वेन विशेषणविशेष्यभावायोगात् स्वगता
चेत्सिद्धः प्रतिज्ञार्थो वेद्यताभावस्य निजत्वमिति ननु व्यधिकरणत्वेऽपि ज्ञातोऽर्थ इति तथा प्रतीतेरस्ति विशे-
षणविशेष्यभावः चैत्रेण वेद्यं नीलं वेद्मीत्यस्यां हि प्रथायां चैत्रेण ज्ञातमर्थं जानामीत्युक्तं भवेत् ज्ञानं च प्रमा-
तुरेवातिशयो न प्रमेयस्येत्युक्तप्रायं तदाह नन्वचैत्रीयविज्ञानमात्रमत्र प्रकाशते वेद्यताख्यस्तेनार्थधर्मोऽभा-
तिभावस्य नीलवत् प्रवेशितनीलादौ विषये ननु ज्ञानेन नाम क्रिया सा च फलानुमेया फलं च प्रकटताख्यं विषय-
धर्मः सैव च वेद्यतेति कौमारिलमतमाशंक्य प्रतिक्षिपति वेद्यता च स्वभावेन धर्मो भावस्य चेत्ततः सर्वात्मनैव
वेद्यः स्याद्घटनीलादिधर्मवत् घटनीलादीति भावप्रधानो निर्देशः एवं हि भावस्य घटत्वसन्निवेशनीलत्वरू-
पशब्दादिग्रहणकार्यत्वकारणत्वादीन्येवमादयो यथा सर्वास्वप्रतिविशिष्टास्तथा वेद्यताख्योऽपि धर्मो भवेदिति
तादभावाः प्रसज्येत सर्वे च सर्वज्ञाः स्युः नन्वनियतप्रमातृबुद्धिजन्यत्वात् किंचिदेव प्रति वेद्यत्वं स्यान्न सर्वास्वप्रती-
ति चेन्नैवं एवमपि हि यथा कुविंदजन्यः पटो न तमेव प्रति सर्वाविशेषात्तथा वेद्यतापि सर्वाविशेषेणैव भवेत्

नन्वयेन तत्तन्यते तं प्रत्येवेति नियमो युक्तः तदाह अथ वेदकसंवित्तिबलादेवार्थधर्मभाक् भावस्तथापि दोषोऽसौ
तं॰ लो॰ विदकृतत्वस्तुवत् दोषोऽसौ सर्वोऽस्त्वनित्तथास्यादिति ननु हि ज्ञानादिवत्कार्येनात्रानियतप्रमात्रयेतावुद्धिजन्मनेवे।
॰॥ द्यमस्येव वेदकत्वस्यापि तथाभावो भवेत् वेद्यवेदकयोरन्योन्यापेक्षत्वात् नचैतदस्ति वेदकस्येव वेद्यस्याप्यवे
तन्येनत्रुपयोगात् अतवस्तुलतयाहि ज्ञानादिवदपेक्षावुद्धिजन्यत्वमनाशंक्यं भंरुपत्तेवेण्यन्यतिसमाहितेति यदि
वनाम भावस्य नीलत्वादिवद्वेद्यत्वाख्योऽपि धर्मो भवेत्तत् किमसौ वेद्यतो वा अवेद्यमेव तत् किंचित्स्यात् नहि संविद
मनारूढं वस्तु वस्तुत्वं लभते इत्युक्तमसकृद्बहुशः अथ वेद्यस्तत्तस्यापि नीलत्वाद्यवद्वेद्यत्वेन भाव्यं अन्यथा
वितापवस्यात् एवं च तत्रापस्य वेद्यत्वं तत्रापत्यादिति मूलक्षितिकारिणी वक्तमवस्था स्यात् येन कस्यचिद
प्यर्थस्य वेद्यता न घटेतेति मूलक्षितिप्रायैव विसंपर्यवस्येत् तदाह । वेद्यताख्यस्तु योऽयं धर्मः सोऽवेद्यश्चेदर्थ एव प्रष्ठव।
त् वेद्यश्चेदस्ति तत्रापि वेद्यतेऽनवस्थितिः ततो न किंचिद्वेद्यं स्यात् मूलक्षिति तत्प्रसज्यते ननु तत्तन्नियतोपाधि
वशाद्यथा ज्ञानस्य तत्तदर्थप्रकाशकं रूपं येनेदं नीलज्ञानमिदं पीतज्ञानमिति प्रतिकर्मनियमः स्यात् त।
था भावस्यापि प्रतिनियतप्रमात्रुपाध्युपस्थापितमेव रूपं वक्तव्यं येन संबंधिनियमः सिद्ध्येदयं चैत्रस्यैव वेद्यो यं
मैत्रस्य चेति तदाह उक्तविवक्षाद्गुणार्थ्यशापस्थापितं वप्रत्यक्तं भावस्यार्थप्रकाशात्मयथाज्ञानमिदं तु मत
उपाध्यंशेति विज्ञानं गुणामनिक्यात् नचैतद्युक्तं एवं हि बाह्यस्यार्थस्य तत्तन्नियतोपाध्युपस्थापितरूपत्वात् ज्ञानवद्वे
दः प्रसज्येत मैत्रवेद्योऽन्यो यश्च मैत्रवेद्याद् इति नहि तदेव नीलज्ञानं भूत्वा पीतज्ञानं भवितुमर्हति नचैतदिष्टं व :

सर्वस्यार्थस्य व्यतिरेकत्वेनैव सत्ताद्युपगमात् एवं च किमयमेकप्रमाणवेद्यतोपक्रमः उत सर्वप्रमाणवेद्यतोपक्रमः
तत्रैकप्रमाणवेद्यतोपक्रमे तेनान्यस्य प्रमातुरसौ अवेद्यः स्यात् अनेकप्रमाणवेद्यतोपक्रमे त्वेकैकेनानेकस्यावि
दर्पीति सर्वात्मनामव्यक्तिमेव जगद्भवेत् अत आह एकविज्ञानाद्यवेद्यत्वेन ज्ञातृत्वेऽवेद्यता समस्तज्ञानावेद्यत्वेने
कविज्ञानावेद्यता अनेन वेद्यत्वेनाममभावस्य किंचिदित्याह तस्मादवेद्यतानाममभावधर्मोऽस्ति कश्चन ननु यद्येवं ना
हि भावः कथं विदिक्रियाकर्मतामियादित्याशंक्याह भावस्य वेद्यतासैव संविदोदयः सम्भवः ननु त्वया संविदन्य
स्यार्थः न कथमन्यस्य सम्भवोऽन्यस्य वेद्यता ओतिशयः न हि घटस्योदयः पटस्य किंचित्स्यात् संविद्याद्यानामा
विशिष्टेति न सम्भवः सर्वेषामप्यविशेषेणैव भवेदिति संबंधिनियमोऽपि न सिद्धेदित्याशंक्याह अर्थग्रहणरू
पं हि यत्र विज्ञानमात्मनि समवैति प्रकाशोऽर्थस्य सैवास्य वेद्यता इह खलु ज्ञानस्यार्थजन्यत्वादर्थविषयत्वे ज
नकत्वस्य चक्षुरादिभिरविशेषेऽपि वस्तुत्वाभावाद्विषयत्वनियमो येनेदं नीलग्रहणमिदं पीतग्रहणं ज्ञानमिति
स्यात् तस्मैवं विधदृष्टादृष्टात्मविशिष्टसामग्रीबलायत्तप्रत्यगात्मसमुत्पत्तिसिद्धत्याववर्तते तमेव प्रतिसोऽर्थः प्रका
शमानो भवेत् एषैव चार्थस्य वेद्यतोच्यते इति न कश्चिद्दोषः एतदेव प्रतिविधत्ते अत्र समः पदार्थानां नयमोऽया
दिवेद्यता अवेद्यावेद्यते संसृज्ञाने समापि वर्णिते अर्थग्रहणरूपेण्यात्मसमवेतज्ञाने सतीत्यर्थः एवमपि ह्यर्थस्य न किं
चित् न हि ज्ञानार्थयोरेकरूपत्वमेकाधिकरणत्वं वा ग्राह्यग्राहकात्मतयानयोः स्वरूपभेदात् ज्ञानस्य चार्थग्रह
णात्मकात्मतयानयोः स्वरूपभेदात् ज्ञानस्य चार्थग्रहणात्मकत्वेऽपि ज्ञानसमवेतत्वात् यदभिप्रायमेव चयपरात्व।

१२

श्री°
तं°लो°
१२

स्याहिभासमानमित्याचार्यैरुक्तं नाप्यसातिशयेस्य किंचित्पात् यथार्थं जनयात् ज्ञानमर्थस्य प्रकाश इति चेत् नत
नहि येयजन्यः स तस्य प्रकाशो भवति वह्निरिव धूमः स परं तत्कृतो लिंगं भवेद्यदविनाभावो निश्चीयते न चेह तत्रि
श्चयोस्ति विनापर्यंशेभ्यो न्यादीनप्रकाशात्मनो ज्ञानेस्याद्यात् अत एव कुत्रकेवलमवेद्याप्त्य पदार्थाः स्युरिति एत
देवहृष्टांतोपदर्शनद्वारेणाहफ्यति यथा हि एष्टुत्वादिरूपो अभयस्यापि अनन्दात्मापदार्थेनेति एष्टुत्वादि
रूपता तथा सत्यपि वित्तानविष्टानसमवायिति एवेचयथर्थप्रकाभावात्कथं वेद्यत्वमाप्नुयुः यथा घटस्य एष्टु
त्वादेराकारः पटस्याद्रूप्येन याया तथा ज्ञानसमवायित्वर्थप्रकाशात्मकोपि ज्ञायस्त्वयमप्रकाशरूपताभा
वान्नैव प्रकाशमाना भवेयुरित्यर्थः एवं न केवलं भवन्मते अर्थ एवाप्रकाशते यावन्न किंचिदपीति मद्रूप
एणांतरमप्यापतेदित्याह अनर्थः स्वमहोश्चैव हृष्यणोवस्त्वयत्स्वयं प्रकाशात्मनः तत्संक्रियाप्रकाशात्तदा
श्रयः स्वप्रकाशोऽमनोदीपवद्दरादि तथैव तत्र किं तत्प्रकाशात्मनाम सत्तेजयानि सर्वतः इह बाह्ये निमित्त
कारणं वस्तु तावदप्रकाशात्मकमिति नास्ति विवादः एतद्विषयं कार्यमपि प्रकाशात्मकमेव विषयप्रका
शकाले तत्प्रकाशस्याप्रकाशनात् नहि विषयग्रहणकाले तज्ज्ञानस्य ग्रहणमस्ति ज्ञानार्थयोर्युगपदप्र
तिभासात् तदाह नैव युगपदाकारद्वितयं प्रतिभासते इदं ज्ञानमयं चार्थ इति भेदाद्युपग्रहादिति तदाश्र
यश्च समवायिकारणमात्मा क्रियवन्निमित्तकारणानया विवक्षिते सहकारिभूतं च बाह्यं तः करणं चक्र
मप्यप्रकाशात्मकमेव तितपरत्वात् दीपश्च निमित्तकारणभूतो यद्यपि भवन्मते परस्यैव स्वस्यापि प्रके ११२

शक्तस्याप्यविदितएवासौ तथा न भवेत् वेद्यत्वमेव च विचारयितुमुपक्रान्तमित्यर्थवदस्यापि वार्त्तेत्येवमुक्तं प्रत
स्यार्थप्रकाशने समग्रैव सामग्री यस्य प्रकाशरूपैवेति न किंचिदपि प्रकाशने नित्सर्वमिदमेवं स्यात् आत्ममन
सोस्सयारोत्थानन्तं योगोपि सममवायिकारणमप्रकाशायैवेति गतार्थतान्वात्पृथगत्र नोक्तः ननु प्रदीपस्येव
ज्ञानस्यार्थप्रकाशनमेव रूपं तत्कथमस्य बोधमर्थप्रकाशात्मके ज्ञाने सत्यपि नार्थः प्रकाशत इति अपर्यनुयो
ज्यो हि भावानां स्वभावः तदाह ज्ञानस्यार्थप्रकाशनं न तु रूपं प्रदीपवत् इहैवेत्रो जीवतीति यथा चैत्रस्येव जी
वनातिशयेन परस्य न यथार्थः प्रकाशने प्यर्थस्यैव कश्चिदतिशयो न ज्ञानस्यातिशयेनैतदेवापहासप्रवः
सर्वं सदसदनेकपक्षेतो ह्यं कतत्क्रमेण समाधत्ते अथैवं मतविदितं नरीत्यामहीमतः अर्थप्रकाशो ज्ञानस्य
रूपं तन्निरूप्यतां अर्थः प्रकाशस्त्वद्रूपमर्थो वा ज्ञानमेव वा अथार्थस्य प्रकाशो यस्तद्रूपमिति भण्यते यन्नाम
देतदुच्यते ज्ञानस्यार्थप्रकाशो रूपमिति तत्र कोऽर्थ इति विचार्यतां किमर्थश्चासौ प्रकाशश्चेति सामानाधिक
रण्यमथार्थस्य प्रकाश इति सम्बन्धः आहोस्विदर्थस्य प्रकाश इति संबन्धमात्रं तत्र संभवमात्रेण शङ्कितम
थार्थे पक्षद्वयं परस्यानभिप्रेतमित्यप्रतिक्षिप्य तृतीयमेव पक्षं प्रतिदेसं विभजति षष्ठीकर्तरि चेत्कोदोष एवड
रूढः अथ कर्मणि षष्ठ्येषा एवयर्थस्तत्र हृदि स्थितः यदि नामार्थस्य प्रकाशनक्रियायां कर्तृत्वं तत्कथं ज्ञानस्यैव
मतिशयः न ह्यन्यस्यातिशयेनान्यस्य किंचिदिति वक्तुं शक्यं न यथा हि एषु तुभ्यादिरूपेऽङ्गभस्य सत्यपीत्यादिनोक्त :
परस्यैव दूषणोपग्रहात्माडरूढो दोषः प्रसजेत् अथ प्रकाशनक्रियायामर्थस्य कर्तृत्वं तर्हि णावकर्मकस्यापि णौ

श्री
तं. लो.
१२

13

कर्मोपपनेत्येनमर्थं प्रकाशयतीति सिद्धः प्रेषणाध्येषणादिविलक्षणस्तत्समर्थाचरणलक्षणः प्रयोज्यप्रयोजकव्या
पारभावः एवं च प्रयोजकव्यापारस्य प्रयोज्यव्यापारनिष्ठत्वात्प्रकाशमानघटार्थज्ञानेन प्रकाशत इति तत्र न युक्तं
स्वयं प्रकाशमानस्यार्थस्य प्रयोजकव्यापारे निपेलक्षणे ज्ञानोपयोगवैयर्थ्यात् तथाप्रकाशमानघटार्थः स्वप्रथादि
वैलक्षण्येन योग्यतयाप्रकाशमान इति स्वव्यापार इति प्रयोज्य इति चोच्यते तदप्ययुक्तमेव स्वयमप्रकाशमान
स्य प्रश्नेन प्रासादस्येतनवचरोपयोगोऽपि प्रकाशनासामर्थ्यात् योग्यता च प्रकाशप्रकाशरूपतया निरूप्यमाना
पुनरप्यसामर्थ्यवैयर्थ्ये नातिक्रामतीत्यर्थस्य प्रकाशेऽज्ञानस्वरूपमित्येतदसमीचीनं तदाह तथा चेदं दर्शयाम
किं प्रकाशः प्रकाशते अप्रकाशो वापि नैवासौ तथापि च न किंचन तत्र प्रकाशः किं प्रकाश्यते वैयर्थ्यादप्रकाश्यते इ
त्यर्थः अप्रकाशोऽप्यसौ च सामर्थ्याभावेन प्रकाश्यत इति संबंधः एवं च सति प्रकाश्येपाबाह्योर्थः प्रकाशते च ज्ञानेन
किंचित्स्यादित्युक्तं तथापि च न किंचनेति ननु यद्येवं तत्कथं लोकेऽपि देवदत्तश्चैत्रं ग्रामं नयतीत्यादौ प्रसिद्धः प्रयो
ज्यप्रयोजकभावो घटते इत्याह तर्हि लोके कथं एषोऽर्थः गच्छत्यगच्छति वा प्रयोज्यप्रयोजकव्यापारेण न किं विद्धः
वेदितिभावः अत्रैवोत्तरमिति उच्यते चेतनस्यैतौ सख्यापर्यस्य विषयोज इष्टतोपचारिकः इह प्रेर्यप्रेरकोभयप
रमार्थत्वादेतस्यार्थः तत्र प्रेर्यस्य स्वातन्त्र्येण प्रवृत्तक्रियत्वेऽपि पारतन्त्र्यपरामर्शलक्षणः प्रेरकस्य च स्वातन्त्र्योऽपि प्रे
र्यैसमधिगतस्वमतेऽस्य स्वात्मन्यपेक्षिणी यत्परामर्शलक्षणोऽभिप्रायो येनोभयाभिप्रायमेलनारूपः प्रयो
ज्यप्रयोजकभावात्मा गुणः संबंधः स च खलु सति यत्र पुनः प्रयोज्यस्य प्रयोजकस्योभयस्य वा जडत्वादत्र संभवि

णीतोभिप्रायोनसंभवति तत्रासौनास्त्येवलक्षणयातत्रतत्रतत्रयात्रावर्तितव्यो यथाशरंगमयति कारीषोध्यापयति
वायुर्वह्निंपातयतीति तदाह तथाहिगंतुंशक्तोपिवैदेशोन्यायमतंगतेः मल्लानपवत्रस्मिन्नागमितः स्वामिनोति
हि स्वामण्यतो शक्तिंबुद्धस्त्वयीनतांस्फुटं पथ्यन्निहन्तिमाशाक्यगमयामीतिभाषते प्रेर्यप्रेरकयोरेवमालिकी
एपर्थसंगतिः तदभिप्रायेणान्योपिलोकोव्यवहरेत्तया शरंगमयतीत्यत्रगुरुतैव्यागाख्यसंस्कियो विदधत्येवकम
त्यउपचारेणज्ञायते वायुरह्निंपातयतीत्यत्रद्वावपितौजडौ हस्तमिः प्रेरकप्रेर्यवगुणापरिकल्पितौ प्रेर्यप्रेरक'
योरिति शरंगमयति वायुर्वह्निंपातयतीति च निहन्तिमाशंकेति गंतुंशक्यतेयोदासीन्यादिनाकदाचिदाकांक्षे
दित्यर्थः प्रतस्मगाक्षत्त्यपिप्रयोज्यप्रयोजककव्यापारेणावश्यंभाव्यमितिभावः एवमिति प्रयोज्यप्रयोजकयोर
भिप्रायमेलनेनेत्यर्थः तदभिप्रायत इति मुख्यएवार्थेद्रूपतामनुसंधायेत्यर्थः अन्योपिलोकइति प्रयोज्यप्रयोज
काभ्यापरस्तदस्यापीतियावत् तथेति प्रयोज्यप्रयोजकभावेनवेगाख्यसंस्कियां विदधदिति प्राकर्षणमात्त
णादाविक्षाप्रयत्नादिमान् धनुष्कः प्राकृष्टधनुर्बाहितस्य शरस्य मुष्टानेनतरप्रयत्नापेक्षात्माङ्गुलिसंयोगा
ज्जमेङ्गुलिकर्म तस्मात् ज्यांगुलिविभागः ततः संयोगविनाशे धनुःस्थितस्थापकलक्षणसंस्कारापेक्षाद्धनु
ज्यासंयोगात् ज्यायांकर्मोत्पद्यते तेनस्वकारणापेक्षेणज्यायांवेगाख्यसंस्कारमारभ्यते तमपेक्षमाणः शरज्या
संयोगोनोदनंभवति तस्मादिषावाद्यंगमनात्मकंकर्मतत्नोदनापेक्षं इषौवेगाख्यसंस्कारमारभते यस्मादाप
तनादिषौकतरोत्तरकर्मारंभः प्रेरकंमन्यतेइतिस्वयं यतेदेवाद्योपजारबीजंप्रेरकंमन्यतादेवहि यस्माद्भपवा

श्री॰
तं॰ लो॰
१५

15

गल्लोकेनप्रेरकउच्यते वस्तुतोहिप्रेर्यप्रेरकयोः परस्परापेक्षंरूपं तयत्रप्रेर्यंस्वतन्त्रंस्वात्मपरत्वेनास्तेयथानायात्मकंप्रेर्यत्व
मेवनास्ति तदनुसंधिमान्नापिप्रेरकस्यतदपेक्षंस्वातन्त्र्यंप्रेरकत्वंकथंस्यात् अतःप्रेरकंमनस्तत्त्वंतस्यप्रेरकत्वमुपचारा
ल्लोकेव्यवहृतेर्देहिक्तं उपचारेणगीयतइति कर्मबीजाख्यापयतीत्यादौप्रेरकस्यज्ञातृत्वात्मस्यप्रेर्यत्वात्संभवेऽपिप्रे
र्यमन्यतानिमित्ताउपचारादस्थितःप्रेर्यताव्यवहारः परिकल्पितोविस्पष्टउपचरितोवितियावत् तत्रचबीजंवायु
प्रभवमधरइवविभागजनकंचकर्म यतदेवोपसंहरति इयंतुज्ञेनसंबंधेनस्वाध्यायएवार्थसंगतिः प्राक्तामन्यत्र
विततमेननहिस्वतन्त्रोमया संबंधदेशज्ञस्यज्ञानंतस्यवासंबंधेन्यार्थस्यस्वाध्यायेभावाद्धेतोरुपचारइति यथार्ज
माद्देस्वव्यायोऽस्ययात्ययातयिर्दीत्वेप्रयोज्यप्रयोजकभावोऽतस्तदस्तुयाज्ञानसमर्थप्रकाशयतीत्यत्र ज्ञानार्थ
योःप्रकाश्यप्रकाशभावेऽपिइतिनैयायिकानांज्ञानमप्यचेतनमेवापद्यतेज्ञेयत्वादर्थवर्तियोगात्स्वतरात्माचेतनः
यदाहुः सचेतनश्चित्तायोगादिति एतत्स्वात्मव्यवहार्यमभिविषत्तिइतिनैतद्यथास्वम् एतदभ्युपगमेचयथाप्रयो
ज्यस्यादेःस्वव्यापारःएतनेनात्मिकासिद्धमेवमिहप्रयोज्यस्यार्थप्रकाशनमभ्युपगंतव्यं तदाह अस्तुचेज्ज्ञास्येतेता
हिसदव्वपत्तदश्चित् एतस्याभ्युपगमस्योपचारत्वम् वस्तुतस्त्वसौपीहनसंभवति निमित्ताभावात् नहित
न्निमित्तमुपचरणंन्याय्यमित्याह उपचारेनिमित्तेनकेनापिकिलभूयते केनापीति यत्रयथाक्वचित्तेन एत
देवदर्शयति वायुःपातयतीत्यत्रनिमित्तंतत्कृताक्रिया गिरौयेनाश्मसंयोगापाशाद्भ्रंशमुपयाते इहत्वात्मना
मर्थस्यनकिंचित्करमेवतत् उपचारःकथंनामभवेत्सोऽपिस्वच्छस्त्रसत् तत्कृतेतिवेगवद्व्याप्तवायुसंयोगा

पाशाद्वेशे प्रपद्यते इह तज्ज्ञानमर्थस्य ग्राह्यमित्यर्थः क्रियैवावयवविभागजनकं कर्मेति यावत् संयोगादिक
मित्तस्मादवयवविभागः ततः संयोगनाशः ततः पततं प्रत्यक्षाश्रयसंनिमित्तकत्वात्तत्तत्स्यतात्त्विकत्वं इह पु
नरर्थातिशयपत्तेश्च सर्वसर्वज्ञताभवेदित्यत्र काशुक्त्यात्तज्ज्ञानेनार्थस्य न किंचिज्जन्यते इति निमित्ताभावादुप
चारः कथंकारं नतिष्ठेत् तज्ज्ञानोदयेपि कथमर्थः प्रकाशते इति स्यात् यत्तानिनिमित्तमनुपचारोस्तु किं
मनेन मेत्यतीत आह भवेत्सोपि इदं वस्तुमत् इति न ह्युपचारे विषयस्य विषयिणा तादूप्यं वस्तुतो घटते येन
प्रकाशेनार्थः प्रकाशतोपचारान्यथाभावमियात् न ह्यरण्योपचारान्माणवकोग्निरेव भवेद्येन दाहादिल
क्षणां तदर्थक्रियामपि कुर्यात् तदाह अप्रकाशितएवार्थः प्रकाशतोपचारतः तादृशोविशि ·· किं हि इह
त्वत्रानुपचारतः अप्रकाशितइति असंजातप्रकाशनात्मधर्मकइति यावत् तादृशीतिप्रत्युतप्राक्तनरूपोपर्क
शितएवेत्यर्थः ननूपचारः सर्वात्मनाचेद्वस्तुसंस्पर्शमाणवकोग्निरित्यादिस्तद्व्यवहारः सर्वत्रैवाविशे
षेनप्रसिद्धः अथतत्रोपचर्यमाणेसहवर्तितैक्ष्ण्यादिगुणसदृशगुणयोगोनामवास्तवमस्तिनिमित्तं य
दृशादेवमादिरुपचारः समुल्लसेदिति चेन्नैतत् एवमपि तत्र किंवास्तवं निमित्तं येनार्थस्य प्रकाशनमुप
चरेम तस्मादपरमार्थिक एवात्रोपचार इत्याह विशेषावस्तूपचारे यद्बीजं तैक्ष्ण्यादि तस्य सत्त्वं प्रकाशनो
पचारे तत्किंबीजं यत्र सम्यक्ता मदतिवह्निगततैक्ष्ण्यादिसदृशस्यतैक्ष्ण्यादेः विशेषावास्तवत्वात् किंबीजं
मिति न किंचिदित्यर्थः ननु किमनयासदसन्निमित्तादिपर्येषणया यावता हि ज्ञानेनैव विषयविषयिणोर्वि

श्री·
न्या·ली·
·१५

15

विक्तंस्वरूपंप्रयोजनतयाचेतनःप्रत्यक्षएवैवंव्यवहरति माणवकोग्निरिति नैवंतन्नव्यवहरणयोग्यतात्वेश·
योजनत्वहि स्याप्रकाशरूपेणार्थे प्रकाशोयमर्थइतिव्यवहरेदित्याशंक्याह सिद्धेहिचेतनेयुक्तमुपचारः सहिस्फु
टे अध्यारोपात्मकः सोपिप्रतिसंधानजीवितः नचाद्यापिकिमप्यस्तिचेतनंज्ञानमुत्पादः अप्रकाशंतदन्येनतत
प्रकाशेणसंविदिः सोपीत्यध्यारोपः भवेत्मतेचप्रतिसंधाताकश्चिन्नास्ति सहिचेतनवोस्यादात्माचेतनंज्ञा
ने नतावदद्याप्यात्माचेतनःसिद्धस्तस्यस्वतोचेतनस्यज्ञानयोगेनथात्वोपगमात् ज्ञानयोगश्चसमवायेन
यथात्मनस्तथाज्ञानतयार्थेंद्रियादेरेकार्थसमवायेनचसत्वादेरपिसंभवतीत्यर्थादयोचेतनाःस्युः नचाद्यनि
यमनिमित्तमुपलक्षणमेयेनसमवायाश्रितत्वंनैकार्थसमवायादेरिति यस्मात्तःसंवेद्याविशेषेपिवस्तुस्वभा·
वकृतएवायंविशेषइत्युच्यते तत्फलायतनप्रकारान्तरेणेंतदाह नचाद्यापिकिमस्तिचेतनमिति नापिचेतनस्वरू
पेज्ञानएवचेतनइतिव्यवहारस्तस्यधर्मरूपत्वेन धर्मिव्यपदेशयोगात् तदपिचज्ञानंयदिस्वयंप्रकाशरूपं·
भवेत्तदेतद्युज्येत नचैतदित्याह ज्ञानमप्युतदप्रकाशमिति अप्रकाशमिति विषयप्रतिभासकालेतदप्रति
भासाभ्युपगमात् नत्वप्रतिभासमपिज्ञानंशाबराणामिवास्माकंपरोक्षंनिमत्तुमेयं अपितुविषयग्रहणा
नंतरमात्ममनःसंयोगाजेनज्ञानान्तरेणज्ञायतएवेति कथमस्याप्रकाशरूपत्वेयेनचेतनव्यपदेशानस्यात्
तदाह तदन्येनतत्प्रकाशेणसंविदिविति अयंविधिरित्यर्थः प्रकाशीयःप्रकारइत्यर्थः यथाहर्थस्यान्येनज्ञा
नेप्रकाश्यएवेप्रयोज्यप्रयोजकभावःप्रसक्तः सचनमुख्योगौणोवाकथंचनव्यतिष्ठतेइत्यर्थस्यप्रकाशानमे

वक्तानस्वज्ञानांतरवेद्यत्वेपि श्रुत्वाण्यर्थासंगात्वभावात्प्रकाशनमेवनसिद्ध्येत् नचाप्रकाशात्मनोज्ञानस्यप्रतिसंधानं।
नयुज्यते प्रतिसंधानाभावेनजीविनाव्यारोपाव्ययपत्त्यातुपचारः कथंकारमत्रव्यवतिष्ठेतेत्यलंबहुना ननुप्र
प्रकाशत्वेपिदीपायथार्थस्यप्रकाशमेवतथाज्ञानमपिभवेत् नकथमेवमुक्तं यज्ज्ञानांतरवेद्यत्वादप्रकाशरूपंज्ञा
नेनार्थंप्रकाशयेदितीत्याह नत्वप्रदीपोरूपस्यप्रकाशः कथमीदृशं नन्वत्रापिप्रागुक्तं समग्रमेवदूषणंज्ञानाप्र
तिपत्तेरित्याह अत्रापिनवहंतेतत्ताः किंतुयुक्तिविकल्पनाः यत्तायुक्तिविकल्पनाइति समनंतरोक्ताप्रत्याशुत्व
एवर्थंमूलाउपपत्तिप्रकाराइत्यर्थः अत्रनकेवलमेवयुक्तिपराहततंयावद्वैवस्यमपीत्याह अत्रनकेवलमेवयु
क्ति यादृशास्वेनरूपेणदीपोरूपंप्रकाशयेत् तादृशास्वयमप्येषभातिर्ज्ञानंतत्तेनातथा नेतत्थेति स्वयमप्रका
शरूपत्वात् अतएवतत्रशब्दोव्यतिरेके तेनार्थप्रकाशनावसरेदीपस्यस्वयमपिप्रकाशो नतत्रावसेयमिति अ
तस्मात्स्वसिद्धंयदसिद्धेनसाध्यतेइतिन्यायेनस्वयमप्रकाशमानंज्ञानंकथंपरंप्रकाशयेदित्याशयः वैषम्ये
मेवप्रकारांतरेणापिदर्शयति प्रदीपस्यैषभावान्तंप्रकाशत्वंस्यात्सफले अन्यथानप्रकाशेरन्नभेदिवेदृशोविधि
प्रकाशत्वंदर्शनीतिस्वप्रभाक्रमणायाभास्वरतामायत्तेइत्यर्थः येननीलेपिपटेरक्तटपूरकमइतिप्रवादकानां
प्रवादः एवंभास्वरतादानमंतरेणचार्थानांप्रकाशएवनस्यादित्यक्रममन्यथानप्रकाशेरन्निति अतएवमंद
प्रायेप्रदीपेनकिंचिदपिप्रकाशेतेस्फुटत्वमलमिति प्रकाशेनपर्याप्तः समर्थइतियावत् ज्ञानेपुनरर्थस्य
नकिंचिदपिनिशायमायत्तेइत्युक्तं बहुशः यदिच किंचिकारमपिज्ञानमर्थस्यप्रदीपइवप्रकाशत्वंदध्यात्ते

श्री॰
तं॰लो॰
१६

न तस्याभेदो वाच्यः दीपो हि स्वप्रभाभास्वरणात्मना वांतर्व्यापारेणार्थं प्रकाशयंददाति तानस्यत नकश्चिदंतर्व्या
पारोऽत्र संभवति अयमेव प्रकाशोऽस्यार्थ इति नैतदभेदं तत्रेण कथंचिद्भवतीत्यस्य तम भेदो दृष्टो विधिरिति ईदृशो
विधिरिति प्रदीपन्यायेनार्थं प्रकाशयतु यथा तत्सामर्थ्यं प्रकाश इत्यर्थः अत स्वप्रकाशस्य स्वशक्तिविस्फारसारतया
दर्थवपुषापि स्फुरतीति सिद्धं तदाह तस्मात्प्रकाश एवायं पूर्वोक्तः परमः शिवः यथाय यथा प्रकाश तत्तदा
त्मवपुः स्फुटे पूर्वोक्त इति पूर्व प्रथमाह्निकादौ यदुक्तं ज्ञेय स्वपरं ततत्वेयः प्रकाशात्मकः शिवस्तस्य यत्तत्प्रका
शं यथायथेति येनयेन नीलाद्यात्मनेत्यर्थः यदा च ग्राह्यग्राहकयोस्तथा प्रकाशार्थयोरभेद एव तदा नीलतस्मिन्नी
लस्य प्रकाशमानत्वमपि स्वरूपगत एव धर्म इति युक्तमुक्तं वेद्यताभावस्य निजं वपुरिति अत आह एवं च नील
ता नाम यथा काचित्प्रकाशते तद्वत्प्रकाशितवेद्यत्वं तत्स्वभावोऽशशृंगवत् नत्वभिन्नमिदमर्थप्रकाशात्मकमवे
द्यस्वलक्षणं तत्र वेद्यत्वं नाम धर्मः किमर्थांशे निपतति आहोस्वित्प्रकाशांशे इत्याशंक्योक्तं तत्स्वभावो शशशृंग
मिति अत एव शाबरमतोदितस्य ज्ञातविषयस्यापि प्रमाणबलस्यानेकत्र ह्रःक्रियमाणेनापसिद्धांततां प्रस्तावी
त्याह वलेप्रकटतार्थस्य संविद्धे विद्वयेत्ततः विषयतोरस्तंत्वसिद्धान्तं चापितद्विषयः प्रकटतार्थगतेति कौ
मारिलः संविन्मात्रगतेति प्राभाकरः तत इति समनंतरोक्तप्रकाशयोरभेदलक्षणाद्धेतो विषयत्वत इति प्र
कटतायाः अर्थधर्मत्वे सर्वान्प्रत्यावार्थः प्रकटो भवेदिति सर्वे सर्वज्ञा भवेयुः संविन्मात्रधर्मत्वे च न किंचि
दिप्सैषा परोक्ष एव स्यात् इत्येवमादिदूषणात् रहितमिति न हीदानीमर्थस्य प्रकटता सर्वाविशेषेणेति युज्यते व

16

क्के प्रमातैकतानात्सर्वोर्थसंवादाभावात् मायापदेशयद्यपि भिन्नाः प्रमातारस्तथापि प्रकाशमानोर्थः प्रमातॄणा॰
तेतेन तत्र प्रमाभेदेन सुखादिवेदकैकदेशो नियत एव संविन्निश्चयप्रमातृधर्मोपि नार्थसंवेद्यं जहाति प्रमातृ॰
सारमात्रादर्थस्येति सर्वं सर्वेशास्यार्थपाभोदस्य न कश्चिद्विशेषः तत्र एव वृत्तयोः परस्परेणापि संथा ते प्रकटा
तास्मं विज्ञिपक्षयोरन्योन्यं नास्ति कश्चिद्भेद इत्यर्थः इत्यमियता नीलादिवेद्यत्वं भावधर्म एवेति निर्वाहितं प
ते स्वदृष्टान्तदृशा दर्शयति तथा हि निभृतं चौरस्मैव वेद्यमिदं स्फुटं वृद्धानादत एवाप्रप्रदीप्ता विवेशापि सन्
मैयं पश्यति मां नेत्रविभागो नेति सादरं संदेहमपहृत्यैनैवासिक्तं पश्यति कामुकः यथा वाशृंगारतस्मादविचारे
णैव तत्तदर्थजिज्ञासायोपि भावांश्चैव स्वेशेणोन हि दितमिति स्फुटं निश्चितं ज्ञाता परस्मायास्वमपि भावज्ञाते
नैवादनेइतितत्त्वपादान्ते हान्ते वा तत्र समर्थे इति किं कर्तव्यतामूढतया दुःखितप्रायत्वान्निभृतस्थिरलिखि
तएवास्ते इत्यर्थः कामुकस्य संयमनोरथशतैरप्याप्राप्यप्रियतमासादरं न तत्रवेशाववृक्तं जनामात्रेणनेत्रवि॰
भागेन नत्र नदृश्यवस्त्वदृष्टेन नेत्रेण मां पश्यति तापमपि मदृशो नाहं विस्मतीति संदेहं अपहृत्यैनैवासिक्तं प
श्यति तामपि स्वात्मनिमग्नातिशयेयमवबुध्यते इत्यर्थः तत्र यथार्थवेदने प्रमातृधर्मः स्यात्तत्कथं वेदोक्षे
त्रविदितत्वादर्शनं दद्यात् कामुकस्य प्रियावलोकनादस्पृष्टासिक्तमेव स्वदेहं जानीयादिति युक्तमुक्तं वे
द्यत्वभावधर्म इति पूर्वविनिवेशितमश्वेवयस्तस्यार्थक्रियाभेदापदर्शनादप्युदाहरणद्वयोपादानं यत्पूर्वं
दुःखकारित्वं अत्र च सुखकारित्वमिति न तु संविन्मयमभेदर्थस्तर्हि तस्य वेद्यत्वमिति संविदेवाक्षाभेवत् न

श्री
ते.लो
१७

17

वसंविदर्थस्य धर्मस्तत्किमिदं वेद्यत्वं भावधर्म इतीमामाशंकामाह नचैतज्ज्ञानसंवित्तिमात्रं भावांशा॥१९॥ अर्थक्रियाक
रणमेवैन धर्मः को न्वसौ भवेत् नचेदं वेद्यतेज्ञानात्मकं संवित्मात्रमेव यतो ज्ञावांशा॥२०॥मिति अत एव तत्संवि
न्मात्रातिरिक्तत्वेनार्थो ज्ञावांशः धर्मस्तथात्वे वास्य किं निबंधनमित्यत्र अर्थक्रियाकारमिति स्वार्थक्रिया
समनंतरमेव दर्शिता धर्मस्त्वेनेष्यते तत्र नीलादेरपि कश्चिद्धर्मः स्यादित्युक्तं नचेत्को न्वसौ भवेदिति मात्राग्र
हणेन वेद्यत्वस्य ज्ञानसंवित्तेराधिक्यं ध्वनितं अधिकश्च भावो वास्यान्तद्धर्मो वा न तावद्वेद्यत्वं भावः तस्य हि वे
द्यत्वे न त्वे वेद्यत्वमेव सः अनवस्था तद्धर्मेप्येवेति युक्त उक्तं वेद्यत्वं भावधर्म इति नन्वत्रोक्त एव दोषो यद्वेद्यता धर्मा
भावः सर्वोन्मतिः स्यादिति नैवमेतदित्याह यस्मादुक्तं वेद्यता धर्माभावात्सर्वानविशति स्यादित्येतत्स्वपक्षेप्युक्तं ड
षयोर्ग्राह्यत्वं नत्व भवत एवार्थस्यामोहायदयुथमानं वा सर्वेषं प्रतिरूपात्मकोऽर्थो ग्राह्ययोर्यथा वारुणीग
दावयोक्तमेव कृता ग्रथज्ज्यात तथा मत्यंतं प्रतिप्रयुक्तं हृष्यां मत्यत्तमेव हन्यात् तथा ज्ञातेनानतिशायि
नोऽर्थस्य त्वत्ते यदि वेद्यतामासादयेत्तदतिशायत्वाविशेषात्सर्वोन्यसेवाभीवेद्यः स्यादिति अस्मत्पक्षे पुनः
परप्रकाशात्मास्वतंत्रः शिव एवास्तीति तदपेक्षया नान्यः कश्चिदिति सर्वोर्थस्वैव भावात्कं इति च कस्यादि
त्याह अस्माकं च स्वप्रकाशशिवतामात्रवादिनां अयं श्रितिचकास्तीति वचयएव न विद्यते मयापदेत्वप्रमातृ
भेदेपि तत्तन्मातृमयत्वाद्घटः स्वात्मादिवत् प्रत्येकं नियत एवेत्युक्तं शाक्तनकेवलमेकप्रमातृमतत्वेनस्वत्वा
देनैवं प्रयुज्यते यावत्प्रमातृप्रमेययोस्तत्ततो भेदापीत्याह सर्वान्प्रतिचतत्नीलं सम्यक् स्वेतियत्ववः तदप्यवि

दित्तप्रायेऽत्र हीतेमग्य बुद्धिभिः प्रविदितप्रायमिति किमिह वक्तव्यं वेद्यतायाः सर्वाविशेषं प्रसंजयितुं नीलतो
निदर्शयामः किमतोमेव विद्यतामित्यविविच्यैवोपपन्नमित्यर्थः एतदेव सयुक्तिकं दर्शयति नहि कालि
ग्निरुद्रीयकायावगतनीलिमा नवनीलः किं न पीतोऽभैवंभूतत्वनीलकः नकेचिन्नमिति नीलोऽभीनीलो
वायेप्रतिस्थितः तेप्रमेयवसवेद्यः स्यात्संकल्पद्वारकोऽनन्तः कालाग्निरुद्रस्य देहे संविदितो योनीलिमा बोध्य
एः सचनवैत्रस्यभावितमर्हति नहि धर्म्यन्तरोपगतो न धर्मेण धर्म्यन्तरं नह्येतया स्ववचं ग्रन्थं तत्ससंभावनीयत्तो
परधर्मस्य परत्र दर्शयितुं कालाग्निरुद्रीयकायेत्युक्तं ननु यदि प्रत्यगतो नीलिमा नान्यत्रगतस्तात्किमसौ तं
प्रतिप्रीतोभवेदित्याशंकते किंतु पीत इति परिहरति मैवंभूतत्वनीलक इति नहि पीतोऽनेति नीलोऽभवितु
मर्हति नहि घटलोहित्यमेव न पटस्य मालिन्यमिति एवं लोहित्यमिति युज्यते ततश्च यथा नीले सर्वान्यनी
ति निदर्शनस्य कोऽभिप्राय इति न जानीमः यदि तु वेद्यतया नीले सर्वाविशिष्टमिति निदर्शनार्थस्तदिदं
दार्ष्टान्तिकमेव दृष्टान्तीकृतं स्यमत विरुद्धं चाभिहितं योनोक्तं भेदमिति इह पुनरस्मन्मते प्रमात्रपेक्षयं
पृथक्त्वमात्प्रमेययोरवभासमेव नास्तीति किं कस्य च कास्यादित्याह नकिंचित्वीति निलोसावित्यत्र
तं प्रमात्रपेक्षयान्तःस्फुटेऽपि प्रमातृप्रमेयविभागे प्रमातृमयत्वादर्थस्य पूर्वोक्तयुक्त्यायं प्रतिनीलं नीले प्रवि
वेद्यमेव स्यादित्याह नीलोवेत्यादि एककारोभिन्नक्रमः ननु नीले वेद्यमेवेति नियमनिमित्तं न किंचिदन्यदप
मो देशकालादिभेदेन परोक्षस्यापि संभवादित्याशंक्याह संकल्पद्वारकोऽनन्त इति यस्तु संकल्पादिनावे

घोन भवति नाभ्यां तेभ्यन्निनीलोपि स्यात् नहि नीलतया वेदनं मुक्त्वा नीलो नाम कश्चित् प्रकाशमाने तेवसनेभमाना
न भवन्ति ने पापेतस्य धर्मस्य परत्वाविशेषेपि परत्र यथा नियमो दृष्टस्तद्वदिह किं नेष्यते इत्याह यथा दार्थप्रका
शात्मज्ञाने संगीयते न्वया तथा ज्ञातास्वेद्यत्वमायोग्यं रूपमुच्यतो भवतापि समाने नार्थप्रकाशात्मकत्वे ज्ञान
स्य रूपत्वं युक्तं तत्सर्वार्थप्रकाशताविशेषेपि पुरुषापन्न था सु संप्रयोगादिदं नीलज्ञानमिदं पीतज्ञानमिति नि
यतार्थप्रकाशात्मकमेव ज्ञानमभ्युपेयते एवमस्मत्पक्षेपि वेद्यताव्याभावीयो धर्मः प्रतिनियतप्रमातृसंबंधी
वाभिधीयतां को यमस्थाने भिनिवेशाय देकस्य प्रमातुर्वेद्यः परस्यापि तथा स्यादिति अथ तत्र जनकत्वादिनिबं
धं नरमाश्रीयते तर्हि ह्यापि समानं भवति हि मायापदे प्रमातृजत्वं वेद्यत्वमित्यभिमानः अत एव नैयायिकस्य कि
येवमयापदेश्यवहारनिबंधमिति चिंतनानामाम्नायः न चास्य पर्यंतुयोगः स्यादवकाशलेशमपि प्रपश्यामः इत्या
ह न च ज्ञानात्तु नियतः कश्चिज्ज्ञानीयथा न च अर्थज्ञानाय द्वयो यस्तद्वैधं एवं प्रकल्प्यतां नहि यथा भवतां ज्ञानाद्व्यति
रिक्तः स्वतंत्र एवार्थः संभवति यद्येहार्थप्रकाशव्यतिरिक्तज्ञाना नाम येनैकस्य प्रमातुः प्रकाशमानोर्थः प्रमात्रं
न्तरस्यापि किं न स्यादिति चेद्युच्यते अस्मद्दर्शने हि परस्परानुरूपग्राह्यग्राहकयुगलनिर्माणभंग्यायो यदर्थावभा
समे संभिन्नसंविदात्मकः स तस्य प्रमाता यस्तु न तथा स न तस्य प्रमातैव भवेदिति तत्र तिकथंकारं प्रकाशता
मिति सिद्धं नियतप्रमातृवेद्यत्वं तेन दस्माभिः पुनः पुनरुच्यमानं कृत्वाप्यनवधारयन्न वक्ता स्यतामेव यासकौ
त्याह तन्न हि ज्ञातृवेद्यत्वं सर्वात्मतिवभासतां इत्येवं चोदयत्सम नेत्र जडधियर्थ्यतां नहत्वं प्रतिवेकोविज्ञातिसा

वेद्यतया बधिरद्युर्येनास्मीति बधिरो न शृणोम्येव शब्दं पुनः शृण्वन्नपि न शृणोमीति न मध्यान्दिने नेत्रैरेव स्फुटं यत्तस्य
दर्शनावभासमभिन्नं संविद्रूपमस्यं केचिद्वदन्ति न चैकात्म्येन सा वेद्यता नैव भाति न प्रतिभावो वेद्यतामेकतयाया।
दित्यर्थः अतश्च वेद्यतानामभावस्यैव निजं वपुरिति स केकिमिति निष्कारणं मियतत्र प्यनेइत्याह यद्यस्माद्वर्तते
समवायस्य स्वाश्रये वर्तमानः स्वयमेव हि निरूपत्वात्र समवायादिष्वन्तरमपेक्षते यथा सभावानामन्तर्हि निरू
प्यद्यते सामान्यग्राहकसंशयप्रतिपत्तया गुणकर्मादयो यथासौ व्याहृतिबुद्धिहेतवो विशेषाः इह तेषा।
मपि तथैव सामान्ययोरो न संशयबीजभूतत्वे प्रलये वा नित्यद्रव्येषु सजातीयविजातीयवैलक्षण्याधायि।
नोऽन्त्यं तव्याहृत बुद्धिहेतवो माहेश्वाम अन्यथानुपपत्त्यायोगिनोऽत्र प्रत्यक्षेण सिद्धाश्रया विशेषा उपगम्यन्ते भा
वाश्च स्वरूपेण व्याहृत्तानाम्प्यव्याहृत्या व्याहृतिधियाऽतद्व्याहृत्या इति भेदा विशेषैरेव व्याहृत्यन्ते विशेषास्तु
स्वयं व्यावृत्तिरूपत्वान्न व्याहृत्या व्याहृता वेति विकल्पनीयाः यथा च पटः स्वरूपान्न श्वेतो नाप्यश्वेतः श्वेतगुण
संबन्धात्तु श्वेतः श्वेतगुणस्तु श्वेतरूपत्वादेव न स्वसमवायिश्वेतान्तरमपेक्षते यथा च गन्तानां स्वयं गन्तानाम
गन्तागमनक्रियायोगान्तु गन्ता गमनक्रियात्मा गमनात्मिकत्वादेव न स्वात्मनि गमनमन्यदपेक्षते एवं स्वक
लधर्मयुक्तोऽपि भावः स्वयं न वेद्यो नावेद्यो वेद्यतासंबन्धात्तु वेद्यः वेद्यता पुनः स्वात्मनैव वेद्यतान्नावेद्या वेद्या
वेद्यतयोऽकं युक्तोऽप्युपलभ्यते न तु यथा स्वरूपेण सतीति यावद्यत्तापि स्वरूपेणैव वेद्यस्त स्वेऽस्व स्वरूपस्यैव वेद्य'
त्वे वेदकत्वं च हितस्य प्राप्नुयात् न त्वन .... विरोधादित्याशंक्याह स्वयं वेद्यतां स्वप्रकाशतायामेव विश्राम

श्री॰
ते॰ले॰
१२५

19

इति वेद्यताभासमानाव स्वयं नीलादिधर्मवत् स्वप्रकाशस्वप्रकाशाद्धर्मादेति प्रकाशतां वेद्यतां च यदा स्वयमव-
भासते तदासौ नीलादिवज्जडो वित्तेन रूपेण प्रकाशमानतापि स्वप्रकाशनाव्यात्स्वरूपादेव प्रकाशतामेति स्वय-
मेव प्रकाशते न तत्स्वापेक्षतायाकर्मभावं लभत इत्यर्थः । अ .... भवितुमर्हतीत्याह प्रकाशैकात्मवि-
श्रान्तिं विसंवादयति चेत्ततः नान्या काचिदपेक्षास्य कृतकृत्यस्य सर्वतः वेद्यहि ज्ञत्तयाप्यारब्धे अकं विदि वि-
श्रान्तिर्नाम वेद्यताविश्रान्तेस्तत् किमन्यदपेक्षणीयं येन वेद्यतायामपि वेद्यताभवेदित्युक्तं नान्या काचिदपेक्षे-
ति कृतकृत्यस्य चेति ननु यदि प्रकाशविश्रान्तिमत्त्वमेव वेद्यता तत्कथमस्याभावधर्मत्वमित्याशंक्याह य-
था च शिवनाथेन स्वात्मे त्र्यग्रा स्पन्दभेदा नीलादिवत्तथैवायं वेद्यताधर्म उच्यते धर्मः इत्यर्थाज्ञातस्य ··· न
नु भवतु नाम वेद्यताभावधर्मः का नो विचिकित्सा इदं पुनः कथं यदनेकेषु प्रमातृषु तत्त्वानैक्यमिति न हि
प्रमातृभेदेऽपि नीलस्य स्वात्मनि कश्चिद्विशेषायनेवं स्यादित्याशंक्याह एवं सिद्धं हि वेद्यत्वभावधर्मोऽभा-
वस्य रूपमित्युक्तं केयमाशयानवैषरी ननु भावधर्मं वेद्यतापदे नीलादौ वेद्यतायां अपि स्वव्यतिरिक्तस्वरू-
पावेदितापदे नीलादौ द्विवेद्यता वदि वेद्यतायोगादनवस्थापतेदित्युक्तं तत्कथं परिहर्तव्यमित्याह प्र-
नेन नीतिमार्गेणेति यथैकप्रमातृवेद्यतायां न प्रमात्रन्तरसंवेद्यायुक्तास्तथैव समानन्यायत्वात्द्वेद्यतान्त-
रसंवेद्यमपीत्यर्थः एतदेवोपपादयति तथा हि स्वेनीलाद्यैः सहृद्शी नामा वेद्यता किं तद्धर्मो सोयद्योगात्सद्ध-
र्मवान् धर्मी वेद्यत्वमभ्येति समवायवत् ननु भवत्स्वते वेद्यता नाम किं धर्ममात्रसत्त्ता न रूपता।

याशुणपदार्थान्तरेति तत्र धर्ममात्रत्वेन भवेदेवास्यावेद्यताख्यधर्मान्तरयोगः ज्ञानगुणरूपत्वेन च निर्गुणा गुणा
इति नीत्या कथमस्यावेद्यान्तरं सजातीयो धर्मः स्यात् तद्यथा वैजात्येन नीलतादावेद्यताख्यो धर्मो भवेन्नैवं तत्
स्यावेद्यत्वान्तरंक्षिप्तस्य नीलादिधर्मान्तरवैलक्षण्यं अपितु सो वेद्यताधर्मः समवायवृत्त्यास्या आश्रयस्य वेद्यव्य-
वहारहेतुः यं विना सकलधर्मकलापविनिर्बद्धोपि तस्य धर्मिणः स्वयं वेद्यावेद्यत्वविरहिणो वेद्यमिति व्य
पदेशोपि दुर्घटः स्यात् ननु वेद्यताख्यो धर्मोपि स्वयमवेद्यश्चेदसिद्धप्रवासादिति कथमिव स्वसंबंधेन।
धर्मिणं व्यवहारयेदित्याशंकां परिहरति अत दृष्टान्तयति सत्तावत्समवायश्चेति अनेन गुणकर्मविशेषेष्व
प्यनुपलक्षिताः पतदेव व्यनक्ति अथेयथाहि करुते सत्तासत्समानः समवायोपि संश्लिष्टः श्लिष्टानश्लिष्ट
तारूपः अयोविशेषोपाहृतिरूपोव्याहृतिवर्जनात् व्याहृतामेति मां शुक्लमशुक्लं गमतेतथा तद्वन्नी
लादिधर्माश्रयगुणोथ धर्मी स्वयंस्थितः अवेद्यो वेद्यताभूयाद्धर्मो हि वेद्यतात्मनः ... कुरुते इति प्रतिवाक्यार्थम
नुयुज्यते सत्तीति स्वरूपेण संश्लिष्ट इति स्वयं हि निरूप इत्यर्थः अन्य इत्येषुत्पादविनाशयोरन्तेवस्थितत्वादेतशाश्व
तेषु नित्यद्रव्येषु भवनित्यितः इति यावत् विशेष इति स्वाश्रयस्य सर्वतो विशेषकत्वाद्भेदक इत्यर्थः सेति मेति स्वय
मेतद्रूपः अशुक्लं शुक्लं करोतीत्यर्थः तथेति अग्रान्तरे रंतारं कुर्यादिति तात्पर्ये वेद्यत्वमागतः सविश्यत इति यात
नीयं किलेदं भवदर्शने यदुत परसामान्यरूपाद्विविधा सत्ता स्वरूपसत्ता समवायिनी चेति तत्र समवायिनी द्रव्य
गुणकर्मस्वेव भवति स्वरूपसत्तात्सामान्यविशेषसमवायेषु यदुक्तं त्रिपदार्थसत्करी मतेति तत्र यथैव द्रव्यादे

श्री तं॰ लो॰ ·१·

यः स्व यः स्वरूपेण न संवेत्ता नासंत्तः सत्तासमवायान्न संत्तः सत्तास्वरूपेणैव सत्तान्तरासमवतीवेति पर्यनुयोगमात्र अनेना
परमपि सामान्यमुपलक्षितं यतो गौः स्वरूपेण न गौः नागौः गोत्वाभिसंबंधात्तु गौः गोत्वं तु स्वत एव तथा त्वान्यं जा
संतं तद्योगमावहति यथा च कार्यं वा करणं सामान्यं वा विशेषं स्वयमप्रवृत्तिरूपं समवायान्न्याकोद्दात्तं तपराम
र्शितेनामेति ननु नैकैकस्य पृथक्पृथक् त्वत्तादिसंवृत्तिरेवमवस्थितेति किमनेकप्रमातृवेद्यत्वेनेत्याह तावन्
मात्रार्थसंवित्ति तुष्टः प्रत्येकशो यदि कः संभूय गुणस्तेषां प्रमात्रैक्यं भवेत्ततः किं एवं हि मामाज्ञिकानामनेकप्र
मातृवेद्यतासंमीलनावान् कोऽगुणोऽत्तकस्मित्त्वात्तु भवत्यापि कस्यापि चमत्कारातिशयस्य निरूढ एव कु
तः स्यादित्यर्थः ‥‥‥ नतु त्वमवत्यंशप्रमात्रैक्याद्वैवं चमत्कारोऽभवेदित्याशंक्याह प्रमात्रैक्यं भवेत्तु कि
मिति एकस्मिन्हि वस्तुनि अनेकवेद्यतावभास एव स्वात्मविश्रांतिः सर्वप्रमातृसमारोहक्रमेण विगलितभेदत्वे
प्रमातृणां संकोचप्रशमे बीजं यत्त एवं विद्यानंदात्मंदोहयात्त्रात्ययि मवेत् अत्रत्वाह यदा तत्तद्वेद्यतया संदर्भ्यताभि
ते तद्वस्तु अशक्यानाप्नुयादन्यथा तु नामिदं तथा अशक्यामाप्नुयादिति एकैकप्रमातृसंवेद्यानीरसभावादिति याव
त् अनयदिति निरतिशयचमत्कारविकाशित्वमांतरा विहन्यमित्यर्थः अत्र हेतुस्तत्तद्वेद्यतावर्मसंदर्भमाभितामिति
प्रमात्रैक्ये न केवलं लोके सकलप्रमातृपरत्वया वेद्यत्वमेवं विचित्रार्थक्रियाकारिया वक्ष्यास्त्रेऽपि प्रमात्रात्मराये
त्येत्याह शास्त्रेऽपि तत्तद्वेद्यता विशिष्टार्थक्रियाकरं भूयसैव तथा च श्रीमालिनीविजयोत्तरे ततः षड्विंशमध्या
नमनेनाधिष्ठितं स्मरेत् अधिष्ठाने हि देवेन यदि स्वस्य प्रवेदने तदीशवेद्यत्वेन संज्ञाते प्रकृतकार्यकृत् भूयसे

20

वेद्यविभागेन सर्वं वेद्यमित्यर्थः एतदेवोदाहरति तथा चेत्यादिना एतच्च स्वयमेव व्याख्यास्यति प्रकृतमेवोपनयति यथेप्सि
तमित्यादिना नहि भेदवादिनामिवास्माकं भिन्नं विषयमस्ति येन तदुक्तावद्यथेप्सितायथेप्सितभावो भवेदित्युक्तं
देवेनापि स्वस्याधिष्ठानं प्रवेदनमिति संविन्मयो हि सः संविदश्च सवेद्य एव विषय इत्यायथारूप्यथेष्टं यदिच्छो
च्यते तत्तत्स्वेच्छमनेकवेद्यताप्रकारेणाधिष्ठीयते तत्रातं स्वच्छलत्वं विसंप्रकृते दीक्षाकर्मादिकार्यकरो
त्येवंविधार्थक्रियाक्षममित्यर्थः एवं मंत्रमहेश्वरादिवेद्यत्वेनापि नियतं तत्तत्रवाम्निः स्यादित्यपरमोऽयमत्रा
र्थक्रियावैचित्र्ये ~ एतदुपसंहरन्नन्यदवतारयति एवं सिद्धे वेद्यताख्यो धर्मो भावस्य भासते तदनाभासयो
गेन स्वरूपमिति निरूप्यते तदनाभासयोग इति तस्य वेद्यताख्यस्य धर्मस्यापरामर्शो सतीत्यर्थः तेनाभासान्तरसं
मूर्छनाविरहितो नीलमित्येव विमृश्यमानः सामान्यात्मक एकक एवाभासः पंचदशात्मस्वरूपमित्युक्तम्
न तु नीलमित्यपि स्वरूपेण विमृश्यमाणमेतः कृतनिखिलधर्मात्मकमेव विमृष्टं स्यादिति प्रमातृतत्त्व
काद्रूपणा इदं तद्विधिं सकलपर्यन्तोक्तप्रमातृभिः वेद्यत्वमेकं रूपं स्यात्स्वात्मतः ततः एतदेव प्रतिविधत्ते उ
च्यते इत्यादिना उच्यते परिपूर्णं वेद्यावार्यं रूपमुच्यते नहि शर्भैर्वा देवो भगवानेव भण्यते ग्रथत निजमाह
त्म्यकल्पितो ग्राह्यशिक्षाक्रमः सहते किं क्षतेत हि प्रोक्तकल्पनया नया एवंविधं हि भावानां रूपं स्पर्शमस्पर्शं
च तत्र स्पर्शं रूपं वेद्यं स्वप्रकाशः परपरप्रकाशस्तथा ज्ञेभूत इति कोऽनाम भावार्थः स्पर्शं च रूपं धर्मं धर्मादिरू
पतया पारमेश्वर्या स्वातन्त्र्यशक्त्यैव तथा कल्पितमिति भेदानुप्राणितः समग्र एव व्यवहारः सोऽयमिति कि

श्री॰
तं॰ लो॰
॰२८

मनयापंचदशणादिक्रमकल्पनयापराई यदेवमस्याः प्रोक्तः तदेवमेकमेवनीलं तत्तद्देशांशिकाक्रमेणावभास॰
मानं तथा तथा विभज्यते यदेवमाह यतएव च यदा घनत्वप्रथाभाविनयघटा तदा तथा तत्तद्रूपमित्येषोपनिषत्परा
येत्वदृष्टेति उद्दिष्टानीदृक्कसकलादिशिवांतप्रमातृवेद्यत्वेनेत्यर्थः तद्रूपमिति सकलवेद्यप्रलयाकलवेद्या॰
मित्यादि ननु यदि तत्तत्सकलादिप्रमातृवेद्यतावेद्यताप्रमातृभेदादेवकथं चनभेदमुपनीता तथाप्येकाद
पैवासावर्थक्रियायाभेदेनाकरणात् तदेकमप्येकरूपमेवेति पुनरपि पंचदशणादिक्रमकल्पनाकल्पनेवे
त्याशंक्य वेदनाभेदसमर्थनार्थमर्थक्रियाभेदं प्रतिजानीते चैत्रेणवेद्यं जातामिहाभ्यां बकुभिरप्यथ मैत्रेण
तन्महेशेनेशिवेनोदितक्रमशक्तिना अस्यादृशेन वेद्यत्वेभावोभाति यथा तथा अर्थक्रियास्यैवचित्रेमस्येतिप॰
रिसंख्यया यथैवंभावोभावोभाति तथार्थक्रिया ...... अन्यादृशेनेति अतदितक्रमशक्तिनाश्यपेवमितिचै
त्र .... तदेव दिक्प्राचैत्रेण यथा स्य न व्यनक्ति तथाहिकाश्वसकलसमाजिकजनः खलु स्तंगी
तरसासारसामारस्येनमन्यते इहावलम्बेता .... तथास्मामाजिकानामप्यादेवेकः प्रमा
तायदेव ...... नेनसाक्षादेवमयेति तत्तगीतादेर्वक्रवेद्यताव्यामतिशयमेत्यानस्तत्रभवेक
गोचराचरमचमत्कारसारतयापरामृशेदित्यर्थः यदेकप्रमातृवेद्याद्वित्वादेरनेकप्रमातृवेद्यस्यास्य
संविन्नोतिशयोयेन ताव तत्तेशे प्रमात्रैकस्थानदाह तत एवोच्यते मल्लनटप्रेक्षोपदेशेन सर्वप्रमातृता॰
दात्म्यमर्णान्द्रपानुभावकं तत्तद्गनिबद्धमातृवेद्यलक्षणद्वैतोः उच्यते इति सर्वैः यद्धीप्रतिमित्वायो तेजच

तादिमर्थमेकदेशं व्यवस्थिताः प्रमातारः समं संवेदयमानास्तावत्यंशेन तदैक्यमुपयान्तीति पूर्णरूपेति इय-
देव हि पूर्णं रूपं यद्विगलितवेद्यान्तरतया तत्रैवान्तर्वेद्यतापरामोऽस्य पक्षव्यपेत्याशंक्याह उपाधियोगव्यनाश-
कामपहस्तयतोऽस्फुटे स्वात्मनो येन वपुषाभात्यर्थस्तत्केवलं वपुः उपाधियोगव्यनाशंकामिति प्रागुक्तितर्म-
भामान्तरमित्यर्थः अस्फुटमिति वस्तुतो हि देशकालाभाससम्पृक्तेन यास्वालक्षण्यपर्यन्तो स्फुटता भवेदि-
तिभावः स्वात्मन इति प्रमातुः यत्नेव वपुषेति सामान्यात्मनास्य केवलं वपुरिति स्वरूप इहहि मायापदे विकल्प-
दशामधिशयानो विमर्शः समारोपितधर्मान्तरव्यतिरेकेणायप्रवर्तमानः स्वालक्षण्यमविभिन्नमप्याभा-
सान्तरं व्यवच्छिन्दन् सामान्यात्मकं नीलमात्रमेव विमृशतीति न तत्स्वरूपाविनाभाविनी सत्तामपि स्पृशतीति
कथं नीलमात्रपरामर्शदशायां वेद्यता धर्मान्तरोपरागसंभावनान्नीति तात्पर्यार्थः नत्वधर्मान्तरोपरा-
गसंभावनापीति तात्पर्यार्थः नत्वधर्मान्तरं व्यवच्छिन्दता विकल्पेन प्रमात्रन्तरवेद्यतो व्यवच्छिद्यतां नहि ज्ञा-
मन्तरेणास्य स्वरूपमेव न स्यात् तस्मात् वेद्यतान्तः कथं कार्यं तिरोधीयेतेत्याशंक्याह ज्ञानानिमिदमित्युव-
द्यताद्युपराभावात् इत्यस्वरूपेण भातद्यपतिदिश्यते नत्वज्ञानामीति ज्ञानक्रियाकर्मतयास्य यद्वेद्य-
तातावदस्ति प्रमात्रन्तरवेद्यताविशेषप्रभाविनस्य सघोगाचरत्वं ततः किमिति सर्ववत्तादेरपि वेद्याभेदित्वमुक्तो-
त्वात् तत्कथमुक्तं वेद्यतात्र परामृश्यास्वरूपेणाच्छेदोत्तानन्तरति तदाह नन्तरस्य वेद्यभावो मंत्रायपेतया
मपि ...... तदिदमनवधारितास्मदभिप्रायस्य चोद्यं न ह्यस्माभिर्यत्तत्स्वरूपेण वेद्यता।

श्री॰
तं॰लो॰
१२

उपरागवानित्युक्तं किंतु वेद्यतोपरागवान् भातइति नचयदहंज्ञानामीत्यत्रस्ववेद्यतां सर्वज्ञादिवेद्यतां च ज्ञानामीत्य
त्रसंस्थिरस्ति ज्ञानामीतिचास्मदर्थविश्रान्तो ज्ञानपरामर्शापवायमित्याह नन्वस्तु नत्तसम्प्रतिभासते नचस्वरूप
परामर्शानान्तरीयकतया सर्वं इदं स्वात्मवेद्यतापि स्यादित्याह अवेद्यमेव कालाग्निवपुः मेरोः परादिशः संसे
तिसंविदिपरं शुद्धवस्तु प्रकाशते शुद्धमिति स्वपरवेद्यतासंभेदपरामर्शरहितमित्यर्थः नतु शुद्धं वस्तु प्रका
शते चेत्सिद्धमस्य वेद्यत्वं अवेद्यं च प्रकाशते चेति विप्रतिषेधः सत्यं किंतु प्रकाशमानत्वाद्वेद्यं न तु वेद्यत्वेन प्रका
शमानमित्याह भातत्वाद्वेद्यमपि तन्न वेद्यत्वेनाभासनात् अवेद्यमेव भानं हि तथा कस्माद्ब्रुमहे तदिति स्वरूप
मात्ररूपं शुद्धं वस्तु अवेद्यमिति वेद्यताभासान्तरसंमूर्छितमित्यर्थः अत्र हेतुः वेद्यत्वेनानाभासनादिति नन्वस्य
तोपलंभस्यनार्थदृष्टिः प्रसिद्ध्यतीति भंग्या वेद्यतायोमनाभाससमानाया कथमिव स्वरूपेण वेद्यं भातं भवेदि
त्याशंक्याह भातेहीत्यादि भाते हि प्रकाशः स च विमर्शजीवितइत्युक्तं स च यदहं ज्ञानामीत्यत्रचिदंश एव वेद्यतायां
नसंभवति वेद्यमिति नव मायायां प्रस्तुतकालाग्न्यादावेवेद्यतापरामर्शो दर्शितः ननु कस्यायं पर्यनुयोगो वेद्यप्र
काशमाने कथं वेद्यताया अप्रकाशनमिति एवं पांचदश्यादिक्रमकल्पना वास्तवेत्याह एवं पंचदशात्म
कं धरातत्त्वजलादयः अव्यक्तान्ता यतो ह्येषां सकले प्रति वेद्यता अनेन वस्तुधर्मा व्यप्रमेया नेतरेणाव्यक्तादे
शाद्दिष्टस्यतत्त्वविधेरप्यास्वरूपणं कृतं ननु इत्यनेन कलाद्यन्तधरान्तं तत्त्वं समन्विताः प्रमातः सकलान्तेयाः इत्युक्तं
कलान्तः सकलस्यावस्थानं तत्कथमव्यक्तान्तमस्य प्रमातृत्वमुक्तमित्याशंक्याह यत्तूच्यते कलाद्यन्तधरान्तेन

22

समन्विताः सकला इति तत्कोशषट्कोड्डीकोपलक्षणं न ह्येतेन वाक्येन पुंसः कलान्तमवस्थानमुक्तं तथात्वे हि पुरुषः
पंचविंशक इत्यादिश्रुतिविरोधः स्यात् किं तु द्विक्रमस्य मायादिकं कंचुकषट्कमिति तद्विप्रलयाकलस्यापि द्वि।
कं विज्ञानाकलस्य धृतमिति तदाह उद्भूताश्च विचित्राग कलादिसमकंचुकाः सकलालसंज्ञास्तन्यग्भूतावि
लकंचुकाः ज्ञानाकलास्तद्वधैलेतकंचुका इति निर्णयः एवमिति षट्कं ननु देहादि वेद्यांशप्राधान्यात्म्यन्तया सक
लः प्रमातैव न भवति इति कृतस्य पांचदश्यमित्याशंक्याह तेन प्रधाने वेद्ये पि प्रमात्रङ्गतकंचुकः प्रमाता स्या।
व सकलः पांचदश्यमतः स्थितं यद्यपि सकलेने हायात्मनो वेद्यस्यैव प्राधान्यं तथापि ज्ञानकलोन्नेज्ञककलावि
द्यादिकंचुकोड्डीकादस्त्येव प्रमातृत्वमित्यनवद्यं पांचदश्यम् ननु वेद्यांशप्राधान्यादुरादिवत्तस्यापि पांचदश्यमेवा।
स्यायम् तत्कथमनराङ्गेद्युग्वीनादिसायुक्तमित्याशंक्याह पांचदश्यं यताद्येतः निविष्टे सकलेपि च सकलान्तर
मत्स्येव प्रमेये ऽत्रापि मार्दहि यताद्यंतनिविष्टत्वमनेनास्य वेद्यांशप्राधान्यमेवोपोद्बलितं अत एवोक्तं प्रमेय इति प्र
मात्रेकरूपत्वे हि कथमेवं संगच्छतामित्याशयः सकलान्तरमिति यदा त्वप्रलयाकलः प्रमाता तदा त्रयोदश्य।
मेवेति सर्वस्वस्य ननु किमनेनैवमुपदिष्टेन पांचदश्येनेत्याशंक्याह स्थूलाहन्तादिसंकोचात्तदप्याप्तताज्ञ।
घः पीताद्याः स्थिरकेप्सन्तात्मन्दशायतादिभ्र स्वरूपीभूतजडतः प्राणदेहप्रयोगतः प्रमात्तताज्ञघः प्रोक्तायाः।
णां विज्ञेयान्तरे एतदेवाश्रयिक्तस्य श्रीमालिनीविजयोत्तरे यतादि भ्र ब्रह्मा तेषु च तत् विंशतानात तेषु प्रतितत्वेज
डात्मकस्वरूपयारण्याम सह च तत् दशायारणाः प्रोक्ता इति संबंधः ततः सकलस्य स्थूलमायाणवादिमलत्रय प्रल

स्वी॰
तं॰ लो॰
२२

23

याकलस्यावरणमाहृतमिति आणवमाहृतं मलहृदयं विज्ञानाकलस्यादिः प्राथमिकमाणवं मलं मेयाणां प्रलयाक
लोपादानमादाहृतात्मासंकोचः मेत्रेयाणां सकलोपादनमात्मलाभात कहृ निर्दिष्टः संकोचः मंत्रमहे
श्वराणामन्यः संकोचस्य यथायथं विगलनाद्धिकामः शिवस्यव्याप्तृतादेशकालाद्यवच्छेदशून्यत्वाद्व्याप
कत्वेनाज्ञघेतिमे वेत्ति देनादालेवनाइत्यर्थः नन्वेवं सम यावरणा भवेयुः न चात्र देशात्याशे कोक्तेः स्थिरके प्रवे
दिति स्थिरं स्वात्मविश्रांत्या निर्व्यापारं शान्तिमद्रूपके प्रस्पंदात्मके सव्यापारं शक्तिरूपं अतएवात्र सकलत
कलाधिकारेण तदेवं स्मरेद्देहं किंतुव्यापारवर्जितमिति सव्यापारं स्मरेद्देहमिति चोक्तं तासु यथायथं भेदविगलना॰
द्देहप्राणबुद्ध्यादिप्रमातृदशाधिशायित्वमुक्तं प्राणदेहपथ इति प्रमातृतान्तपथीति तत्रस्वरूपसकलमकला॰
धारणाधिकारेणोक्ताः यदुक्तं तत्र स्वदेहे हेमसंकाशं तुर्यांशं व्यवलोकितमित्यादि प्राणादौ तु प्रलयाकलविज्ञा॰
नाकलाधिधारणाः यदुक्तं चात्र तेजस्ततो ध्यायेद्द्वादशांगुलमायतमित्यादि पीताया इत्यादिशब्दाज्जलतत्त्वादेश्च
ज्ञादेर्ग्रहणं यतश्च सर्वं यः पुनर्गुरुणोदीक्षितोऽत्र विशाविधिक्रमः सर्वासनात भावेन भूमिकाजयसारभेदिना॰
दिनाचतुर्विंशतिस्वी प्रोक्ता प्रत्येकं दशकं च यथा धारणात्मादिन्तत्त्वानां सम्यासा ध्येयानां हिता इत्यनेन श्रीपूर्वशास्त्रे
एवंसप्रपंचमुक्तमिति नतएवावयार्थे इहतु ग्रंथविस्तरभयान्न प्रातिपद्येन संवादितं एवं पांचदश्यं निरूप्य प्रायो।
दशणायपि निरूपयति यदात्मेयतः पुंसा कलांतस्य प्रकल्प्यते तदुद्भूतः कंचुकांशो मेयोनास्य प्रमातृता अतः सक
लमेतस्य प्रमातृत्वेन विद्यते त्रयोदशात्वेन तच्छक्ति शान्तिमद्वयवर्जनात् स्पष्टभूतकंचुकामाता युक्तास्तत्र प्रलयाकलः

मायानिविष्टा विज्ञानाकलायाः प्राग्भवदेवत मायातत्त्वे तेयद्रूपेकंचुकन्यस्य भावोपियः सोपिमेयः कंचुकैकं यतो।
मायास्वरूपात्मिका विज्ञानाकलपर्यवार्जतत्वात्मा मातास्य कंचुकः मायाविनिर्दिष्टत्वकलेतत्थेत्येकादशात्मना विज्ञान
केवलेवेद्यकंचुकध्वंसस्थितिते उक्तस्वरूपप्रवेशयातानां मेयाणामेव मात्वता तेपि मेयायदा मेयास्तदा मातानदीश्वरः
तस्मिन्विज्ञेयतां प्राप्ते स्वप्रकाशः परः शिवः प्रमाता स्वकता दात्मभासिताखिलवेद्यकः पूर्वसकलान्तस्येति पु
स्त्वाद्यारम्भकलान्तस्य तत्त्वषट्ककस्येत्यर्थः पूर्वस्यपञ्चक्तस्य कंचुकषट्कस्य मेयत्वात् त्रयोदशात्मिति सकल
तत्स्वीक्रमप्रमीतयास्वरूपीभूतत्वात् नन्वत्र सकलस्य प्रमेयत्वं प्रलयाकलस्य च प्रमातृत्वमित्युक्तं विज्ञानाक
लादीनां पुनः कावस्थेत्याशंक्योक्तं विज्ञानाकलायाः प्राग्भवदेवेति सकलेपि प्रमातरि यथैषां प्रमातृत्वं
तथैवेत्यर्थः ननु मायातत्त्वे तेयोकंचुकत्व भावोपि कस्माज्ज्ञेयइत्याशंक्योक्तं कंचुकैकं यतो मायेति अत्रापि
हेतुः स्वस्वरूपेति अत्रान्निबन्धविभागादिकारणदेशाव्याशयः ततश्च तत्स्वरूपभूतकंचुकस्य प्रलयाकलस्यापि येना
ज्ञत्वथात्वम् ततश्चत्स्वरूपभूतकंचुकस्य नदीश्वरश्चेति मेयेश्वरः स्वकतादात्म्येनेति नत्वमेत्र मे त्रेस्वरादिवत्भेदाभेदादि
यतेयत्याभिप्रायः एतच्चाक्षिकारेभ्यएव निर्णीतप्रायमिति नेह पुनरायस्तम् ननु तस्मिन्नपि विज्ञेयतां प्रमेकः
प्रमातेत्याशंक्याह शिवः प्रमाता तेनोमेयो यस्मादीत्प्रकाशता मेयता मानता चास्ति स्वयंप्रकाशाद्यसौ विभुः प
रप्रकाशात्तेनाममेयत्वं नच्चास्यस्वप्रकाशमात्रेविषयत्वेनेति कथं शिवस्यापि प्रमातृत्वं नवनेमेयता भवेदित्यर्थः
ननु परप्रकाशत्वेनैव सर्वेषां प्रकाशः सिद्ध्यादिति किं स्वप्रकाशत्वेनात्या म्युपपत्तेनेत्याशंक्याह स्वप्रकाशत्वक

प्र॰
नं॰ लो॰
२५

25

सिंसिद्धिरनभ्युपगमे सति अप्रकाशात्मकाशतेत्यनवस्थाद्युक्तत्वा ननु स्वसंवित्संस्थानत्वेनैवं भासनेदितत्र अप्रका
शादेव प्रकाशेऽभ्युपगम्यमाने प्रमात्रेतरकल्पनानतिरेकेदिति मूलवृत्तिकाविनीयतामनवस्थापतेर्घेनाकिं
चिदपि न प्रकाशतेति सर्वंकिंनु प्रायमेवविसंस्यात् प्रसंगविपर्ययपर्यवसेनायामेव चास्य प्रसंगस्य प्रतिपा
दयति नचैवमित्यादिना ननु भासनेवेद्यस्य तर्हि प्रथमस्य तथाभावे प्रत्ययः किंनिबंधनः इतिभणतस्तस्यैव
स्वप्रकाशत्वमस्तु किमवान्तरेणेत्याशंक्याह अन्यादीनप्रकाशानंतज्ञाममस्तु सोऽपि शिवः अन्त्यमेव हि प्रमातार
मपेक्ष्य विश्वं प्रकाशते न तस्य तत इति तदधीनपव प्रकाशः अतश्च प्रमातापि शिवएवेत्युक्तं प्राग्वद्यशः स एव च स्व
प्रकाशत्वम्भ्युपेतं अन्यथाहि न किंचित् चकास्यात् तदादिसिद्धत्वादस्य न साधकेन प्रमाणेन किंचित्कृत्यमि
त्याह इत्यस्य स्वप्रकाशत्वे किंमन्यैर्युक्तिडंबरैः मानानां हि परोजीवः स एवेत्युक्तमादितः अस्तु तत्प्रमाणनेजड
ददीनासिद्धिरित्यादितः प्रथमाह्निके एवोपपादितेत्यर्थः यदुक्तं तस्य प्रकाशेनानामयश्चायं सर्वं चैव प्रकाश
ते अनपह्नवनीयता किं तस्मिन्मानकल्पने प्रमाणान्यपि वस्तूनां जीवितं यानि तत्त्वतः तेषामपि परोजीवः
स एव परमेश्वर इति ननु सकृद्विमानीयमानात्मगुरूपदेशान्यथानुपपत्त्या स्वप्रकाशोऽपि शिवे वेद्यत्वमस्ती
ति कथमुक्तं न मेयः शिव इत्याशंक्याह नन्वस्मिन्स्वप्रकाशेऽपि शिवे वेद्यत्वमीदृशः उपदेशोपयोगोऽयं व्यव
हारोन्यथा कथं ईदृश इति सकललोकसाक्षिकः चिरंतरनिरूपण इत्यर्थः एतदेवाभ्युपगम्य विशेषयति स
ंसंमतं तथा स्फुटः परमेशेन वेद्यतां नीतामेव महेशादिकासामस्थिरायते एवमेतत्तु किंतु अभासमान

मात्मेति भेदमयत्वात्तं आत्मन ईश्वरेण सह शिवत्वस्योपदेशमेन न स्पष्टत्वाद्देयत्वं नीतस्य तन् मंत्रमहेश्वरादिदशा
धिशायी संपद्यत इत्यर्थः ननु चैवं शिवस्वरूपमेव प्रसुप्तवत्स्पृष्टं न स्यादिति तत्र क्रियमाणमपि भावनादि व्यर्थ
मेवेत्याशंक्याह तथाभूतश्चैवं धीसौ नान विच्छिन्नसंविदः पूर्णस्यैव यतात्युक्तापरस्य विरोधतः एवं मंत्र
महेश्वरादिदशाधिशायित्वाद्दैशाधिशायित्वादसौ शिवो वेद्योपि तथाभूतो न विच्छिन्नपूर्णसंविदात्मकः शिव एवेत्यर्थः न ह्ये
वं विधेस्मिन्वेद्यत्वेनाप्यस्य जाड्याजडयोरैक्ये च विरोधात् नन्वेवं यदि वेद्यरूपोपि शिव एव तत्कथं तथाभावाविशेषा
त् स्वात्मपूर्णाद्वावपि शिवभावनाहलेदित्याशंक्याह तथा वेद्यस्वभावेपि वस्तुतो न शिवात्मतां कोपि भाव
प्रोज्झतीति मतं तद्भावनाफलेन कापीति स्थाणुर्पूर्णा पाषाणादिरपीत्यर्थः यदभिप्रायेणैव स्तम्भपर्णस्वपा
षाणत्वज्ञसाकाष्ठानस्थूलाजनाथ तद्भ्रूक्षराक्षमेघाणं धैर्यमानो विभावे तेस्थितिरित्याचार्येरुक्तं नैवं तदा वामे
घ्रणाग्निइत्तोयेवोक्तमपि मतयवन्याया दिसाह श्रीपूर्वशास्त्रे तेनोक्ताः शिवः साक्षान्नभिद्यते ननु च शिवोऽन
भिद्यते इति भेदनिषेध एवोक्तो न तु तस्यैव भूमिकांतरप्राप्याभेद इत्याशंक्याह साक्षात्पदेनायमर्थः समस्तः
प्रस्फुटीकृतः एवं भूतसंख्यानिरासेन यो व्यवस्थापयुपदिष्टे इदानीं तदेव यथासंभवमाशंकापुरःसरमपि
कसंख्यानिरासेनोपपादयितुमाह नन्वेकरूपताप्युक्ताः शिवस्तु दृश्यतो भवेत् त्रिभेद .... महानार्थकाव
विवादिता कस्मात्त्रैविवादिते त्याशंक्याह .... लिनादेर्योः प्रत्येकं भेदत्रैकैकस्यतासक
लवत्किल सकलवदिति तस्य देहादेराभ्यासेव भिन्नत्वेन संतानभेदः प्रत एवाह ततो लयाकलेमेयप्रमा

श्री॰
तं॰ लो॰
२५

25

नास्तिलयाकलः अत्रद्वयोर्दशानांस्यादियंनैकादशात्मता विज्ञानाकलवैषम्ये ॥ विज्ञानाकलोभवेत् माता
तदेकादशतास्यान्नैवतत्तेनवात्मता एवंमंत्रतदीशानांमंत्रेशानत्वसंभवे वैषम्यानवसमस्तुः सप्तपंचतत्तेकथं
इति लयाकलादीनामानंत्यात् मंत्रेशा इति शब्देनमंत्रेश्वराः तेनमंत्राणांतदीशानांमंत्रेशानांचसंभवइति तत्रस
कलस्यसकलांतरवैषम्ये प्रमातृणांतादवस्थ्ये त्रयोदशएवस्यात् विज्ञानाकलादेश्च विज्ञानाकलांतरा
दिवैषम्येपुनर्नैवन्याय्येनप्रतिप्रमातृभेदद्वयमाधिकीभवेदितिकथमुक्तं रुद्रवत्प्रलयाकलः तद्वन्मायापि
विज्ञेयानवधाज्ञानकेवलः मंत्रसमविद्यास्तत्रभुवनाख्यप्रतिविधत्ते उच्यते सत्यमस्त्येषाकलना ॥ किंतु
संस्कृतः यथात्रसकलेभेदानतथात्रकलादिके नत्वेकोसौसंस्कृतः सकलेभेदाय प्रलयाकलादीनां
तत्तीन्याशंक्याह अनंतावांतरेहस्येयोनिभेदस्वतः स्फुटे वर्तदेशाविषयस्यास्यसकलस्यास्तिभेदतः ईदृशोस्तिप्र
मातापलस्समाणः भेदितेति देवमनुष्यादिभेदवत्वमित्यर्थः नत्वेवंतुइमेसकाराः प्रलयाकलाः एवंतथान
यासकलीभवंतीतिसर्वत्रैवोक्तं तेनैषामेवयोभेदोनास्तिसकथंसकलानामपिस्यात् इत्याशंक्याह लया
कलेतत्संस्कारमात्रात्मत्वयोसौभिदा स्वकालेनविशेषायसकलस्यैवयुज्यते संस्कारमात्रेणसतोपिभेद
स्यविशेषायोगोविशेषणद्वारेणाकलत्वेहेतुः प्रलयाकलस्यहि नकिंचिद्विशेषितमज्ञानमित्येवंयथेनेसं
वित्सहसम्यक्त्वमिति संवेद्यत्वेपि यत्रबाह्यार्थवेदनमपिनास्ति तत्रकावार्तापुमात्रेतत्संवेदनेयनत्रयोद
शत्वंस्यात् विज्ञानाकलादीनांतावत्परस्परंवैभिदा शिवस्याख्येधर्मावेत्त्रभेदायेषांविज्ञेयंते तेषांहिशुद्धबो

धायिकत्वरूपत्वेपि परमेश्वरस्वातंत्र्यविजृंभमाणत्वरूपत्वपारस्परिको भेद इत्युक्तं शिवस्याकंपमानत्वं तन्मेदायैवांवि
जृंभितेति यदुक्तं भेदास्तित्वेपि येषामेषामन्योन्यभिन्नता नच येषु स्वभेदेन तेच विज्ञानकेवला इति ग्रंत
मध्यगो धायिकत्वरूपमाहित्तावाकलादीनां यत्र भेद नास्तित्वकावाशंका यथा तत्र स्वरूपे ह क्रियायोगिनां मं॰
त्रमंत्रमहेश्वरमंत्रमहेश्वराणामिति तत्त्वकं तेन नोक्तं ग्रंतश्च सकलानां प्रलयाकलादीनामेवं विशेष इति
नात्र प्रलयाकलादेः प्रलयाकलानां विवेचनमस्तीति न संख्यायामेव माधिको भावानुपादिशत् नदाह
इत्याशयेन संपश्यन् विशेषं सकलादि प्रलयाकलादीनां वाचत्रायोवश्यादिकं विधुः इयत्ताभावधर्मवैधर्म्य
मूलं फं चदृश्या नुपपादितं अधुनातनं तदेव घटयितुं प्रलयाकलविज्ञानाकलौ हि प्रकृतसंस्कारात्स॰
माधिस्थयोगिन्या यत्त्वान्न किंचिज्जानीत इति विदितत्वमेकत्वासीत्पाद्यं न देयत्वापि कथं कावेधनाभाव
धर्मः स्यात् एतदेव प्रतिविधत्ते शून्यतां संविदेकात्म्यतत्त्वस्मिन्नुपपत्तिः जडेपि चितिरस्त्येव भोक्तृत्वमाने॰
निराकारे इति नियताकाररहित इत्यर्थः ननु विश्वाकृतित्वे विज्ञानस्य कथमस्याकारान्तरपरिहारेण निय
ताकारतयाभासः स्यादित्याशंक्याह यथा हि भेदात्पूर्णेऽपि भावे जलमुपाहरन् अन्याकृत्यपहानेन घटमर्थ
यते रसात् तथैव परमेशाननियतिप्रविजृम्भणात् काचिदेवाकृतिः कांचित्सूते फलविकल्पनां यथा हि भे
दात्मकस्य विभागेनावभासात्कश्चन कांचन न घटत्वाद्याभासैः पूर्णेनैकाभाससंभिन्ने घटादौ भावे जलमुपाहरन्नु
दकाहरणात्मनियतार्थक्रियाकारी प्रमाता केचनन्याकारान्तराभासमपहायार्थितातावत्तस्यात्मकाद्रसान्न
न्तदर्थक्रियाक्षमं घटमर्थयते तत्तद्वैनास्यावभासो जायते इत्यर्थः तथैव विश्वाकृतित्वेऽपि विज्ञानस्य पारमेश्वर
नियतशक्तिपातमाहात्म्यादाकारान्तरपरिहारेण काचिदेवाकृतिर्यथा कस्यचिदेककां चिदेव फलविकल्प
नां सूते इति युक्तमुक्तं फलार्थिनां काचिदेवाकृतिर्ध्येयत्वेन स्थितेति यस्तु न नियतार्थक्रियार्थी तस्यानवच्छि
न्नमेव रूपं प्रत्यवभासत इत्याह यस्तु संपूर्णहृदयो न फलेनाभिवांछति तस्य विश्वाकृतिर्देवी सा चावच्छेदव १४३

जेनात् तेन तु भक्तो विगतसाकारध्यानं स्वसंतोस्वनियताकारमिति विषयविभागः यदाहुस्तिसाधकानां तु भक्त
णां विधिनियतिर्यंत्रितः स्वस्वरूपाणां तु विदां स एव तु निर्गलः एवं ध्यानस्य वास्तवं स्वरूपमभिधाय मुद्राया
श्चाभिधत्ते जलयोगितनुर्दिक्षु भैरवी यथा परा सदा तत् चूर्णितस्य स्थितिर्देहे मुद्रिया काचिदेव सा जलशरीरे सत्यपि
प्राणपदे मध्ये कात्म्यस्य योगिनो नपवन्नैवदार्ढ्यादिस्वतनदेहभावस्य काचनोस्थितत्वादिरूपा देहे स्थितिः सैव
विश्वक्रियाप्रतिक्षातिरूपा वास्तवी मुद्रा न तु नियतकरादिनिर्वर्त्यसन्निवेशादिरूपेत्यर्थः यदुक्तं नादे मंत्रः स्थिति
र्लिंगे देति यदभिप्रायेणैवेतो बाह्येरपि मुद्राया काविदा स्थितिरित्याद्युक्तं इदानीं होममपि वास्तवेन रूपेणा
भिधातुमाह अंतरिंधनसंभारमनपेक्ष्यैव निःशः ज्वालाज्वलितयविलाहोनो प्रत्तेनोग्रशिखः शिखी बोधाग्नेना
ताहंशे भावा विशेनस्तस्य सन्महः उदेवयंनोपकं क्षत्ते होमकर्मनिमित्ततां यदुक्तं सर्वेन्द्रियशिखाज्वालकोटि
ले जातवेदसि बोधात्मभावनस्य भस्मीभावो निःतर्पणमिति यदभिप्रायेणैवास्मद्गुरुभिरपि शास्त्रदिक्षम
नश्च प्रकृतयो विश्वस्तचिन्ताः स्पर्शायो वित्तानत नूनपानि वितनोमि घावषट्कुर्वते तेषां संततसर्वमेधयजनकृ
त्मसदा यमन्नानीनामस्यास्मद्यलक्षणः ह्ववामपि दीप्ति स्थितिलक्षणेत इत्याद्युक्तं न केवलमेतन्नापरस्वरूपावेशाका
क्षिवादात्मनो वा पयोगिया वत्पस्यापीत्याह यं कंचित्स्यरमेषानशक्तिपातपवित्रता पुरोभाग्यस्व येतिष्ट इक
व्रीतित नस्तमः यं कंचित् नमस्ते प्रियमनवेदोमइकाः सपदेवोपिवा तस्मै देयं तेनाग्रासंसतृप्तनयाद्याहस्मि
त्याद्युक्तमनियतं पारमेश्वरेणैव शक्तिपातेन पवित्रीकृतसमग्राहीनया प्रभावधिवेता कवयोगाक्षवास्तवजन्मा

श्री॰
तं॰ लो॰
१४५

144

दिति शितपास्वयं स्वरूप एव तिष्ठेद्येनासौ दीक्षाभुक्तेगवक्तलसंक्रामश्याप्नुव्यात् तत्त्वरूपसंक्रमाद्दीपाद्दीपमिवोदि
तमिति न्यायेन दीक्षितः पशुवासनाक्षयेण न लब्धपरतत्त्वादिरामो भवेदित्यर्थः ननु केकस्मादेव बालवाजप्या
देः स्वरूपविश्रान्तिः सिद्धा दिवि किं जप्यादिभिर्बहुभिरेवमुपदिष्टैरित्याशंक्याह जप्यादौ होमपर्यंते यद्यये
कैककर्मणि उदेति दृष्टिः परमात यापीस्पं निरूपितं इत्यभिनिजप्यादीनां बहुधात्वेन न तु जप्यादीनां ब
हूनां कस्मान्निरूपणं कृतमिति त्रिधापि नेतद्देवाज्ञीकृतमिति किमितदित्याशंक्याह तथाहि तत्र तत्राश्मस
मनिम्नोन्नतादिषु चित्रे देशे वाह्यमानो यथेच्छामात्रकल्पितो तथा संविद्विचित्राभिः शान्तघोरतरादिभिः
भंगीभिरभितो द्वैतं त्याजिता भैरवायते यथा हि तत्र तत्र समनिम्नोन्नतादिषु भूविभागेषु वाहकेल्पात्मनि॰
कर्कशापांसुलादौ चित्रे देशे कर्कटमेरुलादिना वाह्यमानोऽश्वो वाहकस्येच्छामात्रकल्पितामिच्छामात्रविधे
यतां याति तथा संविदपि शान्तघोरतरात्मभिर्घोरघोरघोरतरात्मकपरादिशक्तित्रयैकात्म्येनानिरूपमा
नाभित एव विचित्राभिर्जप्यादिभिः भंगीभिरभितः समंततस्तद्द्वैतं त्याजिता भैरवायते भेदापहस्तनपूर्वम
खण्डपरसंविद्रूपतया परिस्फुरतीत्यर्थः एतदेव हृदयंगमीकर्तुं दृष्टान्तान्तरप्रदर्शनेनाप्युपपादयितुमाह
यथा पुरःस्थमुकुरे निजं वक्त्रं विभावयन् भूयो भूयस्तदेकात्मवक्त्रं वेत्ति निजात्मनः तथा विकल्पमुकुरे ध्या
नपूजार्चनात्मनि आत्मानं भैरवं पश्यन्न चिरात्तन्मयी भवेत् यथा हि कश्चिन्निजं वक्त्रं पुरोवर्तिनि मुकुरे भूयो
भूयः विभावयन् यत्नेन निरीक्षमाणो निजात्मनः संबंधि बिंबभूतं तद्वक्त्रं तदेकात्मवेत्ति मामकमेवेदं वक्त्र॰

मितिनिश्चयेनाभ्यासात्प्रतिबिंबाद्यभेदेनैवमस्माते तथैवहज्ञायामन्यनेकास्मिन्विकल्पमुक्तावेवरूपः स्वाभ्यासेनैभे
रवरूपतयापश्यन्नचिरेणैवकालेनैतन्मयीभवेत्तदेकात्म्यंप्राप्नुयादित्यर्थः तन्मयीभावोनामकिंस्वरूपस्तत्रा
ह तन्मयीभावनेनामप्राप्तिःसात्त्वरात्मनिः अत्रतत्त्वरात्मनिप्राप्त्यापिकिंभवेदित्याशंक्याह पूर्णत्वस्यप्राया
रामेत्यत्रनफलांतरं सात्त्वरात्मनिप्राप्तिःसर्वतोनैराकांक्षाम्राप्तिपराकाष्ठेति नात्रान्यत्किंचित्फलंसंभवेत्
नतत्रसाकांक्षत्वस्यनामाप्यवशिष्यते येनफलांतरमपिमन्येनभवेदितिभावः साकांक्षोहिप्रमाताततफल॰
मर्थयातः प्रथमंतावत्साधनमन्विष्यति यथोदकाहरणार्थीघटंतत्साधनंचप्राप्यतत्फलमासाथयेदिति नैरा
कांक्षेप्यतादृशोदासीन्यमवलंबमानः स्वात्मन्येवतिष्ठेत् किंतनतत्पूर्वंनैराकांक्षंतदृणांतरेणकांक्षतत्प्र
पुल्लासात् अतएवनतत्पारमार्थिकंसाकांक्षत्वेपिनस्यतथाकल्पनात् अतश्चतत्प्राप्त्यनेपिफलेफलांतरेपि
संभवेत्सर्वतएवसाकांक्षत्वस्यत्यात् तदाह फलंसर्वमपूर्णत्वंतत्रतत्रप्रकल्पितं अकल्पितेतपिपूर्णत्वेफ
लमन्यत्किमुच्यतां पूर्णत्वेइतिपूर्णत्वनिमित्तेतत्रेतिसर्वस्मिन्फले एतदेवमप्रशंसमुपसंहरति यथयाप्रवि
धिःकोपिकस्यापिह्दिवर्तते यस्यप्रसीदेश्चिन्मत्तोंदास्यस्मिन्जन्मनः तन्वेवंविधस्ययापाविधेरपिनासमा
त्रादेवकिंनामोमानस्यमानात्यन्तमस्यभवेयदेवमुक्तमित्याशंक्याह अत्रयुग्मेगातेतत्तुपूर्णकैवल्यमुपि
गच्छति लोकैरालोक्यमानोहिदेहबंधविधेस्थितः अत्रैवंविधेयुगेलब्धप्ररोहः कश्चिदपश्चिमजन्मादेह
बंधवियोस्थितोपिजीवन्नपिलोकैर्बद्धात्मसमिवनैर्ग्राह्यग्राहकभावोहिसामान्यःसर्वदेहिनामित्यपुनास

श्री
तं.लो.
१४५

145

मानकस्तत्तयाव्यवहरन्नालोक्यमानः कैवल्यमधिगच्छति ग्राह्यग्राहकभावाद्यात्मभेदापहस्तनेन प्रत्यभिज्ञातशिव
स्वभावस्वात्ममात्ररूपतयापोस्फुरीत्यर्थः अयमेव हि समाने व्यवहारे बद्धमुक्तयोः विशेषो यन्मुक्तस्य स्वांगाद्रूपतय
भावाः प्रवभासंते बद्धस्य तत्स्वरूपतः परस्परतथात्यंतभेदेनेति यदुक्तं मेयं साधारणं मुक्तः स्वात्माभेदेन मन्यते म-
हेश्वरो यथा बद्धः पुनरत्यंतभेदवदिति अत एव जीवन्मुक्तविषयतया भगवानेवमभ्यधादित्याह अत्र नाथः
समाचारे पटलेऽष्टादशेऽभ्यधात् अष्टादशे पटले प्रकृतत्वात् श्रीमालिनीविजयसत्के अत्रत्यमेव ग्रंथं पठति ना-
त्र शुद्धिर्न चाशुद्धिर्न भक्ष्यादिविचारणं न द्वैतं नापि चाद्वैतं लिंगपूजादिकं न हि न चापि तत्परित्यागो निष्परिग्रह-
तापि वा सपरिग्रहता वापि जटाभस्मादिसंग्रहः तत्यागो न व्रतादीनां चरणाचरणं च यत् क्षेत्रादिसंप्रवेशश्च स-
मयादिप्रपालनं परस्वरूपलिंगादिनामगोत्रादिकं च यत् नास्मिन्विधीयते किंचिन्न चापि प्रतिषिध्यते विहि-
तं सर्वमेवात्र प्रतिषिद्धमथापि वा किंचित्तदत्र देवेशि नियमेन विधीयते नन्वेवेतः स्थिरीकार्यं तत्प्रसन्नेन योगि-
ना तत्त्वं यस्य यथैव स्यात्तत्तथैव समाचरेत् तत्त्वे निश्चलचित्तस्तु भुंजानो विषयानपि न संस्पृश्येत दोषैः स पद्म-
पत्रमिवांभसा विषापहारिमंत्रादिसन्नद्धो भक्षयन्नपि विषं न मुह्यते तेन तद्वद्योगी महामतिः अनेन च वास्त-
व जप्यादिसामान्ये तर्यागान्तर्जोद्देशादिष्टस्य विधिनिषेधात्मनस्याप्यपलेपः कृतः एतच्च बद्धचोदनमेवेन
वैषम्यात्स्वयमेवाचष्टे प्रभुर्देहि कथं नाम देहाद्यं पांचभौतिकं प्रकाशिनातिरिक्तो किं शुद्ध्यशुद्धी हि वस्तुनः
यन्नाम हि पांचभौतिके देहाद्यं रूपादिपंचवर्गात्मं विश्वमेतावदेव हि इत्याद्युक्तयुक्त्या निखिलमेव जगदिदयव १४५

र्तिपिष्टार्थं ज्ञातं तत्कथमिवाशुद्धमर्थाशुद्धं वा यतः किं शुद्ध्यशुद्धी प्रकाशाप्रतिरिक्ते बहिः सत्यपि वस्तुनि नीलानी।
लादिन्यायेन प्रतिभासविकारविकारिताभावाद्वस्तुधर्मतया न भवत इत्यर्थः यतश्च यस्य यो न धर्मः स तया न भ
वेदिति इदं शुद्धमशुद्धं चेदं इति विभागो दुःष्येत नन्वनुभवापह्नवो यं लोके निनाय स शुद्ध्यशुद्धिव्यवहारस्य दर्श
नात् नैतत् न वयं शुद्ध्यशुद्धिव्यवहारमपह्नुमहे किं तु ते वस्तुधर्मतया न भवत इत्युच्यते प्रमाता व्यवस्यति इदं
शुद्धमशुद्धमिदमिति वस्तुधर्मत्वेनानयोः शुद्धे न कदाचिदपि शुद्धेतरमपि वा नाशुद्धं स्यात् न हि नीलमनीलम
पि कदाचिद्भवेत् स्वभावस्यान्यथाकर्तुमशक्यत्वात् तथा च तैजसादीनां मणीनां च सर्वस्याश्ममयस्य च भस्मना
द्भिः मृदा चैव शुद्धिरुक्ता मनीषिभिरित्यादिस्मृतीनां युक्तिबाधितत्वं स्यात् एवं प्रमातृधर्मत्वे शुद्धं चेत् स्वेनेतरेण
शोध्यते तत्किं शुद्धेनाशुद्धेन चेत्याह अशुद्धस्य च भावस्य शुद्धिः स्यान्नादृशेन वा किं त्वन्योन्याश्रयचैयक्यानवस्था।
द्वयमत्र हि तत्राशुद्धस्य पृथिव्यादेर्भावस्य तादृशेनैवाशुद्धेन जलादिना भावान्तरेण शुद्धिः स्यात् नैष पक्षो युज्यते इ
त्यर्थः अत्र हीत्येवं स्वमार्गेण प्रकारेणान्योन्याश्रयतादिदूषणजालमवतरेत् तदाह पृथिवी जलतः शुद्धेति
अर्थतो भवेत् वारितो वायुतो वायोस्तेजसा ज्वलनस्य वाततः अशुद्धादेव हि जलादेरशुद्धस्य पृथिव्यादेः शुद्धावुभ
योरप्यविशेषात् परस्परमपि स्यात् इतीदमन्योन्याश्रयत्वं एवमशुद्धस्याप्यशुद्धेनैवाशुद्धिः स्मिलित्येतदुभयोर।
प्यविशेषादन्योन्याश्रयत्वमुक्तं अशुद्धेनेत्यपर्यंतमिति एवं वैयर्थ्यापत्तियोजनं यथाशुद्धस्य पृथिव्यादेरशुद्धादेव
जलादेः शुद्धिस्तथा स्यादशुद्धत्वाद्यविशेषात्स्वयमेवास्तु किमन्येनाप्यशुद्धेन जलादिनेति वैयर्थ्यम् अथ पृथि।

श्री
ने.उ.
१४९

146

वीजलाकुड्डे नलमपिवायोः सोपितेत सम्तदप्यत्यस्मादाकाशादेस्तदप्यत्यन्तशून्यनेवस्थाने प्रथमस्फुरत्स्पृथिव्या
देर्भावस्याशुद्धत्स्यतोजलादेःशुद्धिर्वीनघटते इत्युक्तंस्यात एवंतर्ह्यन्यस्मात्कुड्यादेवशुद्धिःस्यादित्याह वज्रकूणादि
काःमंत्राःपावनाश्चेशुद्धता पावनादिरूपत्वात्स्वभावतः नत्वाकाशादिभूतपंचककुणभूतशक्त्यात्मकामंत्राय
दिस्वभावनाएवशुद्धत्वंकिंइतिस्वयमेवपृथिव्यादयोपिस्वभावतएवशुद्धानस्युरित्याह मंत्राःस्वभावतःशुद्धा
यदितेपिनकिंतथा नत्रमंत्राणांपावनेतोशिवात्मनालक्षणंनिमित्तांतरमस्तीत्याशंक्याह शिवात्मनातेषुशुद्धिर्यदि
तत्रापिसाम्येकिं नत्तुनासमंत्राणांशिवात्मतापावनेनिमित्तंतत्रापिभूतपंचकेसामान्यकिंसेवतत् शिवात्मताहिप्र
काशरूपत्वमुच्यते तेनविनाचनकिंचिदपिस्फुरेदितिप्रकाशमानत्वान्यथानुपपत्त्यास्यैवपर्यंतदात्मत्वे प्र
थसमानेपिशिवात्मत्वेमंत्राणांमननत्राणधर्मकत्वयातथात्वेनपरिज्ञानमस्तिनघटादीनामितितेष्ठेलत्वा
एषनमंत्राणांपवशुद्धत्वमितिमन्तव्यमित्याह शिवात्मतापरिज्ञानेननमंत्रेषुघटादिवत् नेतेनशुद्धइतिचेन्नत्र
मिस्तर्हिशुद्धता एवंतर्हिशिवात्मत्वेनतेषिःनामशुद्धतोच्यतेइत्याह तत्रामितिहि साचघटादिष्वपिसमाने
त्याह योगिनंप्रतिमाचास्तिभावेष्वितिविशुद्धता पशुप्रायाणांहिमेष्वपिशिवात्मत्वेनपरिज्ञानंनास्तीति
नाम्प्रतितेषांस्वकार्यकारित्वाभावात्संभावनीयमपिशुद्धत्वं घटादीनांचयोगिनंप्रतितत्परिज्ञानमस्तीति
तेषांमपिविशुद्धत्वं एतदेवहिनामयोगिनोयोगित्वं यन्निखिलमिदंविश्वंशिवात्मतायांपरिज्ञानातीति य
थोक्तं यःपुनःसर्वतत्त्वानिवेत्त्यैतानियथार्थतः सगुरुर्मत्समःप्रोक्तोमंत्रवीर्यप्रकाशकइति अतस्तथयोक्त १४९

युक्तिबलेन शुद्ध्यशुद्धिविभाग इति सदृशान्तेणमवस्थाप्यते इत्याह नन्वेचोदनया शुद्ध्यशुद्ध्यादिकविनिश्चयः चो-
दनाविधायकं वाक्यं यदाहुः। चोदनेति क्रियायाः प्रवर्तकं वचनमिति तया यच्छुद्धं तया विहितं तच्छुद्धमन्यथा त्वमत
यक्करतिः ऊर्ध्वं नाभेर्यानि खानि तानि मेध्यानि सर्वतः यान्यधः स्यात्त्वमेध्यानि देहाच्चैव मलाश्च्युता इति आदि
ग्रहणेन भक्ष्याभक्ष्यादि ननु यदि नाम शुद्ध्यशुद्धिविभागो चोदनैव निमित्तेनाशुद्धिमप्यशुद्धिरिति तदाह अ-
भक्ष्यं तथाप्येषा चोदनैव शिवोदिता अशिवोदिता ननु उभयोरपि चोदनत्वाविशेषे कानाम तावत्प्रमाणभूता।
भवेद्यदाश्रयेण शुद्ध्यशुद्ध्यादिविनिश्चयं विदध्याम इत्याशंक्याह कामान्सतीति चेदेतद्दृष्टत्वप्रवितानितं श्रु-
त्यैवेति इह प्रतनग्रन्थविस्तरभयान्न प्रतानितं भावः इह खलु सम्प्रयोपक्रान्तस्य शास्त्रस्यार्थावबोधमात्रे स्थाने।
त्रम प्रथतथात्वपरिनिश्चयेषु प्रकृष्टमतेर्विज्ञानातरतं भ्रमपरिहारार्थं तेनासिद्धत्वादेवासौ प्रमाणीभवति
अन्यथा पुनरप्रमाणमेवेति निश्चयः ततश्च वैदिकाम्नायां वा चोदनायां साक्षात्कृतनिखिलधर्मसकलज-
गद्धितैषी परमकारुणिक एव परमेश्वरः प्रामाण्यनिबन्धनं तदुपदिष्टत्वात्सर्वशास्त्राणां नच वैदिकां चोदनाया-
मकर्तृत्वं वक्तुं शक्यं वचनात्वात्सर्ववचनानां कर्तृपूर्वकत्वात् अतश्चोभयोरपि चोदनयोः सत्त्वमवशिष्ट-
मिति किमाश्रयेण तावच्छुद्ध्यादिविवेकं कुर्म इति न जानीमः न चानयोः परस्परं बाध्यबाधकभावो युक्तः।
तत्त्वबलमादेकत्र चबदौर्बल्यनिमित्तं यद्वेदवाह्यत्वेनास्मच्छास्त्राणां यदाहुः वेदवर्त्मानुवर्त्तीव प्रायो-
ण सकलो जनः वेदबाह्यस्तु यः कश्चिदागमो वंचनैव स इति अतश्च वेदकर्तृकयदवागमान्तराणां बाधइति

श्री.
तं.वा.
१५७

नत्वाश्रयेणैवयुक्तः शूद्रादिविभागः ननुयद्येवंतदितोव्यापन्नाहैदिकीनांचोदनानांसमन्वयापिबाधः किंनभवेत्समा
नकार्यत्वात् नह्येकतरबलवत्किंचिल्लक्षणमत्यशणामोयेनान्यत्रनियमेनबाधःस्यात् यदाह वैधिकाबाधित
येवेद्विपरीतेनकिंभवेत् ननुयद्येवंतत्परस्परव्याहततयाउभयमपीदंप्रमाणमितिनकिंचित्सिद्धेत् नैतत् ईश्व
रप्रणीतत्वाद्यस्यबलवतः प्रमाणकारणस्योभयत्रापिसद्भावात् नहिंसनरामिदमप्रमाणकारणं यदेक
स्मिन्नुपदेशेविपरस्परव्याहतत्वेनाभेति नैतत् अधिकारभेदेनतथोपदेशात् भगवताहिशूद्रादिसामान्येन
सर्वपुरुषविषयतयाहिंसेतिनकश्चिदनयोरप्रामाण्यपर्यवसायीदोषः ननूभयोरपिचोदनयोर्भिन्नवि
षयत्वेनावस्थितेः सत्त्वमवशिष्टमितिसिद्धं ननुकथमनयोरवशिष्टत्वं शूद्रादिविधेः सर्वपुरुषतयाप्रवृत्ता
वपिकश्चिद्विषयेबाधादित्याशंक्याह सम्यक्त्वेनान्यमेवाथोविशिष्टविषयत्वतः अपवादेनकर्तव्यः सामान्यवि
हितेविधौ यदिनामबाधाहंतंसम्यगवबुध्यसे ननुकस्याश्चपिचोदनायाःसर्वहानिः नष्याहिनिरवकाशत्वादि
शेषात्माविधिःसर्वत्रलब्धावकाशंसामान्यात्मकमुत्सर्गविधिंबाधतइतिवाक्यविदःसर्वविषयत्वेभेनलब्ध
प्रतिष्ठोपिह्युत्सर्गविधिरपवादविधेःविशिष्टंविषयंपरिकल्प्यविषयांतरेनिर्बाधमभिनिविष्टोभवेत् यदाह
चूर्णिकाकारःप्रकल्प्यापवादविषयंततउत्सर्गोपिनिवेशितेइति अतएवक्वचित्तयोःप्रामाण्येनशांकर
णीयंविषयांतरेप्रमाणरूपत्वेनप्रतिष्ठापनात् सचद्विधाबाधःसमानकार्यकारितयाविरोधाद्वा नन्वत्रचसमेनाप :
प्रणयेदितिचसमेबाधोप्रणयनेसामान्येनविहितेगोदोहेनपशुकामस्यप्रणयेदिति पशुकामात्मविशिष्टविष १५७

147

यद्येनापवादात्मा गोदोहनविधिं प्रणयनलक्षणसमानकार्यकारित्वाद्बाध्यते अग्निष्टुद्गुणो भवतीति सामान्ये-
न सर्वक्रतुविषयतया विहितोऽप्यग्निष्टुद्रूपो वाजपेयस्य च तत्र श्रूयमाणेनापवादविधिना विरोधाद्बाध्यते नन्वेव-
मपि प्रकृते भिन्नाशंक्याह शुद्ध्यशुद्धी च सामान्यविहिते तत्र केचिदिति पुंसि तेन बाधित एव तथा वार्त्तिके वर्णिते वै-
दिकचोदनाया सामान्येन सर्वपुरुषविषयतया विहिते अपि ते शुद्ध्यशुद्धी तत्तद्विषये योऽद्विरोधेन बाधिते एव
न न बाधिते भाव तत्रेति भावः अत्र हेतुस्तथा चात्रेति वर्णितमिति नात्र शुद्धिर्न चाशुद्धिरित्यपवादात्मतत्तद्वि-
षये विधिवाक्यमुक्तमित्यर्थः ननु नात्र विधिवाक्यत्वं युक्तं निर्बाधस्य शुद्ध्याशुद्धिविभागस्य लोके दर्शनात्प्र-
त्यादिप्रमाणान्तरविरुद्धत्वात् तेनावश्यमनेनार्थवादेन भाव्यं तद्विधिस्तुत्या विध्येकवाक्यतयोच्यते अत एव तद-
र्थेनैव सार्थकत्वम् न स्वतः अत एवास्य स्वरूपपरत्वाभावान्न प्रमाणान्तरविरोधः अर्थवादवाक्याद्धि विधेरा-
ज्ञातिशयो जायते येन तत्र सादरं प्रवर्त्तते लोकः यदाह विधिशक्तिरवसीदन्ती तां प्रशस्तिस्तावत्समुन्नयी-
ति तेन मृच्छैलधातुरत्नादिभवं लिंगं न पूजयेत् यजेदाध्यात्मिकं लिंगं यत्र लीनं चराचरमित्यादेः श्रूयमाणस्य
सर्वैर्निर्विकल्पेन योगिनाभाव्यमित्यादेः परिकल्प्यमानस्य वा विधेः प्ररोचनाकांक्षितया शेषभूतोऽयमर्थवाद
एवेत्याशंक्याह नार्थवादादिशंका च वाक्ये माहेश्वरो भवेत् यदुक्तं विधिवाक्यमिदं तेनेनार्थवादः कदाचन क-
वीति प्रत्यवायेषु सत्क्रियाणां फलेष्वपीति तथा नार्थवादः शिवाराधनेरति माहेश्वरविशेषणद्वारेण महे-
श्वरप्रणीतत्वे हेतुरुक्तः यन्नाम हि बुद्धिमान्स्वयंकृतं तन्न कदाचिद्व्यर्थं भवेदिति भावः यस्मान्न बुद्धिमता न प्रयुक्तं त-

श्री॰
तं॰लो॰
१५८

चैवं संभावना भवेदित्याह अबुद्धिपूर्वं हि तथा संस्थितो सततं भवेत् वेदमादिरूपे नियमे शंका मिथ्यार्थतां प्रति इह खलु नियमे वेदशास्त्रे सततं विधिवाक्यानां वा श्रुतिकाले मिथ्यार्थतां प्रति न असदर्थविषये प्रेक्षापूर्वकारिणां शंका भवतीति संभाव्यम् यतः स एव मते वेनराजितवदबुद्धिपूर्वं प्रवृत्तिमकर्तृकत्वेन तथा विध्यर्थवादादिरूपतया संस्थितः अत एवार्थकेन स्मृत्यता प्रायतनाडोमादिरूपे इत्युक्तं यदभिप्रायेणैव आम्नं तमेव भवावं तमनामीपामास्थित विश्वमिति वेदवचः स लोकः तेषामकर्तृकतया न तत्कश्चिद्विप्रभमेति मतिमानिति वर्णितं प्राणिन्यायमन्यत्रोक्तं यत्र पुनरवच्छिन्नविज्ञानात्मा परमेश्वर एव शास्त्ररूपेणावस्थितस्तत्र का नाम मिथ्यार्थताशंका भवेदित्याह अनवच्छिन्नविज्ञानवैश्वरूप्यमनिर्भरः शास्त्रात्मनास्थितो देवो मिथ्यात्वे कापि नार्हति मिथ्यात्वे कापि नार्हती । त्यत्र पूर्वार्धहेतुः न त्वीश्वरः सर्वशास्त्राणां प्रणेतेत्यधिगतमस्माभिरत्र स एव तदात्मनावस्थित इति पूर्वं किमिदमुच्यते इत्याशंक्याह इच्छावाभावरूपेण यथा निष्ठामरीश्वरः तत्स्वरूपाभिधानेन निष्ठामः स तथा स्थितः यथा खलु परमेश्वरः स्वेच्छामाहात्म्यात्वाश्यात्मप्रमातृप्रमेयादिभावरूपेण स्यात्तमिच्छुः संस्तया वाच्यात्मविश्वरूपतया स्थितस्तथा शाङ्ख्याङ्घ्यात्तथात्तद्देवतस्य प्रमातृप्रमेयात्मनो वाच्यस्य विश्वस्य यत्स्वमस्यापोद्धरूपं तस्याभिधानेन वाचकतया स्यात्तमिच्छुः संस्तया वाचकात्मशास्त्ररूपतया स्थित इत्यर्थः एवमपि यद्यस्य कश्चिन्मिथ्यार्थत्वे स्यान्न दपिनकश्चिद्दोषमित्याह अर्थवादोपि यत्रान्यविध्यादिमुखमीक्षते तत्रास्तु स न्यः स्यात्तेषु स एव तद्विधायकः यत्र खलु स्तुतिनिन्दादिरूपोऽर्थवादोऽन्यस्य विधिनिषेधात्मनो विधिवाक्यस्य संभाभावमियानतत्स्वरूपप

148

स्वाभावादसंसोऽस्तु न कश्चिद्दोषः न ह्यस्य यथाश्रुतोऽर्थः प्रतिपाद्यः किं तु विधेयो निषेध्यो वा तदसंसर्गाभावेन प्र
तिष्ठानं श्रुत एव विधिवाक्यैकवाक्यतयैवास्य प्रमाणमिति वाक्यविदः यदाहुः इत्यर्थवादा विधिनैकवाक्य
भावात्प्रमाणत्वमश्नुवत इति तथा हि बर्हिषि रजतं न देयमित्यस्य विधेः शेषभूतस्य सोऽरोदीद्यदरोदीत्तद्रुद्र
स्य रुद्रत्वमित्याद्यर्थवादस्य न रुद्ररोदनादिः प्रतिपाद्यः किं तु बर्हिषि रजतं ददाति प्रागस्य संवत्सराद्गृहे रो
दनं भवतीति बर्हिषि रजतं न देयमिति स एष पुनरर्थवादो यद्यप्यसंसर्गाभावेन यथाश्रुतार्थाविधायकोऽयथाश्रु
तार्थप्रतिपादको भवेदित्यर्थः सोऽरोदीदित्याद्यर्थवादवाक्ये हि रुद्ररोदनं तस्य यदश्रु अशीर्यत तद्रजतमभ
वदिति रजतप्रतिपादनं तस्यार्थसे वेदं एवं प्रायाणां बहूनामिति रजतानां सत्यदेवेष्टेः न तु कं यदा स्वरूपपर
तामपि संस्पृशन्तः प्रामाण्यावर्तमन्यमेव विशेषयन्ति नैयायिका हि प्रशस्तातिशायं वदन्तो रजतान्तवर्णनमा
पीह यथार्थमाहुरिति न केवलमप्यस्वान्तमाप एवमित्यार्थत्वे यावत्पारन्तमपीत्याह - - - - - - - - -
यद्वा विधिनिषेधात्मनो विधिवाक्यसंसर्गाभावं गच्छन्नप्ययमर्थवादः सन्निहितत्वान्न निरर्थक एव भवेन्न प्रवृत्तो
तः राजजंगडादिवदिति तथा हि पदार्थगमनेन सन्निहिता वर्णा न निरर्थकास्तथायमपीति वर्णानामानर्थ
क्ये हि वर्णस्य व्यपदेशे राम न भवत्स्यात् यथा राजजः जडः संगस्याप्यर्थवत्त्वं स्यात् एवं यवानामानर्थक्ये
हि समुदायोऽप्यनर्थक एव भवेद्यथैकस्याः पिपीलिकाया तैलादानासामर्थ्येन तत्समुदायोऽपि शरणसम
र्थः इति एवमर्थवादस्याप्यानर्थक्ये तत्समुदायोऽपि शरण्यसमर्थ इति एवमर्थवादस्याप्यानर्थक्ये न तत्सन्नि

श्री तं·लो·
१५५

149

यानेन विधीयमाने निषिध्यमाने वार्थे सा दृष्टं प्रवृत्तिः निवृत्तिर्वा न स्यात् सोऽरोदीदित्यादौ हि रोदनप्रभवं रजतं नि
न्दितमेव श्रुतं येन बर्हिषि न तद्दानान्मादृशां निवृत्तिर्भवेत् लोकेऽपि वल्लिर्यशोः क्रेतव्यमतो न तथा केनारः प्रव
र्त्तते यथैषा वध्वस्त्रियस्तीरामशीलाद्ध्यपत्यानघ्रपजे वेत्येवमादिभ्यः स्तुतिपदेभ्यः इति स्वाद्भवसाहितिको
पमर्थः अत आह स्वार्थश्रुत्यायत्तं वाक्यस्य संवित्तिमेवभासते तदपक्रमेनेकर्तुं शक्यं विधिनिषेधयोः अपय
येतद्द्लोकारेण पक्रयते तद्विधिनिषेधात्मके विधिवाक्यस्याप्यर्थापक्रवः कर्तुं शक्य इत्याह उदपक्रमेन
मित्यादि न केवलमशस्य संवित्तिरेव साधकं प्रमाणमस्ति यावद्युक्तिरपीत्याह युक्तिस्वाद्यास्ति वाक्येषु स्व
संविद्याध्यवाधिता यासमग्रार्थमणिकानत्ननिश्चयकारिणी युक्तिरिति स्मृतं तेन रोक्ता नत्रभवत्तु नामेदम
र्थवास्ववाक्यं विधिवाक्यं वा किमनयानिश्चिंतया न ह्यपि वेदशास्त्रोक्ताः शुद्ध्यादिविभागास्तावद्युक्त्यु
त्याबाधितः अनेन च न किंचिदशुद्धं विहितेनाप्यशुद्धं त्वतीयस्वराशिः नास्तीति शुद्ध्यशुद्धि विधानमेव न
सिद्धमित्याशंक्याह मृते देहे वदेहे स्याद्या चाशुद्धिः प्रकीर्तिता अत्यन्ते नेति तु जंतानामशुद्धं संविदस्तु तां संवि
त्तादात्म्यमापन्नं सर्वं शुद्धमतः स्थितं वेदशास्त्रे हि मृते देहे देहाश्रुते मलादौ च यदशुद्धिकत्वमुक्तं जी
वदेहे देहस्यैव मलादौ चेतनस्तः संवित्स्वभावासद्भावनिबंधनाइतोः संवित्प्रकाशाभ्युपगमेभि
न्नेतदशुद्धं श्रुत्यंतो विशेषाद्युपादानाम्स्वर्वेद्यावगाह्नित्यर्थः अत एव च यत्किंचित्संविदेकरमापन्नं तत्सर्वं
शुद्धमिति तेन संविदेकात्म्यानेकाभ्यां सर्वत्र शुद्ध्यशुद्धिविभाग इति स्थितं सिद्धं तच्चैतद्युक्तिमात्रेणैव सिद्धं १५५

यावदागमेणापीत्याह श्रीमद्वीरावलौ चोक्तं शुद्धाशुद्धिनिरूपणे तदेव शब्दद्वारेण पठन्ति सर्वेषां वाहको जीवो
नास्ति किंचिदजीवकं यत्किंचिज्जीवरहितमशुद्धं तद्धि जायते जीवयति निखिलमिदं भवजातं ज्ञानक्रियात्म
त्वेन प्राणयति जीवः परप्रकाशः स सर्वेषां प्रमातृप्रमेयात्मनो विश्वस्य वाहकः यतस्तं धारयतीति वाहकः स्व
त्मसात्करणतयावभासक इत्यर्थः अत एव तः नास्ति किंचिदजीवकमिति न हि प्रकाशातिरिक्तं किंचिदपि भा
यादिति भावः यस्मान्नः किंचिज्जीवरहितं तदैकात्म्येन संवेद्यमानं तत्तदशुद्धं विज्ञानजातमुपपद्यवस्तुतो हि चित्
तात्त्विकरूपणीयत यावदात्मनेत्यर्थः एवं संविदतिरिक्तस्याशुद्धत्वाभिधानादितरस्य पुनः शुद्धमेवेत्यर्थसि
द्धं तदाह तस्मात्संविदो नातिरेकेण शुद्धिभावहेतुः तदुक्तं तत्रैव यदशुद्धं नास्ति तत्किंचित्सर्वं तत्र व्यवस्थि
ते यन्नैतद्रहितं किंचिदशुद्धं तेन जायते इति नन्वेवं शुद्धाशुद्धिविभागो नैकैश्चिन्महात्मभिः परिगृहीत इ
ति कथमत्र समाश्वासः स्यादित्याशंक्याह अविकल्पेन भावेन मयैषापि तथा भवेत् तथेति संविदैकात्म्याने
कात्म्याभ्यां शुद्धाशुद्धिविभागभाज इत्यर्थः तदुक्तं तत्र ऋषिभिर्भक्षितं सर्वं गोमांसं च नराश्वमिति यदि ना
म हि ते द्रव्याणां संविदैकात्म्यमेव शुद्धिरिति न जानीयुस्तत्कथं शास्त्रबहिष्कृतं लोकविरुद्धं गोमांसादि भ
क्षयेयुः अत एव हि बाह्यचर्यायां यद्वेद लोकविद्विष्टं यच्च शास्त्रबहिष्कृतं यत्तज्जुगुप्स्यं च निन्द्यं च वीरैस्तत्कार्य
मेव तदित्याद्युक्त्या विकल्पप्रहाणाय लोकशास्त्रविरुद्धं द्रव्यजातमभिहितं यन्नाम सर्वद्रव्याणां लोकवि
रुद्धत्वादिनवाक्त्वं रूपं किं तत्परा संविदेवेति किं नाम जुगुप्स्यं निन्द्यं वा सर्वत्रैव संविद्रूपत्वाविशेषात् अत ए

वतत्रचित्रप्रत्यवेतामात्रमेवप्रयोजनं किं संविदेकाग्रीभूतेन विज्ञानेन वेति यदुक्तं नवर्यमोगतः प्रोक्ताया ख्याताभाम
रूपिणी स्वचित्तप्रत्यवेतातः स्थिरं किंवा चलमनश इति नत्रय एवेतन्नाभिभर्योमांसादिकयमभ्यस्ततयोपदि
ष्टमित्याशंक्याह लोकसंरक्षणार्थं तत्तत्तन्त्रैः प्रयोपितं एवमपदिष्टमलक्ष्मसंविदेकात्मापि लोकोला
भलौल्यात्मंायतन्त्रकर्वाणेन लोकयात्रार्थं शक्त्यादिनितन्त्रं विदन्नेतान्न परमार्थिकरूपं तैः प्रकर्षेणतन्त्र
रूपवद्द्वेषणादिद्वारेण गोपितं न प्रकाशितमित्यर्थः यदुक्तं तत्रैव ज्ञानासमरसेसर्वं द्वेषणादिपुनः कृतं इति
यदभिप्रायेणैव यत्नेनोक्तं नतत्त्वार्थाय च दुःखस्तस्माच्चेदिमायाचमशोक्तं नन्विदंभावजातं बहीरूपतयाचे
तसंभवति तत्कस्य शुद्धाशुद्धी स्यातां यदाधिकारेणापि विचारान्तरमुपते यद्यपि संभवति तथापैव संभवति
तथैवसंभवेत् किं तस्य प्रमातृसंबंधिना परिज्ञानेनेत्याशंक्याह बहिः सत्त्वपिभावेषु शुद्ध्यशुद्धीषुनीलवत्
प्रमातृधर्मएवायविदैक्यानैक्यावेदनात् बहीरूपतयाप्युपलभ्यमानेष्वपि नीलादिन्यायेन प्रतिभासविक
कारित्वाभावात्शुद्ध्यशुद्धी न वस्तुनो धर्मः किंतु प्रमातुः प्रमाता हि विदैक्यानैक्यवेदकतया मातिशयः
संकल्पात् व्यवस्थापयतीदं शुद्धमिदमशुद्धमिति अत एव शुद्ध्यशुद्धी न नियते कस्यचिद्धि यदशुद्धं तत्तदन्यस्येति
वस्तुधर्मत्वे हि भवेत्भावानियमेय यदिदं शुद्धमिदमशुद्धमिति नहि कस्यचिन्नीलमपरं नीलं भवेत् ननु प्र
मातृत्वमहं स्वदर्शने नैव मनः प्रमीदहि चित्किम्रया शुद्धिकथं तच्छुद्ध्यशुद्धी वस्तुनो धर्म इत्याशंक्याह यदि
वा वस्तुधर्मोऽपिमात्रपेक्षानिबंधनः सौत्रामण्यां महावेत्तः शुद्धान्यस्य विपर्ययः यदि नाम शुद्ध्यशुद्धी आवस्तु ७५·

धर्मत्वमभ्युपेयते तदपि प्रमाणान्तरं तमेवात्र निबंधनं भवेत् यथा हि यमेव प्रमाणान्तरमपेक्ष्य त्विन शुद्धित्वं ज्ञायते
तस्यैव तच्छुद्धौ भवेन्नेतरस्य एवं येनैव प्रमाणेनास्य शुद्धत्वमवगृहीतं तस्यैव तच्छुद्धं नापरस्य तथा हि केवलस्य सोमयाम
एणां हेतुः याजकस्य शुद्धाश्च ब्राह्मणं भक्षणं दोषायेत्यर्थः स्वयागश्च ब्राह्मणः कर्तव्य इति अन्यस्य सोमयागमपि
मयाजकस्य पुनरशुद्धा व ब्राह्मणा दाव योगे नार्थः यतः स्मृतिः ब्राह्मणस्य रुजः कृत्वा घ्रातिरघ्रेयमद्ययोः जै
ह्मं च मिथुनं पुंसि जातिभ्रंशकरं स्मृतमिति तस्मादस्तु धर्मत्वेऽपि तयोः मात्रपेक्षा निबंधनत्वं यदि नस्यात् तस्मा
दीनेव प्रति स्वरायाः शुद्धत्वमेव भवेदशुद्धत्वमेव वेति एवं स्वरायाः समानेनाशुद्धत्वं विहितं सोमयागे हो
तृविषयत्वेन विशेषस्मृत्या विरोधाद्बाधितमित्यवगन्तव्यं ननु अवश्यं वाचोदना या यदि वैदिकी चोदनार्थ
धिता तथा वदानीं वैदिका पुनश्चोदना यस्य नैव संबाध्यतेऽत्र तेन न लौकिकमिव नः प्रतिभासते इत्याशंक्य
ह अनेन चोदनानां च स्वरवाक्यैरपि बाधनम् क्वचित्तं दर्शितं ब्रह्महत्याविधिनिषेधवत् स्वरवाक्यैरित्यपवाद
रूपैः क्वचिदित्युपसर्गविषये संदर्शितमित्यनेन यथोक्तयुक्त्यानैव लौकिकपर्यवसायीकस्मिंश्चिद्विषय इति प्र
काशितं अपि शब्देन नास्त्येव मस्माभिः किंचिदुत्प्रेक्षितं यत्नामोक्तं शैच्या विशेषचोदनया सामान्याम्नायिकी
वैदिकी चोदना बाधितेति न चैतन्मयामादिकमपि तु भूत्वैतदर्शयितुं ब्रह्महत्यानिषेधवदित्युक्तमिति एव
यथा ब्राह्मणो न हंतव्य इति सामान्येन ब्रह्महत्या निषेधो विहितो ब्राह्मणो ब्राह्मणमालभेतेति विशेषश्रु
त्या बाधितः तथा स्वरायामपि शुद्धत्वमित्यर्थः एवं शुद्धाशुद्धिविषये विचारः कृतमन्यत्राप्यतिदिशति भक्ष्यादि

श्री· तं·लो· १५१

151

विषयोपि तेन्यायमाश्रित्य चर्चिताः न भक्षादिविचारणाभिप्रायेणात्र भक्षेन वा भक्षमित्यादयोप्यसामर्थ्यलभ्या विषयोप
देनैव न्यायेन गतार्था इत्यर्थः तत्र यथा शैवाविशेषचोदना किं न वेत्याशंकां गर्भीकृत्य आरामार्थमेव दर्शयितुमुप
क्रमते सर्वज्ञानोत्तरादौ च भाषते परमेश्वरः तदेवार्थद्वारेण पठति नर्मिदेवड्डिहिणविस्तृतेष्वप्युदीरितं तन्त्रो
त्तरवैशिष्ट्यात्पूर्वपूर्वप्रबाधकं नन्वेतस्य उक्तमुक्तं बाधकं यावद्विरुद्धं स्यात्तदेवोक्तम् तदाह पूर्वपूर्वप्रबाधकमि
ति प्रश्नोत्तरोत्तरवैशिष्ट्यहेतुः सामान्यस्य विशेषेण बाध्यत्वादित्यभावः अतएव विपर्ययेण बाधो न भवेदित्याह
न शैवं वैष्णवैर्वाक्यैर्बाधनीयं कदाचन वैष्णवं ब्रह्मसंभूतैर्न्यायादिपरिवर्जयेत् ब्रह्मसंभूतैर्वेदवाक्यैरित्यर्थः यच्छ्रु
तिः प्रजापतिना च ह्यवेदाः प्रजायन्तेति यच्च वैष्णवं वेदवाक्यैर्नबाध्यते तच्छैवबाधने का वार्तेत्यर्थसिद्धम
प्यादिशब्दाद्ब्रह्मसंभूतानामपि वेदवाक्यैर्नु बाध इत्यादियागे यदुक्तं तत्र नच भिन्नार्थवाक्यं च वैदिकं च विभिन्नस्तथा
न दैवैर्ब्रह्मणो वाक्यैर्वैष्णवं परमार्जनैः न शैवं विष्णुवचनैर्बाध्यतेत कदाचनेति ननु विपर्ययेणापि बाधे को दोष
इत्याशंक्याह बाधते यो विपरीतात्स मूढः पापभाग्भवेत् पूर्वेणोत्तरस्य बाध इति विपरीतं समीचीनं पूर्वस्योत्तरे
णबाधः यदुक्तं तत्र यो हि बाधयते पापः स मूढो नष्टचेतनः उत्तरोत्तरवैशिष्ट्यं सर्वेषां परिकीर्तितं इति एवं सर्वो
त्कृष्टत्वाच्चैव एवंशास्त्रं आश्रयात्कृत्वा निष्ठा कार्या नास्य चेत्याह तस्मान्नावृततया स्वं द्रलोकधर्मान्नैवाचरेत्तनि
ष्ठाः सूत्रमतया तद्गौणत्वाल्लोकसंरक्षणार्थं लोकधर्मानाचरेत् न कश्चिद्दोष इति भावः तदुक्तं तत्र ये तु वर्णाश्र
माचाराः श्रायश्चितात्मलौकिकाः संवंधादेशधर्माश्च प्रसिद्धान्न विचारयेत् गर्भाधानादितः कृत्वा यावद्दाह १५१

मेव च तावत् वैदिकं कर्म पश्यामश्चैवं स्यात्तन्त्रभाक् नमस्त्वसृष्टाविस्कंदलोकधर्मान्समाचरेच्च इति अत एव श्रौतः कौ
लः बहिः शैवो लोकाचारेण वैदिकः सारमादाय तिष्ठेत नारिकेलफलं यथेत्याद्युक्तम् ननु मुख्ययादृष्टा
यदि लोकधर्मान्नानुतिष्ठेत्तर्हि शास्त्रान्तराभावेन किं न वेत्याशंक्याह नान्यशास्त्रसमुद्दिष्टैस्तोतस्युक्तं निजैरेण
निजैस्तोतसि आत्मीयशास्त्रे प्रोक्तं ततः पिबेन्मधमित्याद्युक्तमेवार्थं चरेदनुतिष्ठेत् न पुनस्तत्समत्वास्य स्मरानपेयस्य
दिशास्त्रान्तरोद्दिष्टम् भावनादृष्ट्याधिकारिभेदेन परस्परविलक्षणानि शास्त्राण्युपदिष्टानि इत्यत्र प्रस्तुपदि
ष्टं कथमनुष्ठेयमत्यस्य स्यात् तदुक्तं तत्र नान्यशास्त्रसमुद्दिष्टैर्न चान्यां देवतां स्मरेत् विशुद्धभावनायुक्तः शिवैक
गतमानस इति यत्र समस्तमानतंत्राद्येयथायोजं यतस्तानपि क्रियाभेदाद्भिन्नान्वेदागमविदः यदाहुः क्रि
यादिभेदभेदेन तन्त्रभेदो यतः स्मृतः तस्माद्यत्र यदेवोक्तं तत्कार्यं नान्यतन्त्रतः इति अपेक्षायां पुनरुत्पन्नायां शा
स्त्रान्तरादपेक्षणीयं अन्यथा तत्तद्दिनिकर्तव्यताकलापस्य परिपूर्तिः स्यात् तथाहि पूर्वशास्त्रे तत्र ह्वानपतीनि
ष्ठा मन्त्रैस्त्रेण भिन्नं चिन्ता पूर्वं विनिर्दिष्टेऽग्न्यावाहनं ज्वलिते प्रशान्ते इत्यादौ ह्वानपतीनां कथं सिद्धिरित्यपेक्षायां
समानतन्त्रात् त्रिशिरोभैरवात् ततो मूलेन मन्त्रेण नन्दिकेशं च जाह्नवीं महाकालं सदंष्ट्रं च यमुनां चैव दक्षिणे
इत्याद्यपेक्षणीयं एवं च ज्वलत्स्थंडिलं कथं त्विदिति अपेक्षायां समानतन्त्रे तत्ते परस्य स्पष्टमनभिधानादसमा
नकल्पाच्छ्रीस्वच्छन्दशास्त्रादेव संस्कारस्याभावितः समाभिमन्त्रितेऽत्रा ज्वलद्विना ज्वालाकुलम्
नाराचास्त्रप्रयोगेण प्रविशाद्रुहमध्यत इत्याद्यपेक्षणीयं नाराचास्त्रस्य प्रयोगः कीदृगित्यपेक्षायां समानकल्पेऽपि

श्री॰
ते॰लो॰
१५८

152

शास्त्रेण न द्वयपलंभादसत्वं न समासमानादन्येन विजयाख्यामिद्रांतशास्त्रे उक्तानां नकारं कृत्वानि सिद्धेः ग्रत्यः प्रसारयेत यथा
मां गुह्यकौलं मैनो चालयेत् तथा कृष्णेऽस्तु नारदः कीर्तितो हि देवमित्याधेयत्तर्णीयं अधेयत्वानिर्दिष्टनिर्दिष्टितः फलं साच यत एव
भवेत्तद्देवाधेयत्तर्णीयं किं समानत्वासमानत्वं पूर्वेष्वपि देहेणायवृमयेत्तायां सत्यां समानादसमानत्वार्थमिति नवादयेत्वाणी
ये यावदधेयता यानिष्टत्तिः स्यात् तस्माच्च पुनर्निर्निर्विकल्पतमेव शास्त्रार्थानुष्ठानं स्यात् यदुक्तं मायेत्स्नेहपेहेत्व
मानेयावदपेतत्वे तावदेवास्य ततः कार्यं नास्य संपादनं व्यस्येत् तिरिति नन्वनिखिलमिदं शास्त्रजातं भगवतैव सकलज
गदुद्दिधीर्षयोपदिष्टं तदुक्तार्थानुष्ठानमवश्यं कार्यं येन संसारमोहः प्रशाम्येदिति तद्यथास्तु किमनेन विचारेण
तस्याशंक्याह यत्तोयद्यपि देवेन वेदाद्यपि निरूपितं तथापि किल संकोचभावाभावविकल्पितः वेदादीनां सर्व
शास्त्राणां परमेश्वरेणैवोपदिष्टत्वे नास्ति विवादः किंतु तेन संकोचभावाभावभेदेन द्विधा शास्त्राण्युपदिष्टानि ।
कानिचिद्भेदप्रधानानि कानिचिदभेदप्रधानानीति तत्र भेदप्रधानानि वेदादिशास्त्राणि अभेदप्रधानानि शैवादी
नि तदाह संकोचतारतम्येन याशांवज्ञानमीलितं विकासमात्रतम्येन यदिज्ञानं तद्बाधकं संकोचो भेदप्रथाप
रूपत्वात् इदं यच्छांवं वेदादिविकासः संकोचाभावादभेदप्रथा अत एव भेदप्रथायाबाध्यत्वादिदं बाधकं भेदो
हि संसारः स च सर्वेषामेव स्फुटतया विवादः एवं बाध्यबाधकयोः सांकर्येणानुष्ठानं दुःखादिति यथा कुसमेवयुक्तं
अत एवास्य त्रयाशांवज्ञानम् स्मृतिवास्तितशास्त्रं समाश्रयेदित्याद्युक्तं इदानीं न द्वैतं नापि चाद्वैतं इतिव्याचष्टे इदं
द्वैतमिदं नेति परस्परं निषेधतः मायेयभेदकल्पनं तत्स्यादकाल्पनिकं कथं यन्नाम किंचिन्नेदं द्वैतं नानारूपत्वेन तद १५८

पास्यैकात्म्यलक्षणमद्वैतमाश्रयेदित्यादि यदत्रोक्तं तत्कालादिकं कवलीकृतं तत्तत्कल्पनाकलापं स्वात्ममात्र-
स्फुरत्तासारेण एतन्नैकध्यं स्यादित्युपपद्यते इत्यर्थः यतस्तद्व्यापोहरूपवेत्तृपरस्परभिन्नदेशकालाकारास्वरूपगोपनात्मि-
का परमेश्वरेच्छाशक्तिस्तत्स्वातन्त्र्यात्तथाभासो भेदस्तेन त्रुटिमत्रप्राणितं कल्पनामात्रसत्ताकमित्यर्थः किं चात्र प्रमाण-
मित्याशंक्याह उक्तं भर्गशिखायां यद्यस्य कालकलादिकं द्वैताद्वैतविकल्पोत्थं ग्रसते कृतार्थीति इह खलु विक-
ल्पकपरसंविदावेशवशात्कृतार्थो योगी ज्ञानेन यस्मात् सोऽप्रासमपरसंविदैकात्म्यो योगी द्वैताद्वैतविकल्पादुत्थितं भेद-
प्रथामयं उल्लसितं स्वस्वकालकलादिकं स्वमते स्वात्मसात्करोति नास्य काचिज्जन्ममरणादिका मानमेयादिरू-
पा च कल्पनास्तीत्यर्थः यदुक्तं तत्र स्वस्वकाले च कलाकलापं विकारजातं प्रतिपत्तिकाले ऐकात्म्यनानात्मवि-
तर्कजातं तदा स सर्वं कवलीकरोतीति इति अथ लिङ्गपूजादिकं न चेति व्याकुरुते सिद्धान्ते लिङ्गपूजोक्ता विश्वाध्म-
यत्वाविदे कुलादिषु निषिद्धा सा देहविश्वात्मताविदे इह सर्वात्मके कस्मात् द्वित्वप्रतिषेधने विश्वः षट्त्रिंशत्त-
त्त्वात्मको यो सावध्वा तद्रूपतां वेद्मि सिद्धान्ते भेददर्शने लिङ्गपूजा विहिता परमेश्वरो हि लिङ्गगर्भीकृतनिखिलाध्व-
प्रपंचमिति तत्पूजने समग्रमिदं जगत्स्वात्मसात्कृतं भवेदिति भावः यदाहुः लिङ्गे परमशिवात्मैव्याप्तिं पीठे सदा-
शिवप्रोक्तां ब्रह्मशिलायां मायापर्यन्तां भावयद्भिरिमैरिति इष्टेन शिवलिङ्गेन विश्वं सन्तर्पितं भवेदिति कुलदे-
वहरदर्शने पुनरसौ लिङ्गपूजा निषिद्धा यतो देह एव सर्वाध्वमयः इति तत्रैव तत्स्वात्मा कार्यः स एव भवतीति किमत्र
यत्नेन बाह्येन लिङ्गादिना फलं यदुक्तं यजेदाध्यात्मिकं लिङ्गं बाह्यलिङ्गेन पूजयेदिति तथा हि हृदयगुहा

गेहगते सर्वगं सर्वगं परिकल्प्य प्रणमति मितमतिरिति शिवोऽशिवाशायाश्मादिसमा सा त्वमिति इह पुनः परमाद्वयदृष्टेवि
कदर्शनेन तद्विधिना तन्निषेधेन वा न किंचित्प्रयोजनमित्युक्तं नात्र लिंगपूजा नापि तत्परित्याग इति यतः इदं सर्वात्मके
ध्यानमिह परमेश्वरस्वरूपसंविन्मात्ररूपत्वादिह निष्ठतयात्वत्त्वयावा किंनाम सर्वोत्स्य प्रतिपत्तिविघ्नभूतं तद्देहवा
द्याद्यभिमानेन न भवेदिति भावः यदाहुः न क्वापि गतागतिर्नाव्रतं न किंचिदिदमेवये भवत्कृताम पशुपतिभवाक्ते
भ्यो नमो नम इति इदानीं जटाभस्मादि संग्रहायाचष्टे नियमात्प्रवेशाय तादात्म्यप्रतिपत्तये जटादिकोऽल।
यागोऽस्य प्रसङ्गाप्योपायोपदेशतः नियमाज्जटी मुण्डी शिखी दण्डी पञ्चमुद्राविभूषितः प्रमादान्मैथुने क्षामसमड्डाही
महेश्वरीत्याद्युक्त्वा वैराग्यादयस्तत्प्राणप्रवेशाभ्यासे तेन यातादात्म्यप्रतिपत्तिः परमेश्वरस्वरूपसमावेशस्त
न्निमित्तं सिद्धं नेवक्तव्योपसाध्यं जटाभस्मादि विहितं यदुक्तं कलान्तनपाविशाएवशक्तिमं देशसंख्यया विभज्य
केशान्कपालप्रयत्नेशोसंहितापट्टभिः व्रतेश्वरस्य पुरतो बभीयाच्छिवतेजसेति तथा व्रतिनोऽत्र दिने शुद्धे तत्र
ग्रासभस्मपांसुरः तिलकैः पुंड्रकैश्चित्रैर्भूषितो भूमिपादय इति कौलेऽज्ञलदर्शने पुनरस्य जटाभस्मादेस्त्यागो।
निषेधो विहितः इत्यर्थः यदुक्तं जटाभस्मादिचिह्नं च ध्वजं कापालिकं व्रतं शूलं खट्वाङ्गमस्त्रं ग्रथारपेयमन्तभून
ले न तस्य संगमं कुर्यात्कर्मणा मनसा गिरेति यतोऽत्र पृथक्पृथग्मिलितामरीच यस्तत्र तत्र विभेदवज्झते इत्याप्तु
क्ता विषया संनोपि परमेश्वरस्वरूपापत्तेः मुक्तिनायत्वेनोपायस्योपदेशः यदुक्तं पूर्वं निरोधः कथितो विरा।
गाभ्यासयोगतः अस्माभिस्तु निरोधेयमयत्नेनोपदिश्यते इति विचारविग्रहनादि भूतन्नए पवा आत्मनेनो।

वगतार्थत्वात् प्रथमतृतीयपदाभ्यामेव चैतदर्थोऽभिहित इति भावः इह पुनः सर्वात्मना तद्विधिप्रतिषेधनेन भवतः सू-
त्रिप्रायेण संबंधः इह हि संक्लिष्टे काले संनिधीयेय तत्र चैत्यदेवगृहादौ सन्निकृष्टं तदेव तदा ग्राह्यमितरत्तत्याज्यमि-
ति तदौदर्यविधिरस्तु निषेधो वा किमनेनतः प्रयोजनं यह्वलति परतत्र प्रवेशात्तयमेव निकटे यदा उपाये दे-
न्निमग्राह्यस्तदा मा ज्योतिश्च वा क्वचिदिति सूत्रमनादीनां चरणाचरणं व्याचष्टे अतत्वर्णाचमेत्रार्थता दान्यप्रति-
पत्तये तन्निषेधस्तमेत्रार्थं सर्वात्मप्रतिपत्तये यथा स्त्याति ज्ञाने उक्तोत्पत्त वर्त्तनीयं मेत्रार्थो नियतो वाशप्देवतादि
तन्निषेधोऽर्थोक्तोलेसार्वात्म्ये विशषमेद इह पुनस्तस्यानविधिनिषेधो वेत्येतत्सर्वं पूर्ववैमेव व्याख्यातमिति न पुन-
राचष्टे अथ क्षेत्रादिसे व्याख्यातमाह क्षेत्रपीठोपपीठेषु प्रवेशो विनाशांतये मेत्राद्याराधकस्याय तहाभाषो-
पदिश्यते क्षेत्रे मेलापस्थाने पीठं कामरूपादि उपपीठं देवकोट्टादि उल्लाभायेति तत्समं त्रादेः प्रियमेलापा-
दिकमेण सिद्धादेः लोभस्तन्निमित्तं वा क्षेत्रेपतेऽसंदोहायाग्र यान्निमेलाभवेदिति सूत्रपत्रनिषेधः सूत्रम-
माह क्षेत्राधिगमनाभावविधिस्त्वात्मना स्तथा वैसदूपेण ग्रहणं वेत्तातमित्यपि वर्णितं आदिशब्दात्पीठा-
देर्ग्रहणं तथेति प्रागुक्तेन प्रकारेण तदुक्तं किंचिदप्यात्मप्रदेशमात्रं च नात्र किंचिदपि परिहार्यं तस्मात्का-
नि किंचित्क्षेत्रादिपर्यटनैरिति इह पुनस्तमायमध्यात्मनास्तिश्रुति प्रायेवाक्रमित्याह इत्यपि वर्णितमिति तदुक्तं इ-
ह सर्वात्मना कस्मात्तद्विधिप्रतिषेधनेनेति अथ समयादिप्रपालनमाचष्टे समयाचारसद्भावः पाल्येनेनाप-
दिश्यते भेदप्राणनयानतमार्गात्मविशुद्धये समयादिनिषेधस्तमतप्रास्तेषु कथ्यते निर्मर्यादस्वसंवेद्यं

श्री॰
तं॰ लो॰
१५५

154

संहरणं गुप्यतामिति इदं कुर्यादिदं न कुर्यादित्येवमात्मा समयाचारः भेदप्रणतये ति किंचित्स्यकाकिंचिद्रूपादीयते इत्येव
मात्माभेदः यथा शास्त्रांतरमार्गो न स्वशास्त्रे शरीरे दहः यदुक्तमिति अन्यस्मिन्मंत्रो नासीत् तस्मिन्त्र्यशास्त्रांतरेन च अग्न्यरूप
दिविज्ञानेन कंपेते तरभावनादिति समविषमलक्षणेषु मतशास्त्रेषु पुनः समयादेस्त्रिविधो विहितः तथा चतत्र
तोग्रेथ इत्याह निन्दमर्यादमित्यादि तद्विपरीतत्वेन मंत्रार्थं स्वप्रकाशमत एवान्यापेक्षत्वान्नात्र समेहणं मतएव
वा नियतरूपत्वान्निर्मर्यादं निर्यंत्रणं गुप्यतामत्र गुप्यतामित्यर्थः तदेवमेवंविधे परे तन्त्रे कथं नाम हानोपादि
नायपेक्षा सह स्वसंभिन्नः समयाचारः शुद्धनिमित्तमितिभावः अथ परस्वरूपलिंगादिनामग्रोत्रादिकं च यथा वि
निद्याख्यातकामः इत्येणपरिकीयं स्वकीयं च रूपाद्यावष्टे परकीयमिदं रूपं धेयमेतन्नमेनितं जलादिलिंगं
वान्यत्कपालादि तमेतिनजम यदिति ख्यातस्वभावात् जलादीतिवाक्येषणादि समर्थतान्यपरकीयं निज
मिति स्वशरीरावस्थितं लिंगशब्दादिति दिशब्दार्थमाह आदिशब्दात्तपत्नं र्याचीलातिख्यादिकथ्यते तत्र
शयनादि चर्याचर्यापदोक्तआचारः वेला मध्याह्नार्धरात्रादिरूपा तिथिः प्रतिपदादिरूपा नाम शक्तिशिवं
तमेतत्स्यमनन्तान्यथा यतस्यमेडांतिकस्य साधकस्य व्रतपविग्रहादौ पुष्पपातादिक्रमेण क्रियमाणं नाम श
क्तिशिवाद्यं तेस्यात् तेन शिवा शक्तिरीशानः शिवः आदिशब्दाद्गणाद्यंतं यथा कवचगणः तदुक्तं स्वजंवि
मोचयेन्नामदीक्षितानां नन्दादिकं शिवांतकं द्विजेन्द्राणां इतरेषां गणांतकमिति तथा शिशुनान्ति समका
सान्निपातेन्न यत्र नाम ततस्सर्वे शक्त्यंते नारीणां शिवशब्दांतेन्द्राणां कुर्यात् एवंविधप्रक्षत्रियविशां शूद्राणां तम १५५

वेङ्कणग्रामेश्ति ग्रन्थेन्ति बोधार्यं तं स्वमेतं ततिक्रमेण बहूपंतेहि नामसूत्राभवेदिति रहस्यशास्त्रविदः यदुक्तं बोधिः
प्रभुक्तयायोगीश्वानंदःपादश्रावलिः वीराणांवीरपत्नीनां कल्पं नामैतदंतिकमिति तेन समस्तबोधिः विश्वप्रभु
रित्यादि गोत्रे च गुरुसंतानेभ्मठिकाकुलशाहिता नस्यमठिकेति कुलमिति चाभिधानद्वयं नवकामठिकेत्याह
श्रीसेनतिसंभवकाख्यातदर्थामेदसंतिताश्चमर्थवत्तस्तोतमठिकाः शंकरेक्रमे युगक्रमेण कूर्मोपासीनांना
सिद्धसंततिः नकेवलमर्थवत्तस्यवमठिकायावदन्याग्र्यपीत्याह युगेत्यादि आदिशब्दक्तंत्रेणव्याखेयः तेन
कूर्मसत्रेनायुगावतारकस्य श्रीकूर्मनाथस्यायः कृतयुगावतारकः श्रीखगेंद्रनाथः सत्राद्योयस्याः सातेथे
ति कुलशब्दस्य गुरुकुलमित्यादौ लोके प्रसिद्धेः एतद्व्याख्यानं नक्रांते गोत्रादीत्यादिशब्दार्थमाह आदिश
ब्देन चतुर्थं पल्लीपीठोपपीठकं सुद्धाकुशमेतितेषां च वियानेस्वपरास्थितं यरमिति षष्मासाधिकाराणांराज
पुत्राणांभिन्नंभिन्नमाभ्य यस्यानं पल्लीभिताम्थानं यद्दल्ल्रिपेनेहिस्याधिकारा: दूत्पायेषामियबड्गविभेदासं
ततिरनवछिन्नाचिंतापिपाप्रशिष्यमयी आनंदावलिबोधिप्रभुपादांतापयोविशाहांतापताओवहस्यः
स्तः सुद्धाषंकंकुमान्तेनतु दतोगुप्तादिकनिष्ठांतासथसाकनीयसीवामातु हिदण्यांतोध्रुवाकंदलिबेदवार
नाभिमस्कंदमिति कुसुमःशरवादिविल्हवेढिल्हाःकरविल्हांविशमविलाः अडवीशेवीहत्तिणविलाःक्रेभा
विकान्तराख्यायदेवीकोटकुलादित्रिपुरीकामाख्यमटहासश्च दक्षिणपीठमेतनतु षंकेच्छेपल्लिपीठं गोकु
मशाइति स्वपरस्थितमिति समंततिक्रमेण भिन्नंभिन्नमित्यर्थः ननु गुरुमंतानादेरेवं उपदेशाकिंप्रयोजनमि

मित्याह तादात्म्यप्रतिपत्तौ हि स्वसंतानं समाश्रयेत् अंतीतत्त्वज्ञेयस्वकं परसंतानिनानाहि स्वसंतानमिति श्रीमत्समरना
थादिक्रमेण यमय यथासंभवं यतः श्रीवरदेवादिसंतानोनास्यास्तीति यत एवान्यत्र निषिद्धमित्याह यत एव मतशास्त्रेषुनि
षिद्धं खंडनायुतः सर्वं खंडेऽपि परे तत्त्वभेदनाने न जायेत अतेनेति समस्तेनेन रोकेन हेयोपादेयरूपेण स्वपरसंतानादिने
त्यर्थः न तत्खंडे परे तत्त्वेकाचनेव विधाहेयोपादेयरूपाखंडनायुक्तमेवाशयः एवमर्थमेवेन ग्रंथमाख्यायसमत्व
यसंगमापियोजयति एवं तेन प्रवेशादिसंतानानियमान्ततः नास्मिन्विधीयते तद्धि साक्षान्नोपाधिकं शिवे एवं पू
र्वोक्तनीत्यात्र प्रवेशादिगोत्रशाखाद्यात्मकसंतानानियमो तेस्मिन्नस्त्वनेन शास्त्रेण किंचिद्विधीयते हेत्वादिप्रवेष्टव्यमि
त्यादिविधिः न क्रियते इत्यर्थः यतस्तत्र शिवेन साक्षादुपायः यत एव ब्रह्मशः प्राङ्गिरसीतमिति प्रकृत्यायसे नतु य
दि नाम तेत्र प्रवेशादेर्न विधिः तर्हि तस्य निषेध एव पर्यवस्येदित्याशंक्याह न तस्य च निषेधो यत्तत्तस्य न खंडनं
यथा स्यात्तत्तेत्रादिप्रवेशादिविध्यात्मनः यत्त तस्य न खंडनम् तदपेक्षयाहि बहिः हेत्वाद्येव नास्तीति कुत्र प्रवेशा
द्यपि भवेदिति तद्विषयोऽयं विधिः निषेधो वा क्रियमाणो हि विकल्पमात्रप्रतिष्ठानात्मस्वरूपखंडनायालमिति भा
वः अत आह विश्वात्मनो हि नाथस्य स्वस्मिन्रूपे विकल्पितौ विधिनिषेधौ वा शक्तौ न स्वरूपस्य खंडने अत एव चात्र
मेवं सर्वं विहितं प्रतिषिद्धं चेत्यर्थगाभीकारोऽत्र कैवाग्रहः कार्य इति तात्पर्यार्थः ननु यद्येवं तत्परतत्त्वविवक्षाया
मिदमुपादेयमिदं हेयमित्येवमपास्य याणीयोविभागः कथं सिद्ध्येदित्याशंक्याह परतत्त्वप्रवेशे तु यमेव निकटं
यदा उपायं वेत्ति स ग्राह्यस्तदा त्याज्योऽथवा कचित् न यंत्रणात्र कार्येति प्रोक्तं श्रीत्रिकशासने इत्थंपर्यंतमं प्रविवित्त १५५

णयोगिनावत्तत्तावस्थेतः स्थिरीकार्यमितिनास्तिविमतिः ननुपुनरर्थएवयदाक्वचिन्निकटेदृष्टपाकक्रमेणसहसै
वपरस्वरूपापत्तिनियमतयासन्निकृष्टतयायःपरित्याज्यते सएवतत्तदाप्राप्तिप्रयत्नात्याज्योनपुनरिदमुपादेयमेवे
दंत्याज्यमेवेत्येवमात्मायंत्रणात्रकार्या तेनविषयासंबेधिकदाचित्परतन्त्रतावशेनभवेत् क्वचिदित्येनेनचस
न्निकृष्टत्वमसन्निकृष्टत्वंचोपायानांनप्रतिनियतमितिप्रकाशितं अनेनचकिंवेतदित्याकांक्षायांतात्पर्यतोव्या
ख्यातः नन्वेवमप्यर्थकथनेनकिंप्रमाणमित्याशंक्याहृ इतिश्रोतोश्रीरामपंचकेइति ननुतमेवश्लोकंपठतिसम
तासर्वदेहानामोवलीमंत्रवर्णयोः आगमानांगतीनांचसर्वंशिवमयंयमः ओवल्योबोधादयः षड्स्थष्ठादि
भेदभिन्नाज्ञानसंततयः गतीनांभावद्दृत्तिरूपभूमिकादिरूपाणांप्रकाराणामित्यर्थः अत्रहेतुःसर्वंशिवमयं
यतः यदुक्तं समन्तात्सर्वभावानांवृत्तीनांचैवसर्वशः समन्तात्सर्वदृष्टीनांकृमानांचैवसर्वशः भूमिकानांचस
र्वासामोवलीनांतथैवच समन्तात्सर्वदेवीनांवर्णानांचैवसर्वशः इति नत्वकोनामसर्वंशिवमयंजानातीत्या
शंक्यमुपदेशः अतोहमित्याभिप्रायेणाह सर्वंवेत्तिमत्स्वभावेशिवतत्त्वेप्रपश्यति योमांवेत्तिमत्स्वभावमात्मत
त्वेप्रपश्यति आत्मज्ञानमेवहिशिवतत्त्वसाक्षात्कारनिमित्तमित्यभिधदत्तानात्रदर्शनांतरवदुपत्तिरित्याया
न्वेषणायायासःसाधनमित्यावेदितं नचात्रसर्वमपात्रं किंतुकश्चिदेवतीव्रतत्सश्शक्तिपातपवित्रितइत्याह के
नकीदृशमस्मैराभेदस्पृशंकृशायप्रवक्तिकोनमस्तिका भेदवीयपरमाद्वयार्चनेकोप्यसङ्गतमहेशचोदितः नं
त्वत्रासक्त्याकिंस्यादित्याह अस्मिंश्चयोगेविश्रांतिंकुर्वतांभवडंबरः हिमानीवमहाग्रीष्मेस्वयमेवविलीयते अत्र

श्री॰ तं॰ लो॰ १५६ 156

वसामान्येनोपक्रान्तमधिकारिणमुपसंहरन्भेदेनानिर्दिष्टमाह अलंवातिप्रसंगेनभूयसातिप्रपंचिते योगेनाभिनवगु॰
प्तोस्मिन्कोपियागविधौक्षमः अथवायाज्ययाजकादावेवंबहुशःक्रमतिप्रपंचितेपौनःपुन्यपरीक्षणलक्षणेना
तिप्रसंगेनालं यतोस्मिन्ननंतरोक्तस्वरूपेयागविधौअभिनोग्राह्यग्राहकात्मनेतभेदसंभिन्नेजगतिनवरवेयोग
वोनवच्छिन्नत्वेनकर्तृत्वात्मकगुणपरामर्शीनवगुपः स्वात्मतत्त्वः तेनयुमोमायाख्योमोहस्तघितेपिपरिवर्तमानस
वीत्मयमयनिजविभवात्‌एवचकोप्यलौकिकोयंचैवंविधौयामेवंग्रंथकारोत्रयुक्तइत्यर्थः एतदेवश्लोकस्यार्थ
घमार्थेनोपसंहरति इत्यनुत्तरपदप्रविकासेशाक्तोपायिकमयविविक्तम्‌ अथैतेनाह्निकशास्त्रार्थस्तावि
कइतिप्रकाशितम्‌ इतिशिवम्‌ इतिश्रीतंत्रालोकविवेकेशाक्तोपायप्रकाशनंनामचतुर्थमाह्निकम्‌ ॥
ॐनमःशिवाय ॐयोनामघोरतिनिदोग्ध्रवशाद्दीपयत्यशेषजगत्‌ स्वनयानतरजःसजयत्यपराजितोरुद्रः ३
दानींप्राप्तावसरमाणवोपायमपरार्धेननिरूपयितुमुपक्रमते आणवेनविधिनापरधामप्रवेशनमथनिरूप्य॰
नयतत्र विधिनोद्धारादिरूपेणेत्यादिनवक्ष्यमाणमाणवोपायलक्षणं नतुशाक्तोपायेनैवसर्वसिद्धेरितिकि
मर्थमेतन्निरूपितेइत्याशंकांगर्भीकृत्याह विकल्पस्यैवसंस्कारोजातेनिश्चितियोगिति अभीष्टेवस्तुनिप्राप्तिर्नि
श्चिताभोगमोक्षयोः विरुद्धविकल्पांतरोदयाभावाद्विकल्पस्यशाक्तोपायनिरूपितनीत्याजातएवसंस्कृतमा
विकल्पस्वरूपासादनात्मनिसंस्कारेभोगमोक्षयोर्मध्यादेकतरंवस्तुनिनिश्चितानियमवतीप्राप्तिर्भवेदि
त्याह्निकोक्तमिक्रमानभणीयमेवेतितात्पर्यार्थः नत्वयद्येवंतथापिविकल्पस्यहृद्यीगतिः सहिकस्यचि १५६

उपायांतरनिरपेक्षतया स्वस्वातंत्र्यादेव संस्कृतः स्यात् कस्यचिदन्यथा तत्र पूर्वः प्रकारः शाक्तोपायेन निरूपितः इ-
तरः पुनराणवोपायेन निरूपयिष्यत इति युक्तमेवैतदाह्निकारंभे तदाह विकल्पः कस्यचित्स्वात्मस्वातंत्र्यादेव
सुस्थिरः उपायांतरसापेक्षविरहेनैव जायते कस्यचित्तु विकल्पोसौ स्वात्मसंस्कारणं प्रति उपायांतरसापेक्ष-
स्तत्रोक्तः पूर्वको विधिः पूर्वको विधिरुक्त इत्युपादानादपरो वक्ष्यत इत्यर्थसिद्धं ननु विकल्पोयथार्थावभासरूपत्वा-
न्निर्विकल्पवत्स्वसंविदात्मैवेति को नाम संस्कारः संस्कारो ह्यतिशयः स च संविदि न युज्यते इत्यकस्य नामोपायांतरं
प्रति सापेक्षत्वमनपेक्षत्वं च स्यादित्याशंक्याह विकल्पो नाम चिन्मात्रस्वभावो यद्यपि स्थितः तथापि निश्चया-
त्मासावणोः स्वातंत्र्ययोजकः यद्यप्येवं तथाप्यसौ विकल्पो नायमघटो भवतीत्यन्यापोहेन घटोयमिति निश्च-
यात्मकत्वादणोः संकुचितस्य प्रमातुः स्वातंत्र्यं योजयति विकल्प्यमानेर्थे तस्यैव स्वातंत्र्योपपत्तेः अत एव दे-
श्रत्व्यापारो विकल्प इत्युक्तं तथाहि घटादावभासेन वभातमपि घटविपर्ययं व्यवहारोपयोगितया स्वस्वातंत्र्या-
देव प्रमाता प्रतिपद्यते अन्यथा हि मायापदे परस्परपरिहारप्रतीतिं विना ग्राह्यग्राहकभावाद्यात्मा व्यवहार
एव न सिध्येत् अत एव चिदेकरूपत्वेपि विकल्पानामन्यापोहरूपत्वाद्भेदमयत्वमिति तदपसारणाय स्वात्मनि संस्का-
रमेहते यदाधानायापि किंचिदुपायमपेक्षितत्वमस्येति युक्तमुक्तं विकल्पस्य स्वात्मसंस्कारणं प्रत्युपायांत-
रसापेक्षत्वमिति संस्कारश्चास्यास्फुटत्वादिक्रमेण स्फुटतमत्वापत्तिपर्यंतपारमार्थिकस्वात्मप्रत्ययरूपनिर्वि-
कल्पकज्ञानात्मकत्वासादनं यदुक्तं प्राक् ततः स्फुटतमोदारताद्रूप्यपरिबृंहिता संविदभ्येति विमलामविक

ल्पस्वरूपतामिति तत्संस्कारा यथेते वक्ष्यमाणनीत्या ध्यानादयो बहव उपाया इति तद्भेदात्तस्याप्यानैक्यमित्याह नि
श्चयो बहुधा चैषां तत्रोपाया अभेदिनः अणुशब्देनेत्र परिकारशंतीति कविभेदनः बहुधा चैव हेतुस्तत्रोपाया अभेदि
न इति केचिद्ध्यायायाः संविदि सन्निकृष्टाः केचिच्च विप्रकृष्टाः तथा च प्राक्तं विज्ञाणपरिणतेति नीत्या बुद्ध्याय
पेक्षया तत्र प्राणस्यांतरंगत्वात्तदतस्तु ब्रारादि सन्निकृष्टं तदपेक्षया च बुद्धिगं ध्यानादि विप्रकृष्टं ततोपि देहगा
नकरणादीति एते चोपाय ग्रस्तैव संभवंति न पुनस्त्वाकार इति कृतो वगम्यत इत्याशंक्योक्तमणुशब्देनते चोक्ता इति
तेनाणुषु भेदिषु उपायेषु भवन्त्याणवः तत्र प्राणादयो नाम्रादपारमार्थिकाः तत्कथमुच्चारादि पारमार्थि
कस्वरूपलाभनिमित्तं स्यादित्याशंक्याह तत्र बुद्धौ च प्राणे च देहे चापि प्रमातरि अपारमार्थिके यस्मिन्परमार्थः
प्रकाशते प्रमातरीति बुद्ध्यादौ सर्वत्रैव योज्यम् अपारमार्थिक इति बुद्ध्यादेर्वस्तुतो विषयरूपत्वेपि तथाप्रविक
ल्पनात् तत्रयं देवप्रश्नितं तं नदेवात्तरीत्ता तमिति किमेतदित्याशंक्याह यतः प्रकाशभिन्नात्प्राणावव्यति
रेकत्वत् एवं चिदव्यतिरेकात्प्राणादीनामपि पारमार्थिकत्वमेवेति भावः यदभिप्रायेणैव यथार्थस्थितिः प्रा
णपुर्यष्टकनिर्यं विजे जीवनिरुद्धात्तत्रापि परमात्मनि संस्थितेत्याद्युक्तम् तत्र प्राणादेर्नीलादेश्च चिद
व्यतिरेकात्तल्यमनेन पारमार्थिकत्वं नास्त्य चाविदस्माकं विमतिः किंतु मायायदेष्प्राणादेर्जाड्यापि कथं चिदसं
गच्छत इत्याशंक्याह तस्यैव तत्स्वतंत्रत्वाद्विगुणं जडश्चिद्वपुः तच्छब्देहितो यत्तत्स्यैव चिन्मात्रात्मनः प्रकाशस्य स्वा
तंत्र्यादर्थात्प्राणादि जडं चिद्रूपत्वाद्विगुणं जडं च चिन्मलत्वाणगुणद्वययोगीत्यर्थः परमेश्वरस्य वशिमायीयस॰ १५७

षीचिकीर्षायां स्वस्वातंत्र्येण बहिरवभासितभावराशिमध्यात्कांश्चिज्जडानपि प्राणादीन् स्वगताहंतात्मककर्तृता
भिषेकेन ग्राहकीभावयति कांश्चिदपि शब्दादीनि देहतापात्रतयाचिद्रूपतया क्रमेण ग्राह्यतामापादयति तेन
प्राणादीनां जडत्वेऽपि परमेश्वरस्वातंत्र्यादेव चित्त्वमिति न केवलमेतद्युक्तित एव सिद्धं यावदागमतोऽपीत्याह
उक्तं चैराशिरसे चैतन्ये वैशार्थमौलिना तदेव पठति जीवः शक्तिः शिवस्यैव सर्वत्रैव स्थितापि सा स्वरूपप्र
त्ययेच्छाज्ञानस्योन्मीलनात्मना यद्यपि शिवस्यैव चिन्मात्रात्मनः परस्य प्रकाशस्य संबंधिनी परा विश्वसृ
ष्टिरूपा शक्तिः सर्वत्र जडे प्राणाद्यदावावस्थितात्तद्रूपतया परिस्फुरिता तथापि सार्थात्प्राणादिरूपाहंता
त्मककर्तृत्वेच्छाज्ञानस्योन्मीलनात्स्वस्यात्मनो रूपस्य च नीलादेरहमिदं जानामीत्येवंरूपः संजल्पितप्रमातृ
व्यापारस्वभावो विकल्पात्मा यः प्रत्ययस्तद्रूपात्पुरोऽहंप्राभासनी जीवः प्राणबुद्ध्यादिप्रमातृरूपतयाव्यप
दिश्यत इत्यर्थः तथात्र परमार्थप्रकाशानेकथमित्याशंक्याह तस्य तद्रूपता संसारस्वातंत्र्योल्लासकल्पनात्
पशोर्जडात्मनो भागं तिरोधायाह यो भवेत् तस्य जडस्य विद्धर्मणः प्राणादेर्जडरूपमेकं भागं तिरोधाय तत्रा
हंताभिमानमनुभूय स्वातंत्र्योल्लासनाद्धेतोश्चिद्रूपतामेव पारमार्थिकीं पशुपतनकृत्रिमपराहंतास्पदत्वेनाव
भवन्नद्वयो भवेत्स चिन्मात्ररूपतया परिस्फुरेदित्यर्थः तदुक्तं बुद्धौ प्राणे तथा देहे देशे या जडता स्थिता तां
तिरोधाय मेधावी संविदि प्रसयो भवेदिति एवमत्र प्राणादेर्जडोऽपि चिद्रूपत्वेन परमार्थ इत्येषो पारमार्थि
कस्वरूपलाभे निमित्तमित्युक्तं पराणदेव पदार्थान्तरेणाप्याह तत्स्वातंत्र्यमहेच्छाया दर्पणे प्रतिबिंबवत् विश्वहंति

श्री
तं॰लो॰
१५८

जं चैतन्यं निश्चिनोत्येतदात्मकं ग्रथवा यथायं लोकः मुखप्रतिबिंबमागमापायित्वाद्दर्पणातिरिक्तं निश्चिनोत्येवमसौ
योगी तत्प्राणादेः स्वस्वातंत्र्यमाहात्म्याद्धि शुद्धं वेद्यताकलंकितमत एव नाहं प्राणो न वै शरीरं न मनो नाहं मिश्रा
युक्तेरतदात्मकमप्राणादिरूपं ततोतिरिक्तं निजं स्वाभाविकमेव चिद्रूपत्वमित्येवमस्य पारमार्थिकस्वरूपलाभो
भवेदिति न तु यथा दर्पणातिरेकेण प्रतिबिंबस्य सत्तावास्ति एवं संविदतिरेकेणापि प्रमातृप्रमेयाद्यात्मा
नो विश्ववैचित्र्यस्येति प्राङ्निर्णीतं तत्कथमिहान्यथोच्यते इत्याशंक्याह बुद्धिप्राणादितोभिन्नं चैतन्यं निश्चितं बलात्
सत्यतस्तदभिन्नं स्यान्न स्यादन्योन्यविभेदतः बुद्ध्यादिभ्यो बलादनुपपत्त्या न क्रमेण भिन्नमतिरिक्तं निश्चितमपि चैत
न्यवस्तु तदतिरिक्तमेव भवेद्यतस्तस्य बुद्ध्यादेरेव परस्परमस्ति भेदः प्रातिबिंबिकेन प्रतिनियतेन रूपेण चेत्य
मानत्वात् चैतन्यं पुनर्बुद्ध्यायतनस्फूर्तमेव भायात् अन्यथा हि बुद्ध्यादीनां चेत्यमानत्वमेव न स्यात् नन्वेकमेव चै
तन्यं कथमनंतबुद्ध्यादिरूपाविभिन्नं भवेदित्याशंक्याह विश्वरूपाविभेदित्वं शुद्धत्वादेव जायते तिष्ठन्नेकस्फु
रन्मूर्तिर्मूर्तं तदविरोधतः इह खलु परप्रकाशात्मनश्चैतन्यस्य शुद्धत्वात् प्रतिनियतस्वाकारकलंकितत्वेना
नवभासनात् स्वप्रकाशमात्रलक्षणान्नैर्मल्यातिशयाद्धि सर्वैर्निखिलैर्बुद्ध्यादिभिराकारैरविभेदित्वं जायत ए
व न जायत इत्यर्थः एतादेव हि नामास्य शुद्धत्वं यद्दर्पणादिवत्तत्तदनेकाकारधारितया प्रस्फुरतीति न चैवं
विरोधः कश्चिद्यतोनिष्ठितो देशकालादिसंकोचो वानेयत्तेन प्राप्तप्रतिष्ठानादत एवैकास्यतो आहृतत्वान्निःस्व
हायास्वतेति तथात्वेन भासमानानामूर्तिर्यस्य तस्य बुद्ध्यादेर्मूर्तत्वं तदेव प्राणादि संबंधिना विरोधो मूर्तत्वमूर्तता १५८

158

रानुप्रवेशाद्येभ्यात् वर्त्तमानावभासानां भावानामवभासनं अंतःस्थितवतामेव घटते बहिरात्मनीत्यादिना।
त्याप्रमातैकात्म्येनावस्थितानामेव भावानां बहिरवभासनं भवेदिति सर्वं चैवोपपादितं तद्बुद्ध्यादेरपि प्रमातृ
रेणावस्थितानामेवार्थानां किं बहिरवभासनं भवेन्नवेत्याशंक्याह अंतःसंविदितत्सर्वं यद्यप्यपरथापि पि
प्राणदेहेघवाकस्मात् क्रामेकेनवाकथं तथा यदि निर्विकल्पेऽस्मिन्विकल्पो नास्ति तेन विना दृष्टमप्यदृष्टकल्पन्ते
विकल्पेन न तु निश्चयः यद्यपि संविदंतरैकात्म्येन सर्वमिदं भावजातं संभवेदन्यथा बुद्ध्यादौ प्रमातरि सर्वमि
दं भावजातं संभवेदन्यथा बुद्ध्यादौ प्रमातरि सर्वमिदं कस्मात् संविदन्ति विकात्मकत्वात्स्वेन स्वातंत्र्यव्यति
रिक्तेन हेतुना कथं केन वा हेतुदेहादिपरामर्शातिरिक्तेन प्रकारेण संक्रामेत् प्रतिबिंबकल्पतयावभासे
तेत्यर्थः अन्यथा हि बुद्ध्यादेरपि तन्मदर्थावभासो न भवेदिति भावः तथाप्यस्मिन् बुद्ध्यादौ प्रमातरि तस्यो नि
र्विकल्पदशायामेवाखरोभावः पर्यायपर्यायात् युक्तयुक्त्या सर्वविभेदावभासात्मनि निर्विकल्पं तत्तथा विना
निश्चायको विकल्पो नास्ति येन सर्वमेवाविभेदेनावभासनं स्यात् यतो दृष्टमप्यदृष्टमेव स्यादित्यतया वि
कल्पमंतरेण दृष्टमप्यदृष्टकल्पत्वं यथैव नदृष्टं तथैव न प्रश्रुतमित्यर्थः तदशक्त्यादिहेतौ यतो विकल्पेनैव दमित्थमि
त्येवमात्मा निश्चयः स्यात् स च विकल्पः संकुचितस्य प्रमातुर्व्यापारः तं प्रशोषिका यामेदेमैवनिश्चिनुयान्नत्व
भेदेनेति नास्ति बुद्ध्यादीनां सर्वभावाविभेदेनावभासः इति युक्तमुक्तं तस्यान्योन्यविभेदनः इति ननु एवं बुद्ध्यादे
रपरमार्थिकत्वेऽपि ख्यातादिद्वारेण यथा परमार्थप्रकाशने निमित्तत्वमुक्तं तथास्त्वन्यस्यापि कथं नेत्याशंक्या

श्री
तं.लो.
१५९

159

ह बुद्धिप्राणशरीरेषु पारमेश्वर्यमेजस्रा विकल्प्यमनृतरूपेण प्रमातरि विकल्पने इहाबलबुद्ध्यादौ प्रमातरि ह्यहंतास्य
देवाज्ञानकर्तृत्वलक्षणं पारमेश्वर्यमजस्रा विकल्पेन तत्तदवच्छेदशून्यस्फुटं ह्यता निश्चयं येन तद्धृते ध्यानादि पारमा
र्थिकस्वरूपलाभनिमित्तं स्यात् शून्यरूपे पुनः प्रमातरि वस्तुतः संभवेपि पारमेश्वर्यस्य नियतावच्छेदायोगान्न वि
कल्पयितुमेव शक्यमिति कथं नामास्य परमार्थप्रकाशने निमित्तत्वं भवेत् एवं बुद्ध्यादीनां त्रयाणामेवात्र नि
मित्तत्वमित्युक्तं स्यात् नन्वेषां बुद्ध्यादीनां किं नाम तदस्ति यदवलंबेनापि पारमार्थिकस्वरूपलाभो भवेदित्या
शंक्याह बुद्धिर्ध्यानमयी तत्र प्राण उच्चारणात्मकः ध्यानमयीति प्रकृतसंध्यानप्राधान्यात् उच्चारणेलत्तयति
उच्चारणं च प्राणाद्याख्यानोक्ताः पंचवृत्तयः पंचेति यदुक्तं प्राणोपानः समानश्च उदानो व्यान एव चेति ननु द्वि
धा प्राणीया वृत्तिरस्ति यदेका पंचानामपि प्राणादीनां भिन्नभूता सामान्यप्राणीया परा च विशिष्टप्राणात्
मिकेति तत्र पंचवृत्तय उच्चारणमिति कथमुक्तमित्याशंक्याह आद्यात्र प्राणनाभिख्या परोच्चारात्मिका भवेत्
प्राणनाभिख्या परोच्चारात्मिका भवेत् प्राणनाभिख्येति आंतरोद्योगरूपा जीवापरपर्याया प्राणनामात्र
स्वभावस्त्वर्थः यदुक्तम् इयं सा प्राणनाशक्तिरांतरोद्योगदोहदा स्पंदः स्फुरत्ता विश्रांतिर्जीवो हृत्प्रतिभा
मतिः सा प्राणवृत्तिः प्राणाद्यै रूपैः पंचभिरात्मसात् देहे यत्करोत्येषा संवित्पूर्णस्तेनैष भासते इति तदर्थवि
शिष्टा एव प्राणादिवृत्तयो विवक्षिता इति युक्तमुक्तं पंचवृत्तय उच्चारणमिति एतत्स्वरूपं च पुरस्ताद्भविष्यती
तिनेहायस्तं एवं बुद्धिप्राणयोरसाधारणं रूपमभिधाय शरीरस्याप्यभिधत्ते शरीरस्यात्तविषयैतत्पिंडाभवेत्। १५९

संस्थितिः ग्रहणानीन्द्रियाणि विषयाः कार्याणि यत्र प्राणादयस्तेषां पिंडत्वेनैकीभावेन संस्थितिर्नाम देहः प्रमातृ
रसाधारणंरूपमित्यर्थः इदानीमधिकारिणि रूपणानेन तत्र ध्यानादेः स्वरूपं वक्तुमुपक्रमते तत्र ध्यानमयेनाव
ष्टेनेतरसिहोच्यते तदेवं बहूपायसाध्यत्वेपि ध्यानं प्रकृते मूलकारणं यस्यैवंविधमनेन तत्र पारमार्थिकं रूपमि
होच्यते सोऽप्यत्र प्राधान्येन स्वरूपमभिधीयत इत्यर्थः अतएव तावत्कक्ष्याक्रमयोगेन कः ग्रन्थोद्देशे हि बुद्धिध्यानमित्यु
युपक्रमः तदाह यतः प्रकाशात्मत्वेनैवायं चिन्मयभावो हृदि स्थितः सर्वतत्त्वमयः प्रोक्तमेतत्त्रिशिरोमते योयं
चिन्मयभावोकादिप्रकाशलक्षणेन तत्र एव स्वप्रकाशत्वात्त्वेनैवं सर्वतत्त्वमयस्तद्रूपतया परिस्फुरन्प्रका
शाद्धृदिस्वपरामर्शसारे देहे सर्वमिदं देहं यद्यपि व्याप्य संस्थितः तथाप्यस्य परं स्थानं हृत्पंकजसमुद्गकमित्या
दिनीत्याह हृदयेवस्थितस्तत्त्वेवतत्त्वविदां साक्षात्कार्य इत्यर्थः ननु तत्र किं प्रमाणमित्युक्तं यतस्त्रिशिरोमते
प्रोक्तमिति तत्रैव ग्रंथं पठति कदलीसंपुटाकारं सबाह्याभ्यंतरान्तरं ईदृशे हृदयान्तःस्थं तत्सूक्ष्ममिव तत्त्ववित
इह स्वल्पात्मत्वेनास्य प्रकाशात्परं ब्रह्मानंदातिशयदायितया परमोपादेयत्वेन प्रख्यामिव हृदि ध्येयो
मनीषिणामित्याह तस्या हृदयान्तःस्थमीदृशं साक्षात्कार्यमित्यर्थः यतस्तत्कदल्याद्योः संपुटः परस्परमंत
र्बहीरूपतया मिलितानां संनिवेशस्तद्वदेतत्प्राणत्वेनावस्थितेर्भूततत्त्वाद्येन्द्रियादिभिस्तत्त्वैः संवलित आ
कारो यस्य तत् न एव बाह्यं साधारणं तत्त्वजातमाभ्यंतरं चासाधारणं तयोः साकल्यं सबाह्याभ्यंतरं तस्यान्तरं
परप्रमात्रैकरूपमित्यर्थः इदमुक्तं भवति यथा कश्चित्कदल्या बाह्यस्थितिः साचलमयास्पशोनैः शनैरांतरमांत

160

श्मादयात्तः पर्यंतेय परमोपादेयं तथा सा यस्तेनतथैवतत्तद्विहाय शरीरं तत्तज्ज्ञानेन परित्यज्य हृदयांतः परिस्फुरंतं स्वात्मा॰
नं साक्षात्कुर्यादिति तत्त्वात्मनः सर्वदेहव्यापकस्यापि कथं हृदय एव साक्षात्कारो भवेदित्याशंक्याह सोमसूर्या॰
ग्निसंघट्टं तत्र ध्यायेदनन्यधीः यतस्तत्र हृदये सावधानो योगी प्राणापानोदानात्मनां सोमसूर्याग्नीनां सं॰
घट्टं ध्यायेत् ॐ भकारहंसाउन्मीलनमंत्रसंघट्टध्यायादित्यर्थः ननु तत्रैवं प्रतिध्यायतः किं फलमित्याशंक्याह तडि॰
नारणिसंक्षोभान्महाभैरवहृदयस्य हृदयाब्जे महाकंदे ज्वलत्स्फीततां व्रजेत् तन्मात्मनेन तरो ॐ सोमसूर्या
ग्निसंघट्टात्मयज्ञानेन देवारणिस्तस्याः सम्यक् प्राणापानगतिं ग्रोटनेन निर्विकल्पतयामथ्यमानाया प्रवे॰
शात्मायः क्षोभस्तेनोद्दीप्तस्तत् ॐ डे पारमित्यतितिरस्कारेण स्फुर्थज्वलन्महाभैरवाग्निः स्फीततां व्रजेत्
पिष्टात्वात् एतद्धि व्यवहारमात्रं यदतः सत्त्वा कार्यत्वमिति वस्तुतो हि वीजे सत्यंकुरश्चेदस्ति जदसौ सर्वदैव सत्त्वा
न्नो येन कदाचिदसत्त्वं स्यात् यतश्च सर्वदास्य सत्त्वेन कदाचिदन्यथात्वेन योगः अन्यथात्वे हि प्रकिंचिद्रूपत्वस्वच्य
तेकस्तेनयोगार्थः तथात्वे वा किं नामास्य स्वरूपमधिकं स्यात् यद्वशादसद्व्यवहारपात्रत्वमपुदियात् न च बीजा
पेक्षसत्ता स्वभावोंकुर इति वाच्यं सर्वभावानां स्वस्वरूपमात्रपरिनिष्ठानादन्यसापेक्षस्वभावत्वानुपपत्तेः
यद्यपि चासत्त्वात्मन किंचिद्वस्तु तथाप्येतच्छशविषाणवदसत्कल्पनाविषयस्यांतःकरणाधिपतित्वस्य परिस्फु
रतः स्वभावस्य संभवाद्वाह्येंद्रियविषयतापत्तेन सत्स्वभावेन सह विरुद्धा तथैवेति युक्तमुक्तं असतः सत्त्वे विरुद्धमि
ति अथ सदेव तर्ह्यस्य किमुपयाचनीयं यद्वीजादेः प्रार्थ्येत अथाभिव्यक्तिनियतित्वादीनि चेत् तत्रापि सदस
द्रूपत्वायायोगपर्यनुयोगावकाशत्वात् न च तदुभयात्मकम् उभयात्मकमनिर्वाच्यं वा युज्यते विरुद्धत्वादेव स्वभावस्या
तत्सर्वदा लोकप्रसिद्धः कार्यकारणभावोनुपपद्यते इति सर्व एव व्यवहारः समुत्सीदेत् तेन कार्यकारणभावस
मार्थ्यावलात् कर्तृकर्मभाव एवाश्रयणीयो यत् कार्यमाभासनक्रियाविषयतात्मकमेव कार्यत्वं तत्तदंकुराद्यवभा
स्यते तेन कर्ता तत्समर्थाचरणेनेति करणमपि कर्तर्येव विश्रांतं तत्साक्षिद्रूप एव परमेश्वरः स्वेच्छावशादिय हि
त्प्रमवभासयति किं तु नियतिदशायां प्रयोतव्यवस्थानेन बीजादेरंकुरो न तु दोषद इत्येव मायात्मिका लोकस्य प्र

तीति ननु एवं सोऽपि किं सदसद्वा विषमवभासयेदित्युक्तप्रश्नदोषः नेह सत्त्वं तत्त्वग्राह्यत्वं वा ग्राहकत्वभेदाद्वि यार्थः परि
स्फुरेत् तथा हि सर्वस्य प्रमातर्मनोगोचरत्वानुपपत्तेरपि पूर्वं स्वसंविदैकात्म्येन परिस्फुरतोऽर्थस्यान्तरत्वमन्तःकर
णैकवेद्यतया सुखादेरिव ग्राह्यत्वमपि अन्तर्बहिष्करणद्वयवेद्यतया घटादेरिव बाह्यत्वमपीति संविदात्मन्यव
स्थितस्य चार्थस्य बहिरवभासनमन्यत्र वक्ष्यते तदुक्तं स्वामिनश्चात्मसंस्थस्य भावजातस्य भासनं अस्त्येव न
विना तस्मादिच्छामर्शः प्रवर्तत इति तदेवमेव कार्यकारणभावो यदेतत्कः परिस्फुरत एवार्थस्यान्तर्बहिष्का
रोभयवेद्यत्वभासनमिति यदुक्तं यदसत्तदसद्युक्ता नासत्ता सत्स्वभावता सतोऽपि न पुनः सत्तालाभेनार्थोऽथ चो
च्यते कार्यकारणता लोके सान्तर्विपरिवर्तिनः उभयेन्द्रियवेद्यत्वं तस्य कस्यापि शक्तितः इति न चान्तरवस्थितस्या
र्थस्य बहिरवभासनेनामात्रमपूर्वं किंचिदपि तत्त्वभेदात्तिमात्रमिति न किंचिद्दोषः ततश्च युक्तमुक्तं स्वात्मश्रीभाक
रः शिवः सर्वभावानां वस्तुतः कर्तेति ननु तस्यैव बीजांकुरादौ कुलालादौ च नायं हेतुभावः न च हि दृश्यत एव कुंभ
कारः कर्तेति किमदृष्टेन कर्त्रन्तरेण परिकल्पितेनेत्याशंक्याह प्रसक्तस्यास्य कर्तृत्वे न हि ज्ञातृत्वमुपपद्यते कुंभकारो हि न
स्वेच्छामात्रेण घटं जनयेदपि तु मृदाद्यपेक्षः न चाचेतना मृदादयः तदिच्छामनुरोध्येरन् एवं हि घटदर्शने
च्छामनुरोध्येरन् ततश्चास्य मृदादिसंस्काराधानमात्र एवोपयोगः तथा चेहितस्यैव मृदादिभ्योऽधिकयत्नकी
र्तितं च दादि तदिदानीं चित्तस्थि परिस्फुरेत् न च तावतैव घटादेः कार्यस्य बहिरवभासः ततश्च परमेव शिवस्ये
च्छया नियतिदशायां कुंभकारस्य मृदादेश्च परस्परापेक्षतया कार्यमुपजनयेत् यत्तु तस्य सत्यपि मृत्पिंडादौ स

श्री॰
तं॰ लो॰
५९

59

येदंकृतमित्यभिमानः सोपि तत्कादाचित्कत्वे तस्य सर्वप्रकारादेव भविष्यतीति नेहायस्ते तस्माद्युक्तमुक्तमस्वतंत्रस्य कर्तृत्वेनैक
दाविदप्युपपन्नमिति सहि कुंभकारादिजडे शरीरादौ गृहीताभिमानइतिकथं स्वरूपविकृतजडे स्वातंत्र्यमभ्युपगच्छेत् त
द्धि चिदेकगामीति व्यापकविरुद्धोपलब्धि अत आह स्वतंत्रता च चिन्मात्रवपुषः परमेशितुः चोह्यर्थे न तु लोके शास्त्रे
च जडस्यापि स्वतंत्रात्मककर्तृत्वमभ्युपेयते तथा च काष्ठानि ज्वलंतिप्रयाने चरणान्कृतमिति तत्किमेतदुक्तं जडस्या
तंत्र्यं नोपपन्नमितीत्याशंक्याह स्वातंत्र्यं च जडं चेतिति तदन्योन्यं विरुध्यते स्वातंत्र्यं हि स्वप्रकाशात्मत्वमुच्यते जाड्यं च परप्रका
शत्वमुच्यते न चानयोस्तादात्म्यं संसर्गो वा भवेदित्युक्तं तदन्योन्यं विरुध्यत इति अत एव तज्जडं वस्तु स्वे वित्तिविशिष्टत्वान्न
ह्यवस्थया स्वात्मसिद्धावपि परं स्वप्रकाशात्मकं प्रमातारमपेक्षत इति स्वातंत्र्यं कथं जडस्य स्वरूपसन्निविष्टं स्यात् न वा
हु जाड्यं प्रमातृतेवत्वं स्वात्मसिद्धिमपि प्रति यत्तु लोके शास्त्रे वा जडस्याकर्तृत्वं तत्स्वतंत्राधिष्ठानादिना वोपचरितम
यं ननु माभूत्कर्तृत्वं कारणत्वमेव भविष्यति यत्त ` ` एतज्जडाजडयोरपि संगतिमियादित्याशंक्याह न कर्तृता हेतुता वा
स्य कारणत्वं हि लभ्यते स्यादेवं यद्यर्थस्य बाह्यत्वाभासनादन्यत्कार्यत्वं भवेत् यावता तदाभासत्वादन्यत्कार्यत्वं
भवेत् मानस्यार्थस्य तथारूपापरित्यागे नैव बहिराभासनं नाम कार्यत्वं ततश्च यदपेक्षयैवांतरवस्थितोर्थस्तद
पेक्षयैवांतरवस्थितो बहिर्भवेत् प्रमातुरेव चांतःस्थितोयमिति तत एव च बहिर्भावात्राप्यत इति स एव चाप्युदासोका
र्यकारणं न तु जडं मृदादि तदपेक्षयास्य बहिराभासाभावात् प्रमातुश्च न कर्तृतादन्यत्कारणत्वमिति युक्तमु
क्तं कर्तृत्वमात्रसतत्त्वं जडस्य कारणत्वं तत्र युज्यत इति नन्वेवंविधो भावस्वभाव एव यदस्मिन्सतीदं भवतीति कथं

स्यात्‌ नच भूताकाराभावं नर्मतरेण स्य किंचित्कार्यकारणभावः यद्धर्मालंकारः भाव एव परस्येह कार्यताभाव इति।
स्वभावो जनकोर्थो नाम भूताकारभावक इति च न च स्वभावमन्तरेण भावानामन्यत्किंचिदपेक्षणीयमिति किम
ञ्चेतनानुप्रवेशेनेत्याशंक्याह तस्मिन्सतीति हि तद्भाव इति पेहैकजीविते निरपेक्षेषु भावेषु स्यात्तन्निष्टतया कथं
वेदानां हि नैकस्यैव भावस्य कार्यकारणभावो नापि द्वयोर्यौगपद्येन घटवत्‌ नच क्रमिकत्वेप्यनैयत्येन नीलपी।
तादिज्ञानवत्‌ नच नियमक्रमिकत्वेपि पूर्वभाविकार्यपश्चाद्भाविकारणं अपितु नियतपूर्वभावे कारणं नियत
परभावे कार्यमित्युक्तं तस्मिन्कारणाभिमते वीजादावेव सति कार्याभिमतस्यांकुरादेरेवाभूत्पूर्वं तथा स्वरूपभाव
इति नियमश्चावयस्य च भावेन भावलक्षणमिति समस्यातिप्रायः यदन्यस्मिन्सत्यभवन्नस्मिन्नेव सति भवतीति स्या
देतद्देवदत्तज्ञानं यदि नियमो न भवेत्सति घटे धूमोपि न स्यात्‌ किंतन्नैतद्यथेनेति नियमोह्यनपेक्ष्यापेक्ष जीवितेत्सा
वजज्ञानो न संभवति तेहि स्वात्ममात्रपरिनिष्टत्वादन्योन्यवार्तानभिज्ञा इति कस्मिन्सति किं स्यात्‌ नन्वग्निधूमावे
वतथापरिदृश्यमानाववन्योन्यात्मतामनासादयंतावप्यन्यथाभवंतौ नियतावित्युच्येते न तन्नियमेनासापरः क
श्चित्पदार्थयोनयोरन्योन्यापेक्षां प्रसंजयेत्‌ तदनेन यमेव नियमो यत्तस्य पश्चाद्धूमस्तस्य पूर्वमेव यत्ततः पूर्वं
नानग्निरित्यनयोः स्वात्ममात्रपर्यवसितं अनन्यस्पर्शितया विशिष्टं रूपमेव कारणताकार्यता चेति न कश्चिदपेक्षा।
र्थः अत्रोच्यते एवं हि दर्शनमात्रमेव प्रमाणीकृतं स्यात्‌ यत्स्वरूपेणाग्नेरपि पश्चाद्धूम एव प्रतीयते नाधूमस्तस्यापि पू
र्वमग्निरेव नानग्निरिति न च दृश्यमानपेक्षादर्शनमात्रादेवार्थतथात्वव्यवस्था न्याय्यत्यनयोः स्वरूपसन्निष्टः कश्चि

श्री॰
ने॰ लो॰
९०

60

विशेषोभ्युपगमनीयोयोस्मिन्भूमेतयानियमयेत् अन्यथाग्नेः पश्चाद्भमपवनापरः सनाग्नेः स्वरूपातिशयोनापियोधू
मात्पूर्वमग्निरेवनापरः सधूमस्तेनिकयमेवंभावोभवेत् नहिपरः परस्यस्वरूपमितिशाययतिनचवह्निशोपिदेव
योगास्यरूपेण चदादस्तेनतंपदोदृष्टइतितयोः परस्परयोः निरपेक्षयोरपिकार्यकारणभावेयद्धदिताः कृत्तिकास
नियमेनरोहिण्युदयइतिप्रथमकृत्तिकाभ्योरोहिणीनामभूतपूर्वंतयानोदयः पूर्वदिनेषुतथादृष्टत्वादितिचेन्नैतत्।
द्विधूमेपिसमानंयतस्यापिपूर्वदिनेषुवह्निनैरंतर्येणोदयोदृष्टइति नचपूर्वकस्यसामर्थ्यात्परस्यभावःकार्यकार
णभावःसचकृत्तिकारोहिण्युदययोःसंभवति एवावयवंहिनत्तत्रचक्रंयुगपदेवनित्यप्रवहद्वस्थितेकिंतत्र
टीयेत्रवक्रमेणपरिवर्तमानेदृश्यन्तेयेनायमनयोः पूर्वापरत्वेनावसायोनतत्स्वरूपसन्निविष्टःकश्चिद्विशेषः
नत्विदंहिनामभवेत्कुत्र पूर्वसामर्थ्यमीयतेयत्तदभावादस्ततोपिपरस्तस्मिन्क्षणेभवन्दृश्यते यद्धर्मालंकारः
तत्रसामर्थ्यंहितस्यजनकत्वं तच्चयदितस्मिन्क्षणेनभवतिकथंनामतत्सामर्थ्यमथभवतिकथमसामर्थ्यस्या
दितिद्वैकाल्यपरीक्षापिप्रथ्यचप्रागसद्भावःकारणेसतिदृश्यतेइतितत्रापिसमानंयत्कृत्तिकोदयात्पूर्वमभ
वन्नपिरोहिण्युदयस्तस्मिन्क्षणेभवन्दृश्यतइतितत्सर्वथासमानेपिविधौकृत्तिकारोहिण्युदययोःकार्यका
णभावोनास्तिधूमाग्न्योस्त्वस्तीतिनिर्निबंधनःकथमसौविभागःश्रद्धातव्यःस्यात् तस्मात्कार्यकारणयोःस्वरू
पसन्निविष्टःकिंचिज्ज्ञायतेभ्युपगमनीयंयस्यान्वयव्यतिरेकोस्यात्तोज्ञापकेनहिसर्वत्रवस्तुनिसंभवेदेवरूपं
ज्ञापतेनान्यथामतथाहिवाभोक्तिःस्यादितिनवक्तुनापितेभवेत् नचतदपेक्षाम॰॰ हायान्यत्किंचिद्भवितम।

९

इति सा च द्विविधान्योन्यानुषंगितात्त्विकाभिप्रायात्त्विका चानयोरुभय्यापि सा कार्यकारणतया संमतानां जडानां सं
भवति अन्योन्यानुषंगिता हि द्वयोरर्थयोः परस्परद्रूपतादात्म्योस्पयो विवक्षायामेकात्म्ये एकतरापाये पुनः पु
नः परस्य सत्त्वैव न स्यात्तदभावे वा धूमस्त्विति भ्रवत्स्वविरोधः स्यात् द्वितीया चानुसंधानरूपा यथा भोक्तरत्ने प्रति भो
क्तारत्ने प्रतिसाहेयोपि अनानुषंगितत्या न प्रतीयते किंतु तदस्य संविघभिन्नत्वीभावमेतियेनायं तदभिलाषा।
यात्मनानुसंधानेन तत्र प्रवर्तते न चैवं कार्यकारणयोः संभवति तयोर्जन्यजनकत्वात्परस्य स्वरूपमनुसंधातुसामर्थ्या
त् तत्सर्वथा जडानां किं विजातीयं विना कार्यकारणभावो नोपपन्न इत्येव स्थितं ननु कमेवात्र जातीयं यत्कारण
स्य पूर्वत्वं कार्यस्य च परत्वमिति पूर्वसत्ताप्रयोजकीकारेण हि परस्यापूर्वं तथासत्ताविर्भावः अत एव न भविष्य
द्वर्तमानयोस्तदाविर्भावे न सामर्थ्यं तावत्तत्रेणापि तस्याभावात् पूर्वस्य हि प्रागेवासत्त्वात्तदाविर्भावे न सामर्थ्यं न।
भविष्यतस्तदानीं तस्या किंचिद्रूपत्वात् वर्तमानश्च समानकालत्वात् समानकालत्वे च सव्येतराकयोर्भव
ति न च तदानयोः किंचित्कर्तव्यमवशिष्यते यदेकस्यान्येन क्रियेतेति पौर्वापर्यमात्रमेव कार्यकारणयोर्जाती
यमित्याह मपूर्वमथ पश्चात्स इति चेत्पूर्वपश्चिमौ स्वभावेन तिरिक्तौ चेत्स्मरत्यवशिष्यते ननु अनयोः पूर्वत्वप
रत्वे च किं स्वभावादतिरिक्तमनतिरिक्तं वा तत्र नाद्यः पक्षः न हि भवद्भिः हे पूर्वत्वाद्यपि किंचिद्वस्तु सदस्ति यत्तद
तिरेकेण सत्ता मियात् व्यवहारमात्रसिद्धत्वेवात्तस्य कार्यकारणभावोप्येवं स्यादिति स्वसिद्धान्तभंगः कार्यका
रणभावस्य वस्तुस्वभावेनाभ्युपगमात् यद्धर्मालंकारः तदेव मयं वस्तुस्वभाव एव कार्यकारणभावो न तु व्यव

श्री॰
ने॰ लो॰
६१

द्वारमात्रसिद्ध इति अनतिरेकपक्षे च कार्यकारणत्वेन संमतं भावद्वयमेवावशिष्यते इति न तयोर्व्यतीतेयं किंचिदुक्तं स्या
त् न च भवद्दर्शने धूमाग्न्योर्धूमाग्निरूपतां विहायान्यः कश्चित्कार्यकारणभावात्मा विशेषः अतएव चात्राभ्युच्चय
बुद्धिनिर्ग्राह्यत्वमुक्तं यत्र केवलं प्रथममग्निर्धूमो वा यावत्कारणमपि कार्यमपीति नन्वेवं वदद्भिर्भवद्भिरनन्तरमेव
धूमाग्निरूपतया अन्यत्कारणत्वं कार्यत्वं चोक्तं तथा हि यद्यग्नित्वमेव कारणत्वं तत्प्रतीतेरग्नित्वेऽप्येकस्यार्थस्यभा
वस्य प्राप्यत्वस्य सतः स्वयं कोऽन्यो न भागोऽदृष्टः स्याद्यः प्रमाणैः परीक्ष्यते इत्याद्युक्तयुक्त्या किमिति न तत्प्रतीयाये।
नाभ्युच्चयबुद्धिनिर्ग्राह्यत्वमप्यस्य स्यात् सत्यमेवं किंतु विकल्पस्यापत्तद्दोरात्म्यं यदग्नित्वमवस्यन्न तावदेवा
वस्यति न कारणत्वमपि येनैव प्रतीतं तत्राभ्युच्चयः न तु विकल्पेन चेतसा व्यवसितं तावता कः प्रतीतं तत्राभ्युच्च।
यार्थः न हि गोः शृङ्गस्यैवमादिष्वभ्युच्चयबुद्ध्या किंचित्कार्यं यत्तद्विकल्पस्य स्वशिल्पेनैव पुनर्यदभिन्नमपि भेदय।
ति भिन्नमपि संहरतीति अथ प्रतिभासमूलमेवं विकल्पस्य माहात्म्यं हन्त न तथा न हि कारणत्वं कार्यत्वं वा।
सन्निवेशादिवदर्थातिशयरूपं येनानयोः प्रातिभासिकत्वं स्यात् अथ च प्रतीयमानरूपस्वभावत्वेन क्षणिकत्व
वदवस्थाप्येत इत्यत्राभ्युच्चयबुद्ध्या कार्येण ह कारस्तन्योर्थः स्यादवेद्यं वा वेदनं तद्गताकार एव धूमकारण।
तायाश्चाकारः अन्यथा हेत्वावस्थामशामोऽप्यग्निरग्निर्न स्यात् क्षणिकत्वे च योगिनोऽप्रतीयमानान्नीलरूपा
दन्यदेव पर्यवस्येत् नीलादिकं हि निहृत्य निहृत्युभयधर्मसाधारणरूपं क्षणिकत्वे पुनर्निहृत्यैकधर्मस्वभावे
यत्प्रमाणे निहृतिधर्मता हि मेतित न साक्षाद्ग्राह्याकारत्वेनाग्नित्वं धूमाद्विहितान्वयव्यतिरेकत्वेन।

कारणत्वं पंडुराद्याकारत्वं च धूमत्वमग्न्यन्वयव्यतिरेकानुविधायित्वं च कार्यत्वमिति धूमाग्निस्वरूपनातिरिक्तं कार्य-
त्वं कारणत्वं चानुक्रमसिद्धमेव अन्यथा हि कारणत्वेन संमतं भावद्वयं विशरारुतायां पर्यवस्येत् ननु भवत्वेवं न हि
कार्यकारणभावात्मकश्चित्तत्वं वैयोस्माकं विवक्षितः सर्व एव हि भावाः स्वात्ममात्रपर्यवसिता एवेत्याशंक्या-
ह बीजमंकुरश्चेत्यस्मिन्नतत्वेहेतुत्वहेतोः घटःपटश्चेति भवेत्कार्यकारणता न किं अन्यस्मिन्नतत्वे इति परस्प-
रमपेक्षाशून्येऽयमर्थः किं न भवेदिति परस्परनैरपेक्ष्यस्याविशेषादत्रापि कार्यकारणभावो भवत्विति यावत्
इह खल्वपेक्षाशून्यत्वाज्जडानां कार्यकारणभावो न भेदिष्टमुपपादितं अथ च लोके बीजादंकुरो जायत इत्ये-
वमाद्यात्मिका प्रतीतिरिति एवं रूपं केनचिद्रूपेण प्रमात्राभाव्यं यत्र व्यंशांतं मद्भावद्वयं कार्यकारणव्यपदेश-
पात्रतामासादयेत् न हि विदात्मैकैकप्रमातृविश्रांतिमंतरेणात्वं विशराराणां सिकतानामिव जडानां
भेदाभेदात्मा संश्लेषः स्यात् अत एव कर्तृकर्मभावमतत्व एव कार्यकारणभाव इति नः सिद्धांतः यदुक्तं जड-
स्य तु न सा शक्तिः सत्ता यदसतः सतः कर्तृकर्मत्वतत्त्वैव कार्यकारणतानन्तत इति ततश्च तद्युज्यते यल्लोके बी-
जो बीजादंकुरं जनयति ईश्वरस्वेच्छयावच्छादमेरैतवोद्भूममिति नन्वेवं बीजांकुरयोर्भेदे सत्येकप्रमातृविश्रां-
तिमात्रात्कारणत्वं कार्यत्वं च न सिद्ध्येत् एवं हि घटपटाभासयोरपि तादृग्रूपं स्यात् सर्वाभासानां प्रमातर्येव वि-
श्रांतेः तन्न योरैकात्म्यमेवांगीकार्यं येन कारणमेव तत्तद्रूपतया परिणमत् कार्यमित्युच्यते इत्याह बीजमंकु-
रपत्रादितया परिणमेत चेत् इहतावत्सर्व एव भावव्रातः परिनिष्ठितनिजरूप इति चेद् बीजं कथमंकुरादि

श्री॰
तं॰ लो॰
६२

62

रूपतामियादन्यथास्वभावस्यान्यथास्वभावायोगात् न हि कदाचिद्दृष्टोपि परः स्यात्तदाह अनन्यस्वभाववपुषः स्वभा
वेन युज्यते अथोच्यते बीजस्यैवायमेव स्वभावो यत्क्रमेणाङ्कुराद्यात्मनावतिष्ठत इति एकमिव हि वस्तु क्रमविवि
क्तस्वभावमिति समकार्यवादिनः अत आह स्वत एव स्वभाव इति चेत् ननु यद्येवं तद्बीजमङ्कुरो वा बीजवन्मात्र एवाङ्कुरस्व
मात्र एव वा रूपे विश्रान्तः बीजस्याबीजात्मकमङ्कुराद्यपि तं रूपं संभवेदङ्कुरस्य चाङ्कुराद्यात्मकमाद्यबीजाद्यपीति
तदाह तर्हि बीजाङ्कुरौ नित्येतावत्येव न विश्रान्तौ तदन्यान्तसंभवात् न ह्येकमेव वस्तु द्व्यात्मकं संभवेदित्यवश्यं
केनचिदेकेन भाव्यं यस्य बीजाङ्कुराद्यात्मना विविक्तोयमाकारः प्रस्फुरेत् तदाह ततश्चाविचित्रकारोसौ तावान्क।
श्चिन्नसज्यते नन्वभीष्टमेवैतदस्माकमित्याह न च युक्तोऽजडेऽन्यान्यविरुद्धाकारसंभवः न ह्येक एव घटो लोहि
तश्चालोहितश्च भवेदिति भावः स्यादेवं यदि युगपच्चित्रत्वमभ्युपगच्छेम किं तु क्रमेणेति कोविरोधार्थः अत आ
ह क्रमेण चित्राकारोस्त्वजडः किं तु विरुध्यते यस्मात्कार्यसिद्धिः परिदृश्यमानमेव भावपारीं स्वभावभूतेन क्रमे।
ण तथा तथा भवतीति एक एव सर्वाकारः क्रमविचित्रो हि तन्मतः स्वस्वरूपनिमग्नेनैव विश्वं सर्वमस्तु तत इति चेज्जड
इति अजडे हि चित्रविज्ञानादियुगपच्चित्रमपि भवेदिति भावः किं न विरुध्यत इति लोहितो हि पीतः क्रमान्निमि
त्तान्तरेणापि लोहितोपि स्यात् न च क्रमो योगपद्यं वा न वस्तुनः स्वरूपादधिकः कश्चित्क्रमः क्रमो वा भवेदि
त्येकस्मिन्वस्तुनि क्रमाभ्युपगमेपि न विरुद्धधर्माध्यासो व्युपरमेदित्याह क्रमोक्रमो वा भावस्य न स्वरूपाधिको
भवेत् तथोपलम्भमात्रेतो न स्वरूपाधिको भवेदिति न कश्चिदित्यर्थः अत्र हेतुः तथोपलम्भमात्रत्वादिति उपले

मोहि क्रमेणान्यथाभवन् क्रमाक्रमाभ्यां भावस्वरूपं व्यवहारयतीति ननूपलंभस्याप्येवंभावे किंनिमित्तमित्युक्तं उप।
लंभश्च किं तथा इह खलूपलब्धा क्रमाक्रमाभ्यामेव तत्तदर्थजातमुपलभत इति उपलंभस्यापि क्रमाक्रमयोगः
उपलब्धृस्वसंविन्मात्ररूपत्वेपि क्रमाक्रमोपलंभस्वभावत्वादेवंभावः तदेतदाशंकते उपलब्धापि विज्ञानस्वभा
वो यस्मात् सोपि हि क्रमोपलंभरूपत्वात् क्रमेणोपलभेत चेत् अत्रापि समय एव पर्यंतयोगादित्याह तस्य तर्हि क्रमः कोसौन
दन्यादुपलंभतः उपलब्धस्य हि उपलंभत्वेन क्रमाक्रमयोगादुक्तात्तस्याप्युपलब्धृत्वेनोपलब्धुः पुनरुपल
ब्ध्यंतरं नास्त्यनवस्थापत्तेः तदस्याज्ञातस्यः क्रम इत्युक्तं मदन्यादुपलंभत इति स्वभावपदाश्रयेण्यस्य नोपलब्धस्व
रूपादधिकं पर्यवस्येदित्याह स्वभाव इति चेन्नासौ स्वरूपादधिको भवेत् अथ स्वभावभूतत्वात्स्वरूपानतिरिक्तत्वे
पि क्रमस्य स्वस्वातंत्र्यादतिरिक्तायमानतयावभासनमित्युच्यते तर्हि स्मद्दर्शनमेवागतोसीत्याह स्वरूपानति।
कस्यापि क्रमस्य स्वस्वभावतः स्वस्वातंत्र्याद्भासनं स्यात् किमन्यद्ब्रूमहे वयं इयं श्रीशिवपदैकः कर्त्तेति परिभा
ष्यते किंनाम चास्य कर्तृत्वमित्याशंक्याह कर्तृत्वं चैतदेतस्य तथामात्रावभासनं तथामात्रावभासनमिति तथा
विचित्रेण रूपेण प्रमातृप्रमेयात्मनां मात्राणांमांशानामवभासनमतिरिक्ततयेव प्रथनमित्यर्थः ननु विश्वपा
दार्था यथा भगवता स्वेच्छयैवावभासितास्तथा कार्यकारणभावोपीत्याह तथावभासनं चास्मि कार्यकारणभा
वो तन्वेवं बीजांकुरादौ घटपटादौ च सर्वत्र भावकर्तृकमविशेषणावभासने इति कथं कार्यकारणताव्यवस्था
इत्याशंक्याह यथा हि घटसाहित्यं पटस्यापि वभासते तथा घटांतरता किं तु सा नियमोज्झिता अतो घनियमे

श्री॰
ने॰लो॰
६३

नैवयस्मादाभासनंतरं तत्तस्यकारणंधूमः सतिद्रूपान्वयेधिके नियमोस्त्विति तत्तयोर्विपर्ययेणाविशेषेण च दर्शनात्
नन्वेवंबीजादेरपि तथापि कृतिकारोहि एवदयादौ कार्यकारणभावः प्रसज्येत शंकोक्तं सतिद्रूपान्वयेधिके इति स्फुटा
वभासायायदे चदादेः कार्यस्य मृदंड चक्रादीति बहूनिकारणानीत्यविवादः तत्रास्य मृद उपादानकारणं यतोसेव शि
वकस्थूपाकादिक्रमेणस्वानेपतितयानुवर्त्तत इति दंडादित्सहकारिकारणं प्रगुणेनपरिवर्त्तनाद्युपकारमात्र
चरितार्थत्वात् तेन यद्येवं यस्य रूपं केनचिद्धर्मेणानुयायि भासते तत्तदेव तस्योपादानकारणमिति घटोह्यप्यन
पेतानुस्पृष्टमेदंपर्यंतं राश्रयेतस्योपादानहेतुत्वं मृदः कृंडादिकं यथेति यत्तु नरैवमात्रलक्षणोरपि धूमादाव
नुपादानमेव कार्यत्वमन्यथा यतः कारणविभागानभिज्ञत्वमेव तत्त्वोपायतो धूमस्यनाग्निरुपादानकारणमपि
नाग्नेरिंधनादितथाहि तथात्त्वरुक्षादेरुपादानादस्यरोधा यत्र यदवभासते तत्तदेव तस्योपादानकारणं अत्र लौकि
कानामपि विवादोयं चंद्रकांतोदकद्रवादौ चंद्रकांतेद्रवोपादानाश्चेदकिरणपयोपादानेन्यथाहि चंद्रकांतस्य
द्रवीभावे लक्षणान्तर्गणप्रसंगः स्यादित्यलमवांतरेण नन्वेवंरूपान्वयोपक्रमः पौर्वापर्यनियमात्मा कार्यकारणा
भावो घटितोसत्वकथं व्यभिचरेदित्याशंक्याह नियमस्तु तथारूपभासनामात्रसारकः बीजादंकुरस्येवभा
सनेन न हि सर्वदा भासनामात्रसारे विहेतुरयंभासने न हि सर्वदेति कदाचिद्बीजाभावेप्यंकुरो भवेदिति भावः
तदाह योगीज्ञानंतरोद्भूततथाभूतांकुरो यतः दृष्टेनथावियथाकारे नियमो भासते यतः स्वल्पेय घटपटादीनां हेतु
त्वहेतुत्वभावना भासते नियमेणोववायाश्रुत्येननतावता स्फुरत्वल्लयानिनो निरुपादानमेवेक्ष्यमात्रेणांकुरादि

कार्य्यकारणंनीतिविवादः तेनयोगिनोपितत्र गृह्णन्तोत्तएवतथाभूतोबीजाभावेपि प्रादुर्भूतोयोसावंकुरस्तस्मिन्नपी
तःपौर्वापर्यात्मानियमोभासतेबीजादेवांकुरोजायतेयतिनायमेकान्तइत्यर्थः योगीच्छाभिनिर्वर्तितस्त्वंकुरोबी
जकार्यांकुरसमानजातीयएवनतुशाल्यंकुरादिजायतइत्याहतथाविधाकारइति यन्त्यथाहियोगीनामिच्छा
विसंवादाद्योगित्वमेवनसिध्येत् नचैतद्भ्रांतिमात्रमित्युक्तमिष्टइतितन्नस्यभीप्सितार्थक्रियाकारिणीत्यर्थः
तदुक्तं योगिनामपिमृद्बीजाद्विनैवेच्छावशेनयत् घटादिजायतेतत्तत्स्थिरस्वार्थक्रियाकरमिति तथा यतःस्व
प्नेपिनियमेनैवघटकार्यःघटोपिभासते घटाभासानन्तरंघटाभासस्योदयात् स्यादेवमेतद्यदिबाधानस्यादित्या
ह बाधाशून्येनेति बाधमात्रकिंतादात्विकःकालांतरभावीवातत्रतावदन्तरः घटोजायतइतिनोपिस्वप्नापेक्ष
याबाधसंभवात् तदात्विकस्तुनास्त्येवबाधःप्रबोधपर्यन्तंतदाकारतयावभासात् अतएवतावतिस्वप्नावस्था
यामेवोक्तं एवंनिर्बाधोनियमएवकार्यकारणतायानिबंधनमित्याह तत्रतावतितद्रूप्यानियमोबाध
वर्जितः भातितावतितद्रूप्यात् फलहेतुफलात्मता नन्वेवमपिसौगतमतमेवापतेदित्याशंक्याह तथाभूतेच
नियतेहेतुतद्वत्तेवस्तुतस्त्विन्द्रियस्यैवहेतुतातद्विसर्वत्र तदितियन्नाम चिन्द्रियस्यैवहेतुतेतिसर्वत्रा
मितिसर्वेषामेवमहेंद्राद्याभासानांविश्रांतिधामत्वेनानुवर्तनात् एवंचनैकंकिंचिज्जनकंसामर्थ्यविजन्निके
त्याह्यपिसंगच्छतेइत्याह अतएवघटोद्भूतौसामग्रीहेतुरुच्यते सामग्रीतिनपुनर्व्यस्ताःसमग्राः नतुसमग्रा
न्वंकुरादीन्विहायकानामान्यासामग्रीत्युच्यतेइत्याशंक्याह सामग्रीचसमग्राणांयदेकंनेष्यतेवपुः हेतुभेदान्

श्रीः
त.लो.
६५

64

भेदः स्यात्फलेन तथा च सामग्रीभेदो हेतौ एकैव प्रतिनियतसामग्रीप्रयोज्यनियमित्वमेकप्रमातृविशेषानिलस्तम्भे ज्ञानावच्छे
देशाद्ययोगस्तापव यदि च दहनत्वः सकलकारणभेदात्कार्यस्य विवादादनेकचराः आडम्बरेषुः नचैवमित्य।
कप्रमातृविशेषत्वात्सामग्रीशब्दवाच्यमेवैषां प्रत्येकमवर्णनीयं यदेकमेव घटं जनयेत् यदपि तत्रैव चकार।
कानां पारंपरिको भेदो यतः फलभेदोऽपि स्यात् नैमित्तिककार्योत्पत्तौ प्रत्यक्षविरुद्धं चैतदित्याह न त्वासमंजस।
मिति ननु यस्य यस्यान्वयव्यतिरेकावनुविधत्ते तत्तत्स्यकारणमित्युक्तं यस्तानां च महदेशादीनामेव भावो ना।
स्ति समग्राणां चास्तीति कोऽर्थः सामग्रीशब्दवाच्यैनैकेन व्यपदेशाभ्युपगमे नैषामित्याशंक्याह यद्यस्यानु।
विधत्ते तावन्वयव्यतिरेकतो न तत्स्य हेतुः चेत्तोयेकं दण्डकोनतः प्रियः उक्तं स्तिसमन्तेनत्वमेवतन्तन्तु रूपेण
दीर्घेणेन भवनशक्तीकृतत्वात् ननु समस्तानां मध्ये मेकेन चिद्रूपेण यथैकात्म्येन स्यादेशकालनुविधान।
हेतूनामपि हेतुत्वं प्रसज्जेदित्याह समग्राश्च यथा दण्डसूत्रचक्रकुलालादयः दूरासन्नभाविनश्चार्थहेतुत्वेनेति मा।
न्महे दूरामेर्वाद्यः भाविनः कर्कादयः इत्यमितितथा पर्वं यथा देशादयो घटे हेतुत्वेन भवंतितथाहुरा।
द्येयापीति मन्महे प्रसंगेन मन्यामहे इत्यर्थः ननु दूरभाविनोऽन्वयव्यतिरेकानुविधानमसिद्धमित्या।
शंक्या यदि तत्र भवेत्तेन कर्मविध्यन्ताऽपि कश्चन न जायते घटो न तत्तस्य हेतुर्व्यपोहितः यथा च चक्रवि
यत्ते देशकालेव हेतुत्वं यातिकर्किसमेर्वाद्यास्तु हेतुत्वस्यावधिस्थिताः ननु चक्रादीनां किं देशकालस
न्निकर्षे विवक्षितमुत तद्रूपसन्निकर्षः न च देशादिसन्निकर्षत्वं घटादीनामपि संभवेदिति तेषामपि एकका

र्यकारित्वं प्रसज्येत । तद्रूपसन्निकर्षश्च नेष्यते भवद्भिः । तन्नियतदेशाद्यवस्थायित्वेनासन्निकर्षः पर्यवस्येत् । तस्य
मेवादीनामप्यविशिष्टमिति तेपि हेतवो भवेयुः । तस्माद्देशाद्येकप्रमातृविश्रान्तिमत्तत्त्वमेकं रूपमवश्या
भ्युपगमनीयं येन तत्संयोजनवियोजनादावेकस्यैव परमेश्वरस्य कर्तृत्वे विश्वमिदमुपक्षिप्येत । तदाह
तथा चैतेषां हेतूनां संयोजनवियोजने नियतः शिववदेकः स्वतन्त्रः कर्त्तानामियात् । ननु कथं सर्वत्र शि
वस्यैव कर्तृत्वमिष्यते यदा दैहि कुम्भकारो व्याप्रियमाणो दृश्यते इत्याशंक्याह कुम्भकारस्य या संविच्चक्र
देशादियोजने शिववद्धि सा यस्मात् संविदः का विशिष्टता का विशिष्टतेति को भेद इत्यर्थः । नहि संविदः
संविद्रूपादन्यमात्रेणापि दिक्के रूपान्तरं किंचिद्भवेदिति भावः । ननु कौम्भकारी संविद्देशकालाद्यवच्छेदा
त्किंचिज्ज्ञत्वस्वभावा पराप्रसरत्वविच्छिन्ना वा परा हि यद्रूपेति कथं तयोरविशेष उक्त इत्याशंक्याह कौम्भ
कारीत्यस्य संवित्तिरवच्छेदावभासनात्र भिन्नकल्पा यदित्तेणा देशचक्रादिमय्यतः देशचक्रादिमय्यतः
तेप्येति देशादि वस्तुहेतुकारणमात्रमेतदिति तात्पर्यं प्रत्यस्तमनात्र कुम्भकारस्य साक्षात्कर्तृत्वमिति शि
व एव सर्वत्र कर्तेति सिद्धं तदाह तस्मादेकैकनिर्माणे शिवो विश्वैकविग्रहः । कर्तेति शेषः । कर्तृत्वाभि
मानोपि विमोहः कृतिः । ननु यद्येवं तद्देशादिसमानकस्येदपि कुम्भकारस्य कथमेवमभिमानो भवेद्
न्मयेदं कृतमितीत्याशंक्याह पुंस इत्यादि यश्चायमस्य कर्तृत्वाभिमानः प्रतिभुवाग्यमणीभावः सापा
रमेश्वर्यैव नियतशक्त्या तथाव्यवस्थापितोयं तेनायं मायादिव्यवस्थापितसिद्धेरिति न कश्चिद्दोषः । एव

श्री
तं.लो.
६५

माभासमात्रसतत्त्व एव कार्यकारणभाव इति सिद्धं तत्रास्य लोकशास्त्रादावनेकप्रकारं वैचित्र्यमित्याह प्र
त एव तथाभानपरमार्थतया स्थितः कार्यकारणभावस्य लौकिकशास्त्रे च चित्रता तत्रशायान्याच्छास्त्रीयं ता
वद्वैचित्र्यं दर्शयति मायातोऽव्यक्तकलयोरिति रौरवसंग्रहे श्रीपूर्वे तु कलातत्त्वाद्व्यक्तमिति कथ्यते रौरव
संग्रहे इति इह तेनापेक्षया यदुक्तं तत्र ततो विशेषाय विधेशो मायामपरमेश्वरः क्षोभयित्वास्तु किंचिद्व्य
नैर्नेत्सी कला कलातत्त्वाद्रागविधेर्हि तत्रैव सर्वभूततः अव्यक्तं च ततस्तस्मात् गुणाश्चायस्कान्तमुक्ति
श्च चाव्यक्तं च तत इति तच्छब्देन मायापरामर्श इति हृदयस्थितिपादाः यदुक्तं मायातोऽव्यक्तकलयोः कला
तो रागविद्ययोरिति श्रीपूर्वे इति श्रीमालिनीविजये यदुक्तं तत्र मायामाविश्य शक्तिभिरिच्छापदकस्य प्रा
सूक्ष्मा कलातत्त्वमिति तत एव कलातत्त्वाद्व्यक्तमसृजत्तत इति च एवमव्यक्ते मायायाः कलायाश्च का
र्यमिति शास्त्रीयं वैचित्र्यं अत एव चैवं विसंवादाशंकया अत्र यदन्यैरस्य व्याख्यातं तदप्रयोजकमेवेत्या
ह तत एव निशाख्यात् कालीभूताद् अलिंगकं इति व्याख्यामङ्केऽस्मिन्नतित्यायेति निष्फला निशाख्या
नादिति मायाख्यात्तत्त्वात् अलिंगकमित्यव्यक्तं इदानीं लौकिकमपि वैचित्र्यं दर्शयति लोकेऽपि गोमय
या कीटात् संकल्पात्स्वप्नतः सृतेः योगात्मातोऽप्यसंख्यमन्त्रप्रभावादेश्च वृश्चिकाः कीटादिति वृश्चिकात् इह
वह्निरपि पित्तविस्फारतो यथाभासमात्रसारत्वमेव मौलं रूपमित्युक्तं संकल्पात्स्वप्नतः सृतेरिति द्वयोरिति
रत्नौषध्यादि अचिंत्यो हि मणिमंत्रौषधीनां प्रभाव इति भावः ननु वृश्चिकाद्गोमयादेश्च जातानां एव वृश्चि

65

कः नहियादृशोवृश्चिकाज्जातोवृश्चिकस्तादृशोवगोमयादेरितिभवितुमर्हति कारणभेदात्कार्यभेदस्या-
विवादात् नचैवमभेदेवस्तुनोः शाब्दसाधारण्यमात्रेणैवैकत्वंन्याय्यं यदाह॥ वस्तुभेदेप्रसिद्धस्यशब्दसा-
म्यादभेदिनः नयुक्तासाधनेगोबाह्मणादीनांविषाणवदिति तदाह अन्यएवसचेत् सत्यमेवमित्याह
कामंजातस्यैवविशेषतः वृश्चिकाद्गोमयाद्वाजातानांवृश्चिकानांतु नमस्तिकश्चिदात्मीयेदेशकाले
काराद्यात्माविशेषोयेनैषामन्योन्यभेदः किंतुवृश्चिकाज्जातानामपिसजातीयः तेषामपिहिदेशकाला-
कारादिनाव्यक्तिभेदमुपलभंते लौकिकाअतआह सत्यसर्वंचतत्तुल्यप्रत्यवमर्शैक्यमस्तिच अयंवृश्चि-
कोऽयमितिप्रत्ययात्तुनामसत्त्वसंभवेत्तदिहापिसमानमित्युक्तं तत्परामर्शैक्यमस्त्विति नचायमवृ-
श्चिकेवृश्चिकप्रत्ययोविसंवादाभावात् इहचपरामर्शएववृश्चिकत्वादिनाभिन्नावभासत्वेप्यर्थाना-
मैक्यप्रतिष्ठापनेपरंजीवितं यदुक्तं वृश्चिकतयार्थानांपरोक्षाध्यवसितात्मना वायोतत्रतयादोषैकं
जनकस्यान्यथापिवा भिन्नावभासस्वभावानामपिस्वभावाभ्यासतः एकप्रत्यवमर्शाख्यादेकत्वमतिवारि
तमिति अतश्चैकस्यापिकार्यस्यानेककारणत्वेनकश्चिद्दोषः आभासमात्रपरमार्थोहिकार्यकारण-
भावइतिपरिस्थापितं अतएवचकार्यस्यस्वरूपेक्रमेणाप्यन्यथाभावोपदेशोनायुक्तइत्याह ततएव।
स्वरूपेपिक्रमेणान्यादृशीस्थितिः प्राक्पश्चादुत्पत्तेचित्रा तथाभावस्वभावतः स्वरूपइति यथामनसःक-
चिद्बुद्धीन्द्रियत्वमुक्तं क्वचिच्चान्तःकरणत्वे तदुक्तं श्रोत्रंचचक्षुस्त्वग्जिह्वानासाचित्तंचधीजनइति अंतःक

श्री॰
ने॰त्रो॰
६६

करणं त्रिविधमिति च क्रमस्य पुनः कार्यकारणस्य प्रस्ताव प्राधान्येन शास्त्रेष्वस्यादृशीं स्थितिं दर्शयति पुंरागो विक
ला कालमायाज्ञानोत्तरे क्रमात् नियतिर्नास्ति वैरिंचे कलोर्ध्वे नियतिः स्मृता पुंरागविद्या ऊर्ध्वं कला नियतिः
संपुटे कालो मायेति कथितः क्रमः किरणशास्त्रे तु पुमान्नियत्या कालश्च रागविद्याकलान्वितः इत्येष क्रम
उद्दिष्टो मातंगे पारमेश्वरे ज्ञानोत्तरे इति सर्वज्ञानोत्तरे यदुक्तं तत्र वस्तुतः पुरुषः स्वात्मा व्यक्ताव्यक्तः सनात
न इति तत ऊर्ध्वं भवेदन्यत् कालस्यावरणं गुहेति अत ऊर्ध्वं भवेदन्यन्मायातत्त्वं सदुत्तरमिति च नियतिर्नास्ती
ति सर्वज्ञानोत्तरे तस्या अनभिधानात् वैरिंच इति स्वायंभुवे यदुक्तं तत्र मायातत्त्वात्कालतत्त्वं संस्थितं ततस्
तदूर्ध्वे संस्थाप्यस्मिन्कालात् तद्विद्याप्येवं ततः परमिति अत्र हि संस्थापयति नियच्छति भोगेष्वणूनिति सं
स्थापयतीति व्याख्यातारः अत्र चका ... नियतिसंपुटः कलेत्येवमावदेत् यदुक्तं तत्र तत्रैव पुरुषो ज्ञेयः
प्रधानग्रहपालकाः रागतत्त्वाश्च विद्याख्यं सपुद्गं पशुमोहकमिति ततः कालनियत्याख्यं संपुटं व्याप्य ल
द्वयेति कालतत्त्वात् कला ज्ञेया लक्षायतनपरिच्छेदेति तदूर्ध्वं तु भवेन्माया कोटिधा योन्यमायेय इति च नि
यत्येति नियतः क्रम उद्दिष्टः अत्र यथा दृष्टिः क्रमेण यदुक्तं तत्र लोभितो नेत्रनाथेन ग्रंथिर्मायात्मको यदेत्यापु
पक्रम्य तद्वन्मायांशे येषां भुज्यते चेतना कलेति इत्येतो कलितस्यास्य कलया प्राक्जरा निधेः कलाया
रेणु विज्ञाने बन्धको विद्यया भवेदिति तस्मादेवाशयाद्रागः स्वल्पेभ्योऽभिजायते येनासौ रंजितः क्षिप्रं
भोगाभ्यासात्परः इति अथ कालक्रमः भामः कंचुकत्रयदर्शनात् येनासौ कल्पते स्वस्मिन् शिवसामर्थ्ययो

गतइति ग्रंथेदानीं मूलनिबन्धकारणस्याभिनवगुप्तेः। शक्तिर्नियामिकांशः सततत्वेन समर्पितेति ग्रंथपुस्तकत्वनिर्देशा
स्वाधिष्ठानेनोपसर्पितइति च क्रमस्यान्याह श्रीस्थितिर्निगदसिद्धेति न विभज्य व्याख्याता इदानीं प्रकृतमेवानुस
रति कार्यकारणभावो येन तत्त्वेश्वरं व्यवस्थितं श्रीपूर्वशास्त्रे कथितो वशमः कारणकल्पना श्रीपूर्वशास्त्रेइति।
तदधिकारेणैव तस्य ग्रंथस्य प्रवृत्तेः कारणकल्पनावात्र तत्त्वेष्वतिप्रविभागस्य प्रक्रांततया तद्दिक्षयैव पर्यवस्यो।
दितमुक्तोद्देशादिष्टस्य तत्त्वक्रमनिरूपणाख्यस्यापि प्रमेयस्य सावकाशातेनार्थसामर्थ्यलभ्यं तदेवाह शिवःस्व
तंत्रदृग्रूपः पंचशक्तिसुनिर्भरः स्वातंत्र्यभासितभिदः पंचधा प्रविभज्यते स्वतंत्रदृग्रूपस्य नन्याकांक्षत्वात्स्वतं
त्राचेयं दृक्रूपोनिराशंसस्तत्पर्यः अतएव पंचशक्तिसुनिर्भरः पूर्णइत्युक्तो पंचधाप्रविभागमेव दर्शयति चि
दानंदेषणाज्ञानक्रियाणां सुस्फुटत्वतः शिवशक्तिसदेशानविद्याख्यं तत्त्वपंचकं सदेतिसदाशिवः तदुक्तं
चिदानंदेषणाज्ञानक्रियापंचमहातनुः विवर्ततेमहेशानस्तत्त्वकोशेपंचधेति तथा शिवशक्तिसदाशिवता
मीश्वरविद्यामयी च तत्त्वदशा शक्तीनां पंचानां विभक्तभावेन भासयतीति ननु इह सर्वस्य सर्वात्मकत्वादे
कैकापि शक्तिः सर्वशक्तिस्वभावेति कथमेकैकशक्तिप्राधान्येन तत्त्वपंचकनिरूपणमित्याह एकैकत्रापि त
त्त्वेस्मिन् सर्वशक्तिसुनिर्भरे तत्तत्प्राधान्ययोगेन ससभेदो निरूप्यते तत्रादितश्चिदानंदादि इहाखिलविका
त्मस्वभावः परएव शिवः पूर्णत्वात् निराशंसोपि स्वस्वातंत्र्यमहात्म्याद्धि किलिलमिषया परानंदचमत्का
रतारतम्येन प्रथममहमिति परामर्शनया शक्तिदशामधिशयानः प्रस्फुरेदनंतरं चाहमिदमिति परामृ।

श्री॰
तं॰लो॰
६७

शेषाद्वा द्वयमवभासयेत् तत्र च शुद्धचिन्मात्राधिकरण एवाहमित्यंशे यदा परमेश्वर इदमंशमुल्लासयति तदा त
न्मीलितमात्रचित्रकल्पभावराशिविषयत्वेनास्फुटत्वादिच्छाप्रधानं सदाशिवतत्त्वमहमिदमिति भावराशेः
पुनः स्फुटीभूतत्वे तदधिकरण एवेदमंशे यदाहमंशं निषिञ्चति तदा ज्ञानशक्तिप्रधानमीश्वरतत्त्वमिदमहमिति
अत एव चाहंविमर्शस्य विशेषणत्वेदमंशस्य व्यामलत्वाध्यामलत्वाभ्याममयं विशेषः यदा पुनः प्रस्फुटभेदभा
वराशिगते इदमंशे स्फुरणे चिन्मात्रगतत्वेनाहमंशः समुल्लसति भेदाद्वैतवाचिनाभिवेश्वरस्य यः समस्त
त्त्वलापुरस्त्वायेनाहमिदमिति परामर्शात्क्रियाशक्तिप्रधानं विद्यातत्त्वमिति विभागः यद्यपि परस्यैवेदमेक
चनमैश्वर्यं तत्त्यापितस्य यथा बहिरौन्मुख्येन व्यापारः शक्तित्वेन तथा सदाशिवेश्वरयोरपि विद्यातत्त्वमिति प्र
मुनैव चाशयेनात्र निरंशोमात्रार्णादहमिति पुराभासयति यद्विश्वावामाशास्ते तदत्र च विभक्तं निजकं
लो स्वरूपाद्भेदप्रसरणनिमेषस्थितिव्यवस्थदद्वैतं तं वेदे परमशिवशक्त्यात्म निखिलमित्याशयेनोक्तं ननु य
दि नामात्र परे रूपेऽपि वैभेदः संभवेन्नर्यस्य कथमनवच्छिन्नपरप्रकाशात्मके स्वरूपे तिष्ठेदित्याशंक्याह तथाहि
स्वस्वातन्त्र्यपरिशीलनतया विभुः निःसंख्यैर्वपुर्भिः रूपैर्भात्यवच्छेदवर्जनात् स एव हि शिवः स्वस्वातन्त्र्यमाहा
त्म्याद्भुतभावभवनाद्यात्मके विच्छिन्नैरनन्तै रूपैः स्वात्मन्यवच्छेदवच्छेदवर्जयित्वा भाति एवमप्रच्युतप्रा
च्य स्वरूपत्वादनवच्छिन्नपरप्रकाशात्मक एवेत्यर्थः नन्वनेकैकरूपानुगमस्तत्त्वमित्युक्तं तच्चात्र कथमित्या
त्याशंक्याह शिवो भवा शक्तिर्मन्त्रमहेशमन्त्रनायकाः मन्त्रा इति विशुद्धाः स्युरमी पञ्च गणाः क्रमात् स्वस्मि

67

स्वस्मिन्नणो भाति यद्यद्रूपं समस्त्वपि तदेव तत्त्वमित्युक्तं कालाग्न्यादेर्धरादिवत् यदिवेति शिवादियं च तत्त्वेषु क
श्चैषां स्तोरणा इत्याशंक्योक्तं शांभवाया अमी पंच गणा इति क्रमादिति यथासंख्येन तेन शिव तत्त्वे शांभवाया
वद्विद्यातत्त्वे मंत्रा इति शांभवा इति शंभोः परप्रकाशात्मन इमे परप्रकाशनान्यथानुपपत्त्या वा मन्तव्या दात
म्यहृत्त्वे योऽभुवनादयो विशेषभावा इत्यर्थः यदुक्तं प्राक् यान्युक्तानि पराण्यत्र निर्विविधैर्यदेष्वन्वितं तद्रूपं भाति
परप्रकाशनिर्विंडदेवः स एकः शिवः इति शक्तिजाः स्वतनाश्रितायाः मंत्रमहेशा यत्स्तु पूर्वमेवोक्ताः एवं मंत्रे
त्रमहेशाख्यात्मनि स्वस्मिन्नवरोहं येकिं त्वांतरदशा इकात्मादाख्ये तत्त्व मादितः बहिर्भावपरत्वे तत्परतः परमे
श्वर मित्याद्युक्तयुक्त्या यदांतरदशोद्रिक्तत्वादिकमवया यद्रूपमाभासते तदभिप्रायेण ईश्वरसदाशिव तत्त्वमी
श्वरे तत्त्वे चेत्युक्तं पुनरधिष्ठातृदेवताभिप्रायेण सदेवांतानां रूपतयाशिवत्वस्यभासनादहंतारूपतया वैश्वर्यस्ये
वपरिस्फुरणात् एवं हि ब्रह्मादीनामपि पृथक्तत्त्वपरिगणनं प्रसज्येत् अन्यथा येषां कारणत्वस्याविशेषाद
वजरतीयं स्यात् तथाहि च पृथ्व्यधिष्ठातृत्वात्सर्वभौमस्यापि रात्तत्त्वांतरत्वं प्रसज्जेत्त चैवमित्ययथोक्त
मेवयुक्तं तदाह येनयस्साक्षात् आनसाद्रूपेण निर्विर्भिताः यद्रूपासौ विनैवांतंप्रसक्ताभीष्टहृष्टयः ब्रह्मा
निःस्वाधिपतिः पृथक्तत्त्वे न गण्यते सदाशिवाय मन्त्वपृथग्गण्यते इति कोऽण्यः ब्रह्माविष्णुरुद्रेशानसदाशि
वानाश्रितात्मनि षट्कारणसंतेर्धजरतीयमियं कृतः इति तत्कृत्स्नतत्त्वस्त्वराशिगतं नहि कारणं यथापृथि
व्यधिपतिरूपस्तत्त्वांतरं नहि तथा तत्तत्कलेशानः पृथक्तत्त्वांतरं कथं श्चाद्यानस्माद्रूपेणेति सदाशिवादी

श्री॰
ने॰उ॰
६८

68

तिनामसादृश्येन एतदेवाधिकारापेनोपसंहरति तदेवं पंचकमिदं साक्षात्तात्विकेवश्वेवकर्ष्याभासिन्नभेदिका ननु य
थेवं तदशुद्धेध्वनिकः कर्तेत्याशंक्याह ईश्वरेच्छावशात्तस्य भोगलोलिकचिह्नणान् संविभक्तमघोरेशाः स्य
जतीह सितेतरं ईश्वरस्य समनंतरोक्तस्य शुद्धस्वातंत्र्यमयस्येच्छावशेन तस्याः तोमस्य लोलिकाख्यस्य सह
कारितया स्फुटं तिष्टमायोस्य तोन्द्रस्वामीश्वरेच्छावशात् इत्यादि वक्ष्यमाणनीत्या कार्मं स्य मलस्य सह
कारितायास्तु न्नस्त्वी भोगलोलिकाभिलाषात्मिका माणवं मलं यस्यैव वियोग विह्नणः संजवितशात्मव
र्गस्तं संविभक्तं तत्तद्भोगसाधनं सिद्धासं विभागं कर्तेत्यघोरेशोमंत्रमहेश्वराणां प्रथमान्यतोनंतशब्दवाच्य
सितेतरमशुद्धमध्वानमिहास्मदनेसृजतिमयासेतोमशुद्धः सर्वं कलादिक्षितिपर्यंतनवेचित्र्येणावभासय
तिबहिरित्यर्थः तदुक्तं ईश्वरेच्छावशादस्य भोगेच्छा संप्रजायते भोगसाधनसंसिद्ध्यै भोगेच्छा स्यसेश्वरा
द् जगदुत्पादयामास मायामाविश्य शक्तिभिरिति तथा शुद्धध्वनि शिवः कर्ता प्रोक्तो नंतोसितेप्रभुरिति
ननु देवादीनां च सर्वेषां भाविनो त्रिविधं मलं तत्रापि कार्ममेवैकं मुख्यं संसारकारणमित्याशंक्याह युक्त्यास
र्वत्र मलस्य त्रैविध्येपि प्राधान्येन तया कार्मस्य संसारकारणत्वमिह पुनः सृष्टिहेतुत्वाभिधानेन लोलिकाया
इति किमेतदित्याशंक्याह अणूनां लोलिकानाम निष्कर्मायाभिलाषिता अपूर्णंमन्यताज्ञानं मलसा
वच्छिदोज्झिता यानीमणूनां निष्कर्मा क्रियारूपत्वाभावादिच्छामात्रस्वभावाभिलाषितासा प्रतिनिय
तविषयाभावादवच्छिदोज्झिता लोलिकास्वात्मनिसाकांक्षते वा तदेवापूर्णंमन्यता तदेवापूर्णताना

त्मकस्वरूपाख्यातेरज्ञानं संकुचितं ज्ञानं शक्तय एव स्वस्वपापहान्यामलं स्वातन्त्र्यहानिर्बोधस्य स्वातन्त्र्यस्याप्यबोध
ता द्विधाणवं मलमिदं स्वस्वरूपापहानितः इत्याद्युक्त्या द्विप्रकारमाणवाख्यं सर्वदैवोपात्त इत्यर्थः एवं कार्म
स्यैव मलस्य मुख्यतया संसारकारणत्वेप्येतदेवेह प्राधान्येनोक्तं यत्तस्यापीदं कारणमिति यदुक्तं निमित्त
मभिलाषाख्यमिति इयमेवाणवनामाणवता या योग्यता यत्तस्यां सत्यां तत्तदवच्छेदपात्रत्वमेषा स्यादिया तदा
ह योग्यतामात्रमेवैतद्भावच्छेदसंग्रहे मलत्वेनास्य न पृथक्त्वं भावोऽस्ति रागवत् योग्यतामात्रमितिसा
ह्यवच्छेदाधायिना भावेन यस्येति मलस्य इह खलु वक्तव्यतावच्छिद्यते वस्तुन एव च पृथक्त्वभावो भवेत्
न चैतदस्तु किंचिदपि तत्पूर्णस्वरूपस्याख्याति मात्रमिति युक्तमुक्तं तत्तदवच्छेदसंग्रहे योग्यतामात्रमेवै
तन्मलमिति ननु संक्षेपेन वैराग्यलक्षणो बुद्धिधर्मो रागस्तत्र द्विषयाभिलाषस्वभावोऽभ्युपगत इति किमने
नान्येनैव विधेन रागतत्त्वेन मलेन च प्रयोजनमित्याशंक्याह निरवच्छेदकर्मांशमात्रावच्छेदतस्तु सा रागा
पुंसि धियोऽयं धर्मः कर्मभेदविचित्रितो निरवच्छेदेति निर्विशेषः तेन सा लोलिकैव किंचिन्मे भूयादिति सामा
न्याकारविषयमात्रावच्छिन्ना पुंधर्मत्वेनाभिमता रागोऽयः कंचुकपंचान्तस्तत्त्वान्तरेण सर्वत्र परिणामिनः बु
द्धिधर्मस्तत्तस्यैव बहिष्पर्यन्ततया प्रसरणं येन तत्तद्विषयभेदवैचित्र्येणा बुभुक्षा पिपासा स्त्रीसंबुभुत्सादिल
क्षणो यमध्यवसायः समुदियात् आणवे पुनः सामान्येन जीयविषयो होवितो न्यत्वता मात्रयत्नो यमेवं
विधः स प्रत्यास्तदाह अपूर्णंमन्यतावेयं यथारूपावभासनं वेद्येतो यस्मादियमपूर्णमन्यताणवमा।

श्री॰ तं॰ लो॰ ६१

69

ललक्षणतयापुंबुद्धिधर्मितयाभिमतस्य स्वभावैराग्यात्मकस्य रूपस्यावभासनेन यथातथामेवावभासने इत्यर्थः अतएवै
तदानवेऽङ्कुरितप्राये रागे शुक्लितेऽद्धौ पुनः अङ्कुहिते पलिते चेयलक्ष्यां तेरेणवहुना नतु स्वतंत्रोऽत्र्यवोयमेवा
परमार्थेऽस्मन्मतसिद्धान्तः तत्तद्व्यतिरिक्तः कोऽयं मलो नामेत्याशंक्याह स्वतंत्रस्य शिवस्येच्छा तद्रूपोऽयथाद
स्वात्मप्रच्छादनेच्छैव वस्तुभूतस्तथामलः वस्तुभूत इति प्रच्छादनात्मरूपत्वात् इह खलु परमेश्वरः पूर्णज्ञाना
क्रियात्मके स्वे रूपे स्वेच्छया प्रच्छादसंकुचितात्मतामवभासयेत् अतश्च संकुचितमेवज्ञानमस्य रूपमिति स
र्वैरेवोद्घोष्यते तदुक्तं मलमज्ञानमिच्छन्तीति नन्वेवं परएव प्रकाशः समस्तीति तद्व्यतिरेकेण कथंकारम
येमलो नाम वस्तुभूतस्तथामलः वस्तुभूत इति प्रच्छादनात्मरूपत्वात् इह खलु परमेश्वरः पूर्णज्ञानक्रियात्मके स्वे
रूपे स्वेच्छया प्रच्छादसंकुचितात्मतामवभासयेत् अतश्च संकुचितमेवज्ञानमस्य रूपमिति सर्वैरेवोद्घोष्यते त
दुक्तं मलमज्ञानमिच्छन्तीति नन्वेवं परएव प्रकाशः समस्तीति तद्व्यतिरेकेण कथंकारमयं नाम वस्तु
रूपतामियादित्याशंक्याह यथैवाव्यतिरिक्तस्य यथा वैभावितात्मता तथैवास्येति शास्त्रेषु व्यतिरिक्तः स्थि
तो मलः अस्येति मलस्येति वस्तुतः परप्रकाशाव्यतिरिक्तत्वेपि घटादिवद्व्यतिरिक्ततयास्य भानात् शा
स्त्रेष्विति स्वयंभुवादिषु यदुक्तं तत्र प्रथनादिमलः पुंसां पशुत्वं परिकीर्तितमिति तथा प्रोक्तो येनमलेनाणु
मलस्तद्भिन्नलक्षण इति तथा ततः पुंसां मलस्तत इति अत एवास्य व्यतिरिक्ततयावभासनेनानाम नापूर्वं किं
विधेनाद्यतएषां संरंभः स्वात्मनामियात् स्वतंत्रेणैव ह्यस्य व्यतिरिक्तत्वे सम्बन्धाद्याः स्यात् न चैवमित्याह

व्यतिरिक्ताः स्वतंत्रत्वेन केऽपि शक्तादिवत् इह शक्तादयः पदार्थाः यथा वहेः परस्परं स्वात्मतंत्रेण व्यतिरिक्ताः
स्थिताः न तथा ये परप्रकाशापेक्षया भेदेन भानायोगात् एवं हि मद्वितीयः सन्निहित इत्येतावता वात्मानं रू
पाभिसृणोत्पाणा वरूणा मसृद्धिं विद्ध्यादिति व्यापकत्वात् तन्नित्यानुरूपा विशेषा शक्तिं च सह काएरुनपि किंना
रूपएव यादिसक्ते तत्सहितीयासांसृद्धिः शिवमुक्तात्मा किं नत्वव्यापकोऽपि मलः प्रतिपुरुषमेकैकया श
क्यात्मानक्रियात्मकं स्वरूपमाहृणयात् यदाहुः मलशक्तयो विभिन्नाः प्रत्यात्मं चात्र गुणावरिका इति तत
श्चायं परिणामवैचित्र्यं येऽप्यावरिकायाः शक्तेस्त्वन्निहति परिणमे मत्ते ते प्रति न सन्निदध्यादिति न मुक्ता
एरुनपि प्राप्तद्रूपयात् शिवं प्रति ग्रस्य पुनरावरकत्वमेव नास्ति तस्यानादि शुद्धबोधरूपत्वात् तदाह मल
स्याङ्गीकार्यास्ति शक्तिः साचाप्यमुक्तेशा इति न्यायोज्झितो वादः मुह्यमात्रैककल्पिताः शुक्ततोऽतिनम्प्रन
सिक्ताव्रगाशिवगावेति मन्यस्य च शक्तिरभ्युपगमस्यमानात हदेव सन्निधिमात्रेणावरिकेत्युक्ता एव दो
षः प्रावरकत्वेऽस्याः सर्वमेवावार्यं स्यान्नवा किंचिदिति कुतोऽयं नैयत्येनावसायः नहि वस्तु भवत्यपत्वा
तितस्यान्यत् किं विदाहृणया किंचिन्नेति नहि नीलं कस्यचिद् अनीलं भवेदिति भावः अथानेकाकारत्वा
तिपरिणामवैचित्र्यात् क्वचित् किंचिद्गुणाद्धिनवायेणमुक्तामुक्तविभाग इति चेन्नैतत् इहाखिलसर्वपदार्था
नां तत्तत्कार्यान्यथानुपपत्त्या शक्तिः परिकल्प्यते तथा च कोऽदोहन्यथानुपपत्त्यादाहिका शक्तिः सा च प
दार्थस्यात्मैव किंतु व्यापारभेदादारोपभेदः यदाहुः फलभेदादारोपभेदः पदार्थात्मा शक्तिरिति ग्रन्थ एव।

श्री॰
नै॰ ला॰
७०

वास्यव्यापारभेदाद्भेदो येनानेकशक्तयोभीयदार्थ्युच्यते यथा वह्नेर्दहनपचनाद्यनेककार्ययोगात् दाहि
कापाचिकेत्येवमाद्याः पुनेकाः शक्तयः स्वतः पुनर्वैककस्याः शक्तेर्भेदान युक्तः स्वरूपविशेषाद्व्यापारस्या
चैकत्वात्ममाणं तत्रस्याप्यभावात् दृष्टसिद्धयेऽदृष्टं कल्प्यते न त्वेकया शक्त्यासिद्धमिति किमदृष्टभेदकल्प
नायासेन एवं मलस्यापि यावरणाख्या या पारेशक्तिरस्ति तत्सर्वमेवाहएव्यात् किमस्या भेदेन येनैकास्या
त् अत एव मलस्यापि कापि रोद्ध्री शक्तिरस्तीत्येकवचनेनैव निर्देशः अतऽउक्तमेषयायोक्त्या तत्रत्यादिम
लस्य परिणामयोगाज्जडस्य बोधिका शक्तिरभ्युपगम्यमाना स्वयं तावज्जाड्यादेव न प्रवर्तते तथा चेन्नानु
मार्हएउ याद्दृष्टेनत्यभिसंयानाभावाद्विश्वमपि प्रतिपन्नं तारस्यायेन सर्वएवाहृतासर्वज्ञः एवं चेत्सुरेष्वपि कि
प्रमाणेयः शुद्धबोधस्वभावप्रकाशः साविति न चायमनादिबोधस्वभावश्चिव ज्ञेयुक्तमनादेवतन्निरोध
कत्वस्य विचारयितृमप्रकान्तत्वात् तदेवाह रोद्ध्री शक्तिर्जडस्यासौ स्वयमेव प्रवर्तते स्वयंप्रवृत्ता विश्वस्या
तथा च शनिकाश्मा ह्या चेतनश्चेतनाधिष्ठित एव प्रवर्तत इति तावदविवादः तत्त्वपरमेश्वर एव तत्
छक्तितथा प्रवर्तयेदिति चेत्तदपि नेत्याह मलस्य रोद्ध्री तां शक्तिमीशस्य संयुनक्ति तत् कीदृशाप्रश्नएव मि
तिप्रश्नेनानात्मत्वं वचः कीदृशमिति किं निर्मलेसमलेवातत्रायोपतेमुक्ताएत्यत्व जितासे नियुञ्ज्याच्चेत्
सर्वदेवसंसारः द्वितीयस्मिन्पुनरर्थकता तत्र नियोगस्य तत्त्वर्वमपि तत्स्य मलयोगात् तद्भयथा पितृन्नियोगो
न युज्यते इत्यत्र प्रतिसमाधानं तावद्यते इत्युक्तं नात्यन्तरं वचः इति मलेन च यद्देवस्यैव पदादिना वार्ये स्याएव

ऽस्याहतत्वेपि न स्वरूपं विशिष्यते ऽपि तु तद्विषयं ज्ञातृज्ञानं विहन्यते तथा ने च शिवस्यैवासौ मलो भवेद्यस्य
तद्विषयमनेन ज्ञानमहतमिति तदाह मलश्चावरणं तच्च नावार्यस्य विशेषकं उपलब्धिं विहन्त्येतद्दृष्टस्यैव
दाहृतिः मलेनाहृतत्रूपाणामणूनामेवायमुक्तं तत्त्वकं शिवपदवचतन्त्रयेण तस्यैवासौ मलो भवेत् ननु यद्येवं तर्हि
मलेन ज्ञमकर्तृत्वात्मकस्वरूपावरणात् किं वृत्त्या अणूनां स्वरूपनाश एव कृतो भवेदित्याशंक्याह विभोर्ज्ञान
क्रियामात्रसारस्याणुगणस्य च तदभावे मलेन रूपध्वंसायैव प्रकल्प्यते सारस्येति तदेकरूपस्येत्यर्थः तदभाव
इति ज्ञानक्रिययोरभावकारित्वात् न च शिवस्याणूनां च ज्ञानक्रियेनासमर्थः किं त्वसौ समवेतः तस्यैव
मलेनापहस्तने कृते तावत्ताधर्मिणः किंत्वेयतस्य स्वरूपध्वंसो भवेदित्याशंक्याह धर्माद्धर्मिणो येभेदः
समवायेन चैकता न तज्ज्ञवद्धिकृदितेकर्मभोजन शिथवत् यदुक्तं प्राक् परमेश्वरशास्त्रे हि न कणादादिदृ
ष्टिवत् शक्तीनां धर्मरूपाणामाश्रयः कोपि कथ्यत इति एतच्च तत्रैव निरूपितमिति तत एवावधार्यं इह तु
ग्रन्थविस्तरभयान्न पुनरायस्तम् तच्च संविन्मात्ररूपात्किं वा दृग्रूपाद्धा ज्ञानक्रिययोर्नाधिकं किं चिद्रूप
मिति भवतां मतं यदुक्तं क्रियाधिकाः शक्तयस्ताः संविद्रूपाधिका न हीति एवं चैषां मलेन तदपहस्तना
त्स्वरूपनाश एव कृतो भवेदिति युक्तमुक्तं विभोरणूनां च मलो ध्वंसायैव प्रकल्प्येत इति ननु रूपापहस्तन
नेप्यियावद्दूरादेः पटलादिरावरणं तथैवेहापि भविष्यतीत्याशंक्याह नाञ्जनं नमृती श्राववदीतेवमा
कते ज्ञाने चात्मधर्मी नोतथाभावेपि संसरति ज्ञानमित्यन्तं शुद्धचित्स्वभावात्मरूप नयैव वियस्याम्न

श्री॰
तं॰ लो॰
७९

71

तान्यामूर्तेनमूर्तेनवाकेनचिदावरणंयुक्तममूर्तस्यावरीतुमशक्यत्वात् तथाभावप्रतिप्रावरीतुंशक्यतेवचक्षुःसूर्यावि
रश्मीनांहिभौतिकत्वान्मूर्तत्वमितिमूर्तैःपटलाभ्रादिभिस्तद्युज्यतएवेत्याशयः नन्वसावमूर्तैस्तुमूर्तैर्वाकोभिनि
वेशःसपुनराक्षणाययातोस्यतावत् स्वभावत्वात् तेयोभवेत् तथाभूतस्यासौतादृश्यमवलेवतेभवन्मतेतावत्तेयमा
वस्यैवरूपत्वात् एवंचास्यस्वरूपमावरीतुंनशक्यमाङ्किनहन्तित्वात् ततस्यासौनिर्मलत्वात्पूर्णज्ञानक्रियएवेतिस
र्वःसर्वतोभवेत्तदाह सएवचमलोमूर्तःकिंज्ञानेननविद्यते सर्वगेनततःसर्वःसर्वज्ञत्वेनकिंभजेत् मलोमूर्तश्च
त्याकारप्रश्लेषाभ्यांयोज्यं सर्वगेनेतिमलाहतत्वाद्व्यापकेनसर्वज्ञत्वेनचेत्यर्थः ततइतितत्वस्वभावस्यानिरोधात्सर्व
इतिग्रणवर्गः ननुतमसःप्रकाशाभावमात्रमयत्वादमूर्तस्यापिप्रकाशंप्रत्यावरकत्वंदृष्टमेवेमलस्यापिभविष्य
तीतिचेत् तदपिनेत्याह यश्चधांतास्यकाशस्याहतिस्तत्प्रतिघातिभिः मूर्तानांप्रतियत्नस्ततोणूनांनामेतरदृशाम
केचिद्धिप्रकाशाभावमात्रंतमःप्रतिपन्नाःअन्येप्रकाशाभावव्यंजनीयमारोपितंनीलिममात्रंहिमूर्तिरिति एव
मप्यनेनावस्थितस्यप्रकाशस्याहृतिःकार्याअपितस्थितेरेवप्रतिबंधः तन्मूर्तत्वात्प्रतिघातिभिःतमःपरमा
णुभिर्मूर्तानांतेजःपरमाणूनांप्रतिहननमेवक्रियइत्यनयोःप्रतिघात्यप्रतिघातकभावोनावार्यावारकोभा
वइतिनायमत्रदृष्टांतः ननुचेतनत्वेनानाधिष्ठितःसन्यदिकिंचित्करःतदस्तुकोदोषः चेतनमेवपुनराव
रीतुंकृतोस्यसामर्थ्यमस्तीत्याह नचचेतनमात्मानंभवतेत्रोमलंततः आवरीतुंमघवादितिचेत्तदपिनेत्यस्मा
मानमित्याह नवाचेचमयाहृतिनिदर्शनं नखलुगरंसयादिस्वयंचेतनमात्मानमाहणुयात् किंतुचेता

नाधिष्ठितं न ह्यचेतनं चेतनप्रेरणामन्तरेण किंचिदपि कर्तुं शक्नुयात् तथा कर्मवन्तमप्येतदाह उक्तं भवद्भिरेवेश्वरो जडः ।
कर्ता न हि स्वयं स्वतन्त्रस्येश्वरस्यैताः शक्तयः प्रेरकः किल तदुक्तं जडस्य स्वतः प्रवृत्तौ निवृत्तौ च सामर्थ्यं नास्ती
त्युक्तं अतः पाशानामीश्वर एव तदानिवर्तकत्वात्तेभ्यो मोहदो रक्तादिबद्धमेघादिवदित्यादि ततः किमि
त्याशंक्याह अतः परं विपाकतत्पक्षशक्तिवलेरिति मधेस्तनेमदेहः एतत्स्वमोहफलात्मके तेन जडमपिम
याद्दिपरमेश्वरशक्तिप्रेरणयाचेतनमात्मानमाहृत्य मदयेत् किं तु गृहीतमेकोऽयं श्रणादिमयेन तत्स्वशुद्धा
चित्स्वभावे तस्यात्मप्रकृत्यावरीतुमशक्यत्वात् नन्वेवं मलोऽपि स्वतन्त्रेश्वरशक्तिप्रेरितमेव चेतनमणुवर्गं प्रेरक
माहृणुयादित्याशंक्याह नचेश्वरप्रेरितः शुद्धोऽमलश्चाहृणुयात् यतः निर्मलेष्वपि नेशस्य प्रेरकत्वं तथा चितम्
रहानादित्वेऽपि मलस्य बंधकत्वायामवश्यमीश्वरप्रेरणमादितरमप्युक्तमचेतनस्य चेतनाधिष्ठानं विना ।
कार्यकारित्वाभावात् अतश्चासौ परमेश्वरः कांश्चित्प्रति बंधनाय मलं प्रेरयेत् किंतु समलानततु निर्मलान् तत्रायेप
देवप्रेरणं तत्सर्वेषामपि तेषां मलयोगात् द्वितीयस्मिन्न शक्यमुक्तमारब्धमतिप्रसंगात् अत एवोक्तमीश्वरस्य
निर्मलेष्वपि प्रेरकत्वं हि नोचितं इति अस्मत्सर्वज्ञानक्रियात्मनो नैर्मल्यस्याविशेषात् परमेश्वरेणावेश्वरस्य
रस्य तिरोधाय मलेन नियुञ्जीत न अत एव वा परमेश्वरे शक्तियदेकापेक्षयाभूयसां सामर्थ्यातिशयः यदाहुः वि
शक्तिविदसमवायोभूयसां सर्वमर्थाभिलषितमस्वमिति तदाह नत्वे निर्मलभावे च प्रेरयेत् यत्नेत कथं नमीशा
शक्तियुक्ते यद्वयसोस्यात्मधर्मता इदानीमेतदुपसंहरन्नुक्तमनुसरति तेन स्वरूपस्यातेजमात्रेमलविज्ञेभि

श्री॰
ने॰ त्रो॰
७२

72

ते निर्णीतं वितन्तं चैतन्मायाख्यं चेत्यपले पुनः अन्ये त्विति अथ माङ्क्तिकादोषतएव पुनर्विसृतं नयावत्क्वचिदपि विगीत
तास्तीत्याह मलोभिलाषश्चाज्ञानमविद्यालौकिकन्तथा भवदोषोणवश्चग्लानिः शोषो विमूढता अहंम
मात्मतान्तेको मायाशक्तिश्च या स्मृतिः दोषबीजं पशुत्वं च संसाराङ्कुरकारणं इत्याद्यन्वर्थसंज्ञाभिस्तत्र तत्रैव
भज्यते नत्वसावनुगतोर्थः कइत्याशंक्याह अस्मिन्नातिभवति भवेद्दृष्टोभेदात्मनेति भवदोषः मेवंवदस्मि
न्नुइः एवसोतोणुत्वमदत्तियत्नवसेन भवदोषइनितकाविनात् संचवर्द्धितिनत्र तस्यैवेति समसंस्तोपमानं
त्वइति ताकर्मे नन्वेवं सर्वस्यानुगतोर्थः किं न दर्शितः इत्याशंक्याह शोषात्मकसगमाद्रूपाः शाह्यास्तत्रा
र्थमूहयेदुचितं अतएवास्माभिरपि ग्रन्थविस्तरभयादेतन्नव्याकृतमिति स्वयमेवाभ्यूह्यं ननु कर्मसंसाराङ्कु
रउक्तं संसारस्याङ्कुरस्तस्य कारणमितीत्याशंक्याह एतदन्यकृतप्रमेयसंगतिसंदर्शनपुरःसरं कार्ममलं प्रस्तौ।
ति संसारकारणं कर्मसंसाराङ्कुरउच्यते चतुर्दशविधं भूतवैचित्र्यं कर्मजं यतः कर्मणः संसारकारणत्वे हि।
तीयमर्थं हेतुः तेन संसारस्य शरीरभुवनाकारं मायीयं परिकीर्तितं मित्यादिनानिरूपितमस्य मायीयमलस्या
ङ्कुरइवाङ्कुरः कार्मणं कार्ममलं तस्यापि कारणमाणवमिति यदुक्तं मलः कर्मनिमित्तं च नैमित्तिकमतः
परमिति निमित्तमभिलाषात्मकमिति च एवं यतः कर्मवशादेव विचित्रः संसारः समुद्भवेत् अतः सर्वेषामे
वतदुच्छेदायैव यत्न इत्याह अतएव सांख्ययोगपाञ्चरात्रादिशासने अहंममेति संत्यागो नैष्कर्म्यायोपदि।
श्यते शासनइति शास्त्रे इदं हितं चोपदिष्टं यथा कश्चित्परं ब्रह्मणं हित्वाचिन्तः सर्वमपि कुर्वन्नाहं किंचित्करो

सीत्यभिमानादहंतांसंत्यजेत् तत्रवसंगाभावाममात्वेनकृतेनकश्चिदर्थइतिममताग्रहमपिसनैष्कर्म्यंप्राप्नुयादे
नास्यतदेकनिमित्तः संसारएवनभवेदिति यद्गीतं नमांकर्माणिलिंपंतिनमेकर्मफलेस्पृहा इतिमांयोभि
जानातिकर्मभिर्नसवध्यतेइति सक्ताकर्मफलासंगंनित्यतृप्तोनिराश्रयः कर्मण्यभिप्रवृत्तोपिनैवकिंचि
त्करोतिसइति योगयुक्तोविशुद्धात्माविजितात्माजितेन्द्रियः सर्वभूतात्मभूतात्माकुर्वन्नपिनलिप्यते नैव
किंचित्करोमीतियुक्तोमन्येततत्त्ववित्इति ब्रह्मण्याधायकर्माणिसंगंत्यक्त्वाकरोतियः लिप्यतेनसपापेन
पद्मपत्रमिवांभसेतिच नत्वयद्येवंतर्हिमुक्तएवासावित्याशंक्याह निष्कर्मोहिस्थितोमूलमलेप्यज्ञानना
मनि वैचित्र्यकारणाभावान्नोर्ध्वंसरतिनाप्ययः केवलेपारमितेनशिवाभेदमसंस्पृशन् विज्ञानकेवली
प्रोक्तः शुद्धचिन्मात्रसंस्थितः अपिशब्दोर्थेभिन्नक्रमः तेननिष्कर्मापीति ऊर्ध्वमितिशुद्धमध्वानेनसरत्यज्ञानन
सोमूलमलस्यावस्थावस्थानात् नाप्ययः शुद्धेतरवैचित्र्यकारणस्यकार्ममलस्याभावात् केवलेसोमसो
मायोर्ध्वेशुद्धविद्यायः सन्तिविज्ञानकेवलाइत्यायुक्तयुक्त्याशुद्धाशुद्धमध्यवर्तीशुद्धबोधस्वभावोपिसन्ते
महाप्रणवेणमलोशक्तत्वस्यस्वरूपसंकोचस्यसंभवादीतिमितेनस्वांते आविर्भूतबोधस्वभावपरमेश्वरा
विभेदमप्राप्नुवन्विज्ञानकेवली विज्ञानेवेद्यात्मकंरूपंकेवलंस्वांतेअरहितस्मरेतिप्रकर्षेणोक्तः सर्वेचोद्धृ
यत्तदस्यार्थः यदुक्तं शुद्धबोधात्मकत्वेपियेषांनात्मकर्तृता निर्मिताः स्वात्मनोभिन्नाभर्त्रा तेकर्तृतात्ययात्
बोधादिलक्षणैक्येपियेषामन्योन्यभिन्नता तथेश्वरेच्छाभेदेनतेचविज्ञानकेवलाइति नन्वस्यसर्वेदैवशिवा।

श्री
तं.लो.
७३

73

भेदसंस्पर्शोऽस्तीत्याशंक्याह सपुनः शांभवेच्छातः शिवाभेदं परामृशन् क्रमान्मंत्रेशतन्नेतृरूपो याति शिवात्मतां
क्रमादिति शिवाभेदपरामर्शस्य तारतम्यातिशयात् एतदेव तदार्ढ्यातिशयाद्‌ क्रमेणापि मंत्रमहेश्वरत
मस्य भवेदिति भावः तदुक्तं ससितत्त्वजं गान्त्वाष्टरादावेव निजेच्छया विज्ञानकेवलानष्टौ बोधयामास पुद्गलान्
इति ईशामंत्रेश्वरास्तं त्रेतारे मंत्रमहेश्वराः नन्वस्ति तावद्विज्ञानाकलस्याणवो मलः स च कर्मणः कारणं तत्क
थमसौ स्वकार्यं न जनयेद्येनास्य पुनः पुनः संसारित्वमेव स्यात् पुर्यष्टकं मंत्रादिक्रमेण शिवात्मतां यातीति क
स्मादुक्तमिति गर्भीकृताशंकाशंकांतरमाशंकते ननु कारणमेतस्य कारणं च मलः कथं स विज्ञानकल
स्यापि न स्यात्कर्मेति एतदेव प्रतिविधत्ते मैवं महिम्ना लोत्तानां कालेदिध्वंसिषुः कथं हेतुः स्याद्‌ध्वंसमान
त्वं स्वांतेत्रादेव वोऽह्वेतन् दिध्वंसिषुरिति स्वात्मस्याणवो यतं स्यात् पुरुषादेहाद्यहंभावाभिमानस्वभावभेदांत
रविरुद्धत्वात् एतदेव स्वकार्यजननासामर्थ्यात्मकं हेतुः स्यादित्युक्तं एतत्तस्य ध्वंसो न्युक्तवृत्तात्मना स्वमहिम्ना
ध्वंसमानत्वमेव न तु मौक्तरीयकं ध्वस्तत्वमेव वोदियात् नहि निर्दग्धबीजं पुनः प्ररोहमियात् नाप्यस्य नष्ट
तत्याऽनष्टतायावान्निर्नेत्तत्वादेवान्यत्किंचिदपेक्षणीयं संभवेत् अनेनैव चाभिप्रायेण विज्ञानादिकलादि
क्रमकल्पना सर्वं कृतेत्याह दध्वंसिषुर्ध्वंसमानध्वस्तावस्थत्रितत्त्वकृत्पृथग् दशात्रयं जंकृतावस्थांतरास्वक्रम
स्थितेः विज्ञानाकलमंत्रेशतादीशादिक्कल्पना अवस्थांतराणीति किंचिद्ध्वंसमानत्व किंचिद्ध्वस्तत्वादिरू
पाणि च तदेतः कारेवहेतुः स्वक्रमस्थितेरिति नहि दध्वंसिषुत्वादिदशांतरं कादाचित्कत्वावबोधतयाध्वंसमाना

तं ध्वस्तं वा प्राक् भवेदिति भावः तेन पंचस्वप्यास्तु दशास्तु यथासंख्येन विज्ञानाकलादिरूपत्वं कल्पितमिति ई
ष्णांमंत्रेश्वराः तदीशा मंत्रमहेश्वरा आदिशादि सिद्धः शिवः अन्यथा हि तदीशादिकल्पनेनैव स्यात् एवं वा
सामवस्थानां भेदात्तत्र पुंसामर्थयोरप्यनेकरूपत्वमित्यर्थसिद्धं अत आह ततः स्वभेदैर्यथावत्स्थितैर्बहु
भेदता तस्यापुंसः सकले दग्धसिपुर्नलमलः कर्मणेन निमित्तमिति तदेवाह अतः अध्वंसेनोत्कृष्टा विलीभू
तस्य शक्तिकः कर्मणो हेतुतामेतु मलः कथमिहोच्यतां विलीभूतेति अप्रवृत्तशक्तिः पुनः कर्मणो हेतुता
त्रियादिपाशयः एतच्चाभ्युपगम्योक्तं वस्तुतस्तु मलस्यैतन्न युज्यते इत्याह किंच कर्मापि न मलाद्यतः
कर्म क्रियात्मकं क्रिया च कर्तृतारूपा स्वातंत्र्यात्मा न पुनर्मलात् मलादिनकर्तृताभावात्स्वातंत्र्य रूपादिः
त्यर्थः कर्तृकर्मत्वं तत्त्वपचकार्यकारणभाव इति समनंतरमेवोपपादितं ननु यद्येवं तत्कथं मलमत्ता
न सिद्ध्यतीति संसारांकुरकारणमित्यायुक्तमित्याशंक्याह यावत्स्य कर्मणश्चित्रफलदत्वेन कर्मता प्रसिद्धा
सा न संकोचं विनाप्यनिर्मलस्य सः सेति चित्रफलदत्वेन कर्मतास इति संकोचः तेन संकोचं विनास्य न।
तत्तत्फलदाने सामर्थ्यं संकोचश्च मल इति प्रसूत कारणमुपचरितं संकेचितो हि भोक्ता शुभाशुभा
यात्मके भिन्ने सत्फलमात्मनि भोग्यत्वेनाभिमनुते येन देवमनुष्यादिविचित्ररूपतयावस्थानं तदाह वि
चित्रं हि फले भिन्ने भोग्यत्वेनाभिमन्यते मोक्ता यात्मनि तेनेयं भेदरूपमवस्थिति अतश्च नास्य स्वसेपत्त्यादु
पादाने सहकारि वा कारणं मलः किंतु कार्यकरणे हलावलंबनमात्रमित्याह इति स्वकार्यप्रसरे सहका

श्री॰
तं॰लो॰
७५

चित्तमाश्रयं सामर्थ्यव्यंजकत्वेन कर्मणः कारणं मलः नहि संकोचं विनास्य विचित्रफलदाने किंचित्सामर्थ्यमभिव्य-
ज्यत इति भावः नन्वेवं विज्ञानाकलानामपि स्यात् तत्र संकोचः प्रथक्कर्ममलद्वययोगात् तत्र विज्ञानकेवलो मलैकयु-
क्तो इत्यादिरुक्तेस्तत्पुनस्तत्कर्मयुक्तः प्रलयकेवलः इत्याद्युक्त्या प्रलयकेवलत्वं प्रसजेदित्याशंकते नन्वेवं कर्मस-
द्भावान्मलस्यापि स्थितेः कथं विज्ञानाकलता तस्य संकोचो ह्यस्ति तादृशः केनेदमुक्तं मलद्वययोगोस्येति तत्त-
दाह तस्येत्यादि तादृश इति प्राग्वदेव प्रलयाकलादिदशोचितः कर्मसामर्थ्यव्यंजनयोग्य इति यावत् तदेव।
विधत्ते मैवमथ स्वसंकोचोप्यसौ भावनया दृढम् नाहं कर्त्तेति मन्वानः कर्मसंस्कारसत्कृति भावनयेति अ-
हंममेति संन्यासादिरूपया अत्र ध्यास्य नैष्कर्म्यात् कार्ममलयोगादिति स्थितं विज्ञानाकलत्वं ननु संसारोस्ये-
देहपूर्वापरानुसंधानाभावोऽभवेदित्यस्य प्रमातृत्वमेव न स्यादित्याशंक्याह फलिघ्नीदेकर्मेतियाहफाट्ट
तिस्तत्तु तत्सं संस्कारः फलायेह न तु स्मरणकारणं दृष्टेति अनादित्वात् द्विधा स्यात्मनिमावान्माद्यस्यादि।
शास्त्रव्यपदेशपः संस्कारः सादिरनादिर्वाना नभवादितोयः प्रबोधबलात्प्रबुध्यमानः स्मरणकारणं तु।
याप्रमातुरनुसंधानात्मं प्रस्थेत् अन्यः पुनः कर्मवासनात्मा यद्दृशाहि चित्रफलदायकर्मस्यात् ननु कर्म
संस्कारवेदृच्छिन्नस्याविताकर्मणः किं दृष्टं यदस्य न तत्फलभागित्वं स्यादित्याशंक्याह अप्रबुद्धेपि संको
चे नाहं कर्त्तेति भावनात् न फलं स्ताविमूढादेः प्रायश्चित्तेष्व वाकृते अप्रबुद्धस्य इति सन्निहितेपि सहकारि।
णीति यावत् न फलमिति स्ववृत्तनं दृष्टं तात्मनः कर्मण इत्यर्थाव सेयं नहि जीवन्मुक्तादेरिदमहं करोमी

त्वत्संधानमस्तित्वनत्संधानायचकृतंकृतमेवनभवेदितिकिंफलेनयदभिप्रायेणैवचसमस्यानांक्रियाद्
यश्चायघन्यैकृतो प्रायश्चित्तेपिकृतेनाहमत्रकर्तेतिनिवृत्तिभावनात्तत्तद्विषयानुसंधानशैथिल्यादेवनत
फलदायित्वात् यदाहुः पापंकृत्वातुसंतप्यतस्मात्पापात्प्रमुच्यते नैवंकुर्यांपुनरितिनिवृत्त्यातुपूय
तेइति नन्वेवंसत्तथाफलदानेकर्मणःप्रयोजकंकिन्त्वभिसंधानादिरायातंसत्यमेतदित्याह यत्त्वयाय
तपस्तमेतदस्मैस्यादितिस्फुटं अभिसंधिमतः कर्मणःफलेदभिसंधितः स्फुटमितिदार्ढ्येनकर्मेतितत्पो
रूपेणनफलेदितिकार्त्तः तद्धिपरस्मैस्यादित्यभिसंहितमितिकथंस्वस्यस्वस्मिन्फलदायित्वात्यदाहुःन
ममीहितंफलंभवतीति नन्वेवंकर्मफलयोर्वैयधिकरण्यात्कृतनाशाकृताभ्यागमौ कथंकारंपर
उपपत्तेरित्याशंक्याह तथाभिसंधानात्मानसेकर्मसंस्कियात् फलोपरक्तोविदथकल्पितेफलसंप
दे तपःप्रभृतिहिकर्मतथापरत्रैवफलाभिसंधानात्मकंमनसिसंस्कारंसमर्पयत्फलसंपदेकल्प
